स्तीति विष्वक् ॥ * ॥ चिदिति[1] साकल्याद्यर्थोपमानासंमतिषु[2]। आचार्यश्चिदिदं ब्रूयात्[3]॥ किंचित् प्रयच्छति। न किंचिद् ब्रवीति[4]॥ अग्निश्चिन्नाधात्॥ कुत्साधांश्चिदाहरेति[5] ॥ * ॥ सुकमित्यतिशये। सुकं शोभते[6] ॥ * ॥ किमिति क्षेपप्रश्नेषदर्थातिशयेषु। किमयमपि ब्राह्मणः। किं गतोऽसि। न किमप्यस्ति। किमप्येष प्रगल्भते ॥ * ॥ खिदिति प्रश्नवितर्कयोः। कः खिदेकाकी चरति।[7] अधः खिदासीद् उपरि खिदासीत् ॥ * ॥ अन्तरेण। इति मध्यविनार्थयोः। यथा।

स्तनाभसूचामलमन्तरेण
स्फितस्खलच्चामरयोर्दयं सः।
भेजेऽभितः पातुकसिद्धसिन्धोर्
अभूतपूर्वा रुचमम्बुराशेः[8] ॥

खलच्चामरयोर्मध्य इत्यर्थः[9] ॥ अन्तरे। इत्यप्यमरसिंहः। यथा। आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः[10]॥ अन्तरेण पुरुषकारं न किंचिल्लभ्यते ॥ अन्तरेण मातापितोरित्यत्र तु प्रयोगे विनार्थेऽन्तरशब्दोऽनव्ययत्वेन द्वितीयान्तत्वयः[11] ॥ * ॥ एकपदे। इत्यकस्मादर्थे। अयमेकपदे तया वियोगः[12] ॥ * ॥ अहह। इत्यद्भुतखेदयोः। अहह महतां निःसीमानश्चरितविभूतयः[13]। अहह कष्टमपण्डितता विधेः[13] ॥ दीर्घान्तोऽपि। भिक्षित्वापि बुभुक्षिता यदहहा ॥ * ॥ उज्झि-

---

1 चिदित्यस्य B. C.; चिदित्यसाक° D. F.

2 °नासंमतिपूजासु B. F.; °मानासम्मतिपूजासु C.; D. om. the next exam.

3 Yâska N. 1, 4.

4 A. om. न; न किंचिदिदृदाति B.

5 शुक्रमित्य° शुक्रं° A. D.

6 V. S. 23, 9; अधः° Rgv. x. 129, 5.

7 Śiśup. 3, 3.

8 चलच्चामर° D.; om. B. C.

9 Thus also Kshîr. on A. K. iii. 5, 10.

10 द्वितीयाभावः A.; D. om. from अन्तरेण माता°

11 Vikramorv. śl. 73.

12 Bhartṛih. ii. 28; ii. 88.

Digitized by Google

ति[1] वितर्कसंबोधनपादपूरणेषु। क उ एति[2]। उ उक्तिष्ट। तद्वायुस्खदु चन्द्रमाः ॥ उ। इत्यव्प्रतिरूपको[3]ऽव्यस्ति। अस्य लयं विशेषः। उ-ओ वेति[4]। ॐ इति[5] पक्षे भवति ॥ ८ ॥

सत् फट् क्किञ्चिरराचाय[6] विभाषेति नचेत् पुतः[7]।
आः शप् समुपजोषं[8] खोरठावाडां[9] स्वरादयः ॥ ९ ॥

यदित्यादरे। सत्कृत्य। सत्कृतम् ॥ * ॥ फडिति विघ्नप्रतिहतोत्सारणे[10]। ॐ फट् प्रतिहतोऽसि ॥ * ॥ क्किदिति[11] भर्त्सनपादपूरणयोः। क्कित्[12] कितव कदर्योऽसि। क्कित् कैतदुपयुज्यते[13] ॥ * ॥ चिरराचाय। इति चिरस्यार्थे। चिरराचाय जनेन चिन्तितम् ॥ * ॥ विभाषा। इति विकल्पार्थे। विभाषायेप्रथमपूर्वेषु[14] ॥ * ॥ इति। इति हेतुप्रकारप्रकर्षैवमर्थव्यवस्थास्वरूपविवक्षानियमसमाप्तिप्रकृतिवक्ष्यमाणपरामर्शमतेषु[15]। हन्तीति पक्षायते ॥ गौरश्वो हस्तीति जातिः ॥ इतिपाणिनि[16]। पाणिनिशब्दः प्रकर्षात् प्रसिद्ध इत्यर्थः ॥ क्रमादमुं नारद इत्यबोधि सः[17] ॥

---

१ उदिति A.

२ (?) पति A. B. D.; क उ इति F.

३ Thus A.; इत्युव्प्रतिरूपको F.; इत्यरूपको B.; इत्यासूपको C.; इत्याप्रतिरूपको D.

४ उं ओरा इति A.; उं वोव् इति B.; अवोव इति C.; उं वोभ इति D.; उओ व इति F.; cf. Pâṇ. i. 1, 17.

५ उं इति A.; उ इति D.; उमिति B. C.; om. F.; cf. Pâṇ. i. 1, 18.

६ क्कञ्चिरराचाय F.

७ °पुतः C. F.; पुनः B. D.

८ आ शप्° B. C. F.; B. om. समुप; E. adds ओ.

९ खोरठावामः B. C.; खोसठावडामः F.

१० °प्रतिहतूत्सारणे A.; विघ्नप्रतिहंतृत्सारणे प्रतिहतोत्सारणे इत्यपि। F.

११ क्कदिति F.

१२ क्कत् F.

१३ क्कित् किं तदु° D.; क्कित्क तदु° B. C.; क्कत्क तदु° F.

१४ Pâṇ. iii. 4, 24.

१५ °प्रकर्षवचनैवमर्थ° F.; °परामर्शमानेषु B. C. F.

१६ पाणिनिः F.; corr. A. D.

१७ Śiśup. 1, 3.

Digitized by Google

ञ्नसिति कसन्तेभ्यो णः[1] ॥ वृद्धिरित्येवं या वृद्धिः । गुण इत्येवं यो गुण इति ॥ तदस्यास्त्यस्मिन्निति मतुप्[2] ॥ पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि[3] ॥ इत्युक्तवन्तं परिरभ्य दोर्भ्याम्[4] ॥ विनिश्चितार्थामिति वाचमाददे ॥ इत्यापिशलिः ॥ प्रत्यक्षसंनिधवधारणपदार्थाविपर्यासादिष्वपि[5] द्रष्टव्यः ॥ * ॥ न चेदिति निषेधे । न चेत्कर्तव्यम् ॥ निषेधार्थे नो चेदित्यपि पठनीयम् ॥ * ॥ पुदिति[6] कुत्सायाम् । पुत्[6] कुत्सितं कसति गच्छति । पुत्कसः[6] ॥ काम्यमिति तु शाकटायनः ॥ * ॥ आः । इति कोपपीडयोः ।

विद्यां मातरमाः प्रदर्श्य[7] नृपशून् भिक्षामहे निष्कृपाः ॥ * ॥ अविति प्रश्ने[8] । गां अप्करोति ॥ * ॥ समुपजोषमित्यानन्दे[9] । समुपजोषं वर्तते ॥ उपजोषमिति निर्वाणनारायणः[10] ॥ * ॥ खोः कुत्सायाम्[11] । खोः कटं करोति ॥ * ॥ अठ । अव । अड । इत्येते भर्त्सने । अठ करोतीत्यादि[11] ॥ * ॥ आमिति प्रतिवचनावधारणयोः । आं किं मां ब्रवीषि । आं चिरस्य प्रतिबुद्धोऽस्मि ॥ * ॥ खरादिरिति संबोधनभर्त्सनानुकम्पापूरणप्रतिषेधेषु[12] यथासंभवं भवति[13] । अ अपेहि । आ

---

१ Pâṇ. iii. 1, 140.

२ Pâṇ. v. 2, 94.

३ Kaṇâda Sûtra, 1, 1, 5.

४ Kirât. 11, 80.

५ प्रत्यक्षसन्निधवधारणपदार्थविपर्यासादि° D.

६ पुदिति° पुत्° पुत्कसः । चांडालः B. C. F.

७ [विद्या C.] मातरमा प्रदर्श्य C. F.

८ अपिति° A. B. C. F.; °प्रश्ने D.

९ °इति सानन्दे D.

१० Thus A. B. C. F.; D. om. from उपजोष°

११ For the passage from खोः कुत्सायां B. C. F. read: खोस् अठ अवड् [खोस् अवाठ C.; खोस अठ अवड F.] इत्येते भर्त्सने । खोः कटं करोति । अठ [अव C.] करोतीत्यादि । to which F. adds अवड गच्छति ।

१२ °कंपापादपूरण° F.; °कंपापापूरण°A.; °कंपापूरप्रति° D.

१३ भवंति A.; यथासंभवंतीति D.

Digitized by Google

एवं नु मन्यसे[1]। इ इदं पश्य। ईदृशः संसारः। उ उत्तिष्ठ। ऊ ऊषरे बीजं वपसि[2]। ए इतो भव। ऐ वाचं देहि[3]। ओ आवय[4]॥ ऋ ॠ ऌ ॡ औ[5]। इत्येते मन्त्रस्तोभवचनाः॥ आदिग्रहणात् कुं खुं गुं घुमित्यादयोऽपि भवन्ति॥

अहम्। शुभम्। कृतम्। पर्याप्तम्। येन। तेन। चिरेण। अन्तरेण। ते। मे। चिराय। अक्षाय[6]। चिरराचाय। चिरात्। अकस्मात्। चिरस्य। अन्योन्यस्य। मम। एकपदे। अद्ये। प्रगे[7]। प्राह्णे। हेतौ। राजौ। वेलायाम्। माचायाम्। इत्येतेऽहंप्रभृतयो यथाक्रमं प्रथमादिसुब्विभक्त्यन्तप्रतिरूपकाश्छन्दोवशाद् यथायथं न्यस्ताः[8]॥ ९॥

उत्तरपूर्वान्यतरा अपरान्यौ[9] चेतराधरावुभयः।
एद्युस्येते[10] ज्ञेया उभयद्युश्चापि विद्वद्भिः॥ १०॥

एद्युसन्ता एते चादयो भवन्ति। शेषं स्पष्टम्॥ १०॥

इत्थं तदानीं कथमः पुरस्तात्
सद्योऽधुनाद्येह परेद्यविष्काः।
पश्चादिदानीं परुतः परार्यै-
कध्यं सदा ह्युः पुरसः[11] सदं च॥ ११॥

सद्य इति तत्क्षणे। अमूत सद्यः कुसुमान्यशोकः[12]॥*॥ पश्चादिति

---

१ मन्यते A.; आ एवं मन्यसे। F.
२ वर्षति D.
३ ऐ पासं देहि A.; om. D.
४ औ ओ आवय F.
५ ए ऐ F.; लृ पे ऊ (? ओ) D.; ए उ (ओ ?) C.
६ चिराह्नाय F.
७ Om. A.
८ न्यस्ताः F.
९ A. om. अपर.
१० एद्युस एते F.
११ परायैकधासदा° C.
१२ Kum. S. 3, 26.

Digitized by Google

प्रतीचीचरमयोः[1]। पश्चादस्ताद्रिः। पश्चाद्याति ॥ * ॥ धुरिति वासरे ॥ तथा च[2] श्रीभोजः। धुर्दिनमिति[3] ॥ यथा। धुरङ्गो द्योतते कथम् ॥ गगनेऽप्ययम्[4]। असान्तमिति वररुचिः। नपुंसकमित्यन्ये[5] ॥ * ॥ सदमिति सदा। इत्यस्यार्थे। यथा। भुजंगमस्येव मणिः सदंभाः। सततप्रभ इत्यर्थः ॥ शेषं स्पष्टम् ॥ * ॥ पुरस्तादित्युपलक्षणम्। सूचनिपातिता अधोऽधस्तादित्यादयो ज्ञेयाः[6] ॥ ११ ॥

सुच्कृत्वस्चातस्चदाकाम्हिधैधाः
स्तादाद्येनातसाच्चिडाः स्युर्धमुञ्घाः[7]।
शस्वत्तुम्णम्क्त्वादयश्च प्रसाक्षाद्-
आद्यूर्यादिश्चाव्ययीभावयुक्तः[8] ॥ १२ ॥

तद्धितादिप्रत्ययाः[9] सुजादयश्चादिगणे भवन्ति ॥ सुच्। दिः करोति। चिः पचति ॥ * ॥ क्त्वस्[10]। पञ्चक्त्वोऽधीते ॥ * ॥ चा। देवचा कृतम्। देवचाकृत्य गतः ॥ * ॥ तस्। अतः। ततः। अन्ततः। कुतः। एते[11] पञ्चम्यर्थाः। पञ्चम्यर्थस्योपलक्षणम् ॥ अतः कारणोपदेशनिर्देशार्थाः[12]। अतो गुणात्सर्वजनः पूजयति। अतो गतः ॥ तत आदिकथान्तरप्रश्नानन्तर्येऽपि[13]। ततः प्रयातो भानुदत्तः। आदौ गत इत्यर्थः। ततः

---

१ प्रतिविंवरथोः C.; D. corr. प्रतीचीपृष्ठयोः.

२ तथापि A.

३ दुर्दिन° A.

४ °ऽयं गगने पि। D.

५ सांत इति वर° B. C.; असांत इति° इत्यन्यः F.; D. om. from असान्त°

६ Cf. Pâṇ. V. 3, 39–41, where पुरस्। अधस्। अवस्॥ पुरस्तात्। अधस्तात्। अवस्तात्। अवरस्तात्॥ are given.

७ °क्षाच्चिडाः° B. C. F.; °साच्चिडाचधमुञ्घाः A.; °च्चिडाचो धमुञ्घाः E. and D. a. m.

८ °चादाद्यूर्याभावयुक्तः। B.

९ अतद्धितादिप्रत्ययः D.

१० क्त्वसुच् C.

११ एते च B. C.

१२ कारणो° D.; कारणाप° C.

१३ °प्रश्नानंतर्येषु। B. C. F.

Digitized by Google

कथयति। ओदनं भुक्त्वा ततो मोदकान्भक्षयन्ति[1] ॥ अन्ततः शासनावयवे संभावनायां च ॥ किंचिदप्यधीष्व[2]। अन्ततः पूजां प्राप्स्यसि ॥ गुणवान्। अन्ततश्च मे दास्यसि ॥ कुतः प्रश्ननिश्चयोः[3]। कुत आगच्छसि। कुतो मे हिरण्यम् ॥ अर्जुनतोऽभवन्देवाः[4] ॥ उरसः। उरसैकदिक्[5] ॥ * ॥ च। यच। तत्र ॥ * ॥ दा। सर्वदा ॥ * ॥ काम्। किंतराम् ॥ * ॥ र्हि। एतर्हि ॥ तर्हीति विशेषेऽपि। बलवानर्जुनः[6] कृष्णस्तर्हि बलवत्तरः ॥ * ॥ धा। पञ्चधा ॥ * ॥ एधा[7]। द्वेधा ॥ * ॥ स्तात्। प्राग्ग्रामात्[8] ॥ * ॥ आहि। उत्तराहि ग्रामात् ॥ * ॥ एन[9]। पूर्वेण ग्रामम् ॥ * ॥ आत्। उत्तरादाग्रामस्य ॥ * ॥ सात्[10]। भस्मसात् स्यात्। भस्मसात्कृत्य ॥ * ॥ च्वि। शुक्लीभवति ॥ * ॥ डा[11]। पटपटाकरोति ॥ * ॥ धमुञ्। द्वैधं[12] वर्तते ॥ * ॥ था। इत्याकारप्रश्नेषो द्रष्टव्यः ॥ था। यथा ॥ * ॥ आ। दक्षिणा ग्रामात् ॥ * ॥ ग्रस्। अन्यग्रः। दिग्रो देहि ॥ * ॥ वत्। राजवत्[13] ॥ * ॥ तुम्। कर्तुम् ॥ * ॥ णम्। भोजं भोजं व्रजति[14]। चूर्णपेषं पिनष्टि ॥ * ॥ क्त्वा। कृत्वा ॥ तदादेशोऽपि स्त्वो[15] यास्यः। प्रकृत्य ॥ आदियहणात् केकेन्यतवैवेत्यादयो[16]ऽन्येऽपि द्रष्टव्याः ॥ * ॥ प्रसाद्यादादीति। आदिशब्दः प्रत्येकमभिसंबध्यते। तच्च प्रादिर्वक्ष्यमाणो

---

1 भक्षयति B. C.; भक्षयसि D.
2 अधीते C.
3 °निह्नुयोः C.
4 अर्जनतो भवान्देवः। D.
5 Om. D.
6 तर्हीति पूर्ववत्। विशेषणे बल° D.
7 एकधा F., and corr. D.
8 प्राक् ग्रामस्य D.; F. adds पुरस्तात् before प्राग्; cf. Pâṇ. v. 3, 30.
9 एनप् C.
10 क्षात् B. C. F.
11 डाच् A.; cf. Pâṇ. v. 4, 57.
12 द्विधं D.
13 C. adds पुत्रवत्; D. भानुवत्.
14 C. D. om. one भोजं.
15 त्वो A.; क्त्वप् F.; om. B. C.
16 केकेनत° A. B. C.; केकेनवैवेत्यादयो F.; कोकेतनवै° D.; cf. Pâṇ. iii. 4, 14.

Digitized by Google

विंशतिशब्दको[1] गणस्यादिसंज्ञो भवति । तचास्य प्रादिसंज्ञा धातुसंज्ञावत्तस्यैव नान्यच । चादिसंज्ञा[2] तु सर्वच स्वरूपनिबन्धना स्यात्[3] । यथा । साधुर्देवदत्तो मातरं प्रति । मातरमभीत्यादावेवं प्रयुक्तिः । एष कर्मप्रवचनीय इति पाणिनीये प्रसिद्धः[4] ॥ प्राचार्यः । निष्कौशाम्बिरित्यादौ नामसमासे गतिसंज्ञः[5] । कुगतिप्रादय एव[6] पाणिनीयवचनात् ॥ * ॥ साचादादिरपि वक्ष्यमाणो गणः । तस्य केवलस्यापि चादित्वम् । करोति साचाच्चैव इत्येवं प्रयोगः ॥ * ॥ ऊर्यादिरपि तथा ॥ * ॥ अव्ययीभावस्य चादित्वे तस्य प्रयोजनम् । उपपयस्कारः[7] । उपकुम्भमन्यः । अभ्यग्निमन्य[8] इत्यादौ स्वादेशमुमागमप्रतिषेध[9] इति वामनः ॥ शाकटायन;[10] पुनराह । अव्ययीभावस्याव्ययत्वे स्वल्पमेव प्रयोजनम् । दोषास्तु बहवः । तथा हि । उपकुम्भंमन्यम् । उपमणिकंमन्यमित्यच खित्यनव्ययस्येति[11] मुमतिषेधः[12] प्राप्नोति । यथा । दोषामन्यमहः । दिवामन्या रात्रिरिति । उपकुम्भीभूतमित्यच च्वौ चानव्ययस्येति । ईत्वप्रतिषेधस्य । यथा । दोषाभूतमहः । दिवाभूता रात्रिरिति ॥ उपाग्निकमित्यच कादिस्वाव्ययस्येति ॥ अक् च । यथा । उच्चकैः ॥ पाणिनिरपि स्वरादिगणात् पृथगव्ययीभावस्येत्यव्ययसंज्ञानिमित्तं सूत्रं[13] कुर्वन् सुप्विधिर्मुखस्वरोपचारनिषेधाविति चितयमेवाव्ययसंज्ञानिबन्धनं नान्यदिति प्रतिपादयति ॥ दुर्गस्तु ।

---

१ विंशतिगणो B.

२ प्रादिसंज्ञा तु संपूर्ण॰ दादिसंज्ञा C.

३ निबंधनात्स्यात् C.

४ Pân. i. 4, 83.

५ गतिसंज्ञः D.; om. A.

६ गति॰ A.; इति for एव F.; Pân. II. 2, 18.

७ उपपयःस्कारः B. C. F.

८ अत्यग्निमन्य B. D.; om. F.

९ स्वादेशमुमागम॰ C.; स्वादेशमागम॰ A. B.; सादेशमुमा॰ F.

१० Om. A.

११ ? द्वितो अनाव्य॰ D.; द्वितस्वानव्य॰ A. B. C. F.; cf. Pân. vi. 3, 67.

१२ मुमप्र॰ C.; मुमति॰ B.

१३ Pân. I. 1, 41.

Digitized by Google

अव्ययाच्चेति[1] लुकि सिद्धेऽन्यस्मादुगिति यदचनं[2] तज्ज्ञापयति। अव्ययीभावस्याव्ययत्वं नास्तीति ॥ १२ ॥

आस ब्रूहि नयाति पश्यतयुतौ यात्यादहौ वर्तते
स्यादातङ्कनवर्ततेभवतयो मन्येऽस्तु नास्त्यस्मयः।
आदङ्क्ष्यसि पूर्यते ऽस्तिभवतू शङ्के तथा विद्यते
पश्याहाविह कीर्तितौ मतिमता संख्ये[3] निपाताह्वये॥१३॥

तिङन्तप्रतिरूपका एते चादिसंज्ञा भवन्ति। निपाताव्ययसंज्ञास्तु[4] मतान्तरे ॥ आस। इति बभूवार्थे। लावण्य उत्पाद्य[5] दूवास यत्नः ॥ वामनस्तु। आस[6] दीप्त्यादानयोश्चेत्यस्य साधयति ॥ वल्लभस्य तु तिङन्तप्रतिरूपको निपात इति न संमतम्। तादृग्रूपस्यैव तिङन्तस्याभावात् ॥ * ॥ ब्रूहि। इति प्रेषानुज्ञावसरेषु। ब्रूहि ब्राह्मणाः[7] ॥ * ॥ न याति। इति न प्रकृत इत्यर्थे। इदं तु कर्तुं न याति ॥ * ॥ पश्यत। इति पूजास्वर्थयोः। पश्यत माणवको भुङ्क्ते। पश्यत शिष्टोऽपि विद्वान् ॥ * ॥ याति। इति प्रकृत इत्यर्थे। इदमेव कर्तुं याति ॥ * ॥ आदह। इति हिंसोपक्रमकुत्सनेषु। आदहारीन् पुरंदर[8]। आदह भक्तस्य भोजनाय। कुर्वादह यदि करिष्यसि ॥ * ॥ वर्तते। इति सोत्सुष्ठनाङ्गसंवरणे[9]। वृद्धास्तेन विचारणीयचरितास्तिष्ठन्तु ऊं[10] वर्तते ॥ * ॥ स्या-

---

१ अव्ययस्येव A., Kâtantra II. 4, 3 and 4.
२ यदाह F.
३ संघे E.; संखे D.
४ निपाताव्ययग्रह्यास्तु A.
५ लावण्यमुत्पाद्य A.
६ आस D.; Vâm. 5, 2, 29.
७ ब्राह्मण F.; D. om. this example.
८ आदहारात्° C.; आदहारीत् पुरदरः F.
९ सोत्सुठनाग° C.
१० विचारणाय च° C.; °चरितास्ति स्तं नु दं D.

Digitized by Google

दित्यनेकान्ते । स्यादादिनो[1] जैनाः । स्यान्न तत्स्यादपि स्यादिति[2] पचान्तरसंभावनादावपि ॥ * ॥ आतङ्क । इति कुत्साविनाशयोः । आतङ्कचोरं[3] दक्षिभवनाय ॥ प्रतियत्नेऽपि आकटायनः[4] ॥ * ॥ न वर्तते । इत्यमङ्गलप्रतिषेधे । समराभिमुखे पत्यावश्रुनिपातो[5] न वर्तते तस्याः ॥ * ॥ भवति । इति सत्तायाम् । भवति नाम तत्रभवान् वृषलं याजयिष्यति ॥ * ॥ मन्ये । इति वितर्के । मन्ये मार्तण्डतृष्णाभि पद्मान्युद्धर्तुमुत्सुकः ॥ * ॥ अस्तु । इति निषेधासूयास्वीकारयोः । अस्तु सान्वा[6] ॥ असूयापूर्वेऽस्वीकारे[7] । अस्तुकारः । एवमस्तु को नाम दोषः ॥ * ॥ नास्ति । इति सत्तानिषेधे । नास्तिवादशूरो[8] नास्तिकः ॥ * ॥ अस्ति । इत्यस्मदर्थानुवादे । अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः[9] ॥ अहमित्यर्थेऽपि[10] । उडुपेनास्मि सागरम् ॥ * ॥ आदङ्क । इत्यातङ्कवत् ॥ * ॥ एहि । इति प्रहासादौ[11] । एहि मन्ये रथेन यास्यसि । एहि न त्वया सह अस्थिष्यामि ॥ * ॥ असि । इति त्वमित्यर्थवाक्यालंकारयोः[12] । वेत्स्यसि पार्थिव त्वमसि[13] सत्यमभ्यधाः ॥ भोजस्तु युष्मदर्थानुवादे । यदप्युपन्यस्तमसि पार्थ मुरद्विषमिति[14] प्राह ॥ * ॥ पूर्यते । इति निषेधे । पूर्यते प्राणायामेन[15] ॥ * ॥ अस्ति । इत्यस्तृघनसत्तासु[16] । आस्तेयं

---

१ स्यादादनो B.

२ ? स्यान्न तत्स्यादपि स्यादिति । A.; स्यान्न तत्स्यादतिपि स्यादिति C.; स्यान्नतां स्यान्नतां स्यादपि स्यादिति D.

३ आतङ्कचार C.

४ प्रायं । D.

५ °अनुपाती F.; °निपाती C.

६ नाम्वा F.; नामा C.

७ A. adds च.

८ वादसूरो A. B. D.

९ Cf. Böhtl.-Roth, s.v. अभिनिवेश.

१० अहमित्यादपि F.; Ragh. 1, 2.

११ प्रसादौ B.

१२ अर्थवालालंका° A.; अर्थवांक्षलंकादयोः D.

१३ पार्थिवस्त्वमसि A.B.C.D.; Vâm. 5, 2, 82.

१४ Śiś. 15,14 त्वमिह पार्थ मुरद्विषं ed.

१५ प्रणामेन B. C. F. and orig. D.

१६ ?? इत्यसृग्घन° B.D.F.; °मृग्घन° C.; °सृग्धन° ? A.; °सत्तासु D. [a. अस्ति = अस्ति (? based on wrong reading आस्तेयं for आस्तेयं); b. धने in अस्तिमत्].

Digitized by Google

चर्मभाजनम्[1]। अस्ति परलोके मतिरस्येत्यास्तिकः[2] ॥ * ॥ भवतु। इत्यस्तुवत् ॥ * ॥ अङ्के। इति वितर्के। अङ्के अग्राङ्कोऽयम् ॥ * ॥ विद्यते। इति भवत्यर्थे ॥ * ॥ पश्य। इति पश्यतवत् ॥ * ॥ आह। इत्युवाचार्थे। अथाह वर्णी विदितो महेश्वरः[3] ॥

एते चोच्चावचेष्वर्थेषु निपतन्तीति निपाताः[4]। तच्च।

केऽप्येषां द्योतकाः केऽपि[5] वाचकाः केऽप्यनर्थकाः।
आगमा इव केऽपि स्युः संभूयार्थस्य साधकाः ॥

तच्च द्योतकास्त्वाहाहैवादयः। वाचकाः अस्मत् क्वचित्[6] प्राङ्मे प्रग इत्यादयः। अनर्थकाः कमीमिदित्यादयः। संभूयार्थस्य साधका न ह वै[7] न खलु मास्मेत्यादयः ॥ १३ ॥

स्वः सायं समया दिवा पुनरदः कामं प्रकामं बहिर्-
दोषाह्नो निकषान्तरासनुतरो नक्तं नमोभूयसः।
अन्तः प्रातरसांप्रतं परमृते साक्षात् सनत् साचयः
सत्यं मङ्कु विहायसाशु सहसा प्रायः स्वयं संवतः ॥ १४ ॥

स्वरिति स्वर्गपरलोकयोः। स्वः सुखयति। एहि जाये स्वरारोहाव। स्वः संजानीते। स्वः स्पृहयति। स्वरागच्छति। छायेव या स्वर्जलधेर्जलेषु[8]। स्वर्वसतीति। स्वर्यातस्य स्वपुचस्य ॥ आदित्यग्रमणोरित्येके ॥ * ॥ सायं दिनावसाने। सायं संयमिनस्तस्य महर्षेर्महिषीसखः[9] ॥ * ॥ समया। इति समीपमध्ययोः। त्वां समयास्ते। ग्रामं

---

१ ?; धर्मभाजनं A.; चर्मभ्वजनं B.C.; चर्मवाजनमस्ति। D.
२ मतिस्त्वास्तिकः A. F.
३ Kum. S. 5, 65.
४ Yâska N. 1, 4; B. C. F. om. तच्च.
५ केचिद् B. C. F.
६ क्वचित् D.
७ सार्थकाः॰ A.; ॰न हे वै D.
८ Śiśup. 3, 35.
९ Raghuv. 1, 48.

Digitized by Google

समयास्ते। यामसध्य इत्यर्थः॥ आदित्यापरोक्षयोरित्येके[1]॥*॥ दिवा। इति दिनार्थे। दिवाकरः॥*॥ पुनरिति भूयोऽर्थविशेषयोः[2]। पुनरुक्तं वचः। किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा॥*॥ अरमिति शैघ्र्ये। अरं पचति[3]॥*॥ काममिति स्वाच्छन्द्येऽनिच्छाङ्गीकारे[4] च। कामं भुङ्क्ते। कामं चाम्यतु यः क्षमी॥*॥ प्रकाममित्यतिशये। प्रकाममप्रीयत यज्वनां प्रियः[5]॥*॥ बहिरित्यन्तःप्रत्यनीके। बहिर्विकारं प्रकृतेः पृथग्विदुः[6]॥*॥ दोषा। इति रात्रौ। दोषामन्यसद्मः॥*॥ श्वः। इत्यतीतेऽह्नि। श्वस्तनः॥*॥ निकषा। इति समीपे। विलङ्घ्य खड्गां निकषा हनिष्यति[7]॥*॥ अन्तरा। इति मध्यविनार्थयोः। अन्तरा त्वां च मां च[8] कमण्डलुः। त्वामन्तरा तामरसायताक्षि॥*॥ सनुतरित्यन्तर्धाने। सनुतस्तोरो गच्छति॥ हिंसानुबन्धपूर्वाक्षेषु शाकटायनः॥*॥ नक्तमिति रात्रौ। नक्तंचरः॥*॥ नमः। इति पूजायाम्। नमोऽस्तु वर्धमानाय॥*॥ भूयः। इति पुनरर्थे। भूयः पचति॥*॥ अन्तरिति मध्ये। अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ[9]॥*॥ प्रातरिति प्रत्यूषे। प्रातरेव समुत्थाय॥ अस्तनेऽपि॥*॥ अषांप्रतमित्यन्याय्ये। संप्रत्यषांप्रतं वक्तुमुक्ते मुखरपाणिना[10]। विषद्दचोऽपि संवर्ध्य स्वयं क्षेप्तुमषांप्रतम्[11]॥ युक्ते षांप्रतमित्यमरसिंहः[12]॥*॥ परमिति किंवर्थे। गुणवानसि[13] परमहंकारी॥*॥ ऋते। इति वर्जने।

---

१ आदित्यापरो° F.
२ °विशेषयोः° D.; भूयोविशेषयोः B. C. F.
३ पतति F. and C.
४ °निस्वांगीकारे B.
५ Śiśup. 1, 17.
६ Śiśup. 1, 33.
७ Śiśup. 1, 68.
८ त्वां मां च F.
९ Megh. 3.
१० वक्तुमुक्ते° D.; वक्तुं युक्ते° C.; °मुखर° A. D.
११ Kum. S. 2, 55.
१२ D. F. om. from युक्ते iii. 5, 11.
१३ गुणावानपि A.

Digitized by Google

ऋते ज्ञानान्न हि मोक्षपूतम्[1] ॥ * ॥ साचादिति प्रत्यक्षचतुरयोः । साक्षाद्द्रष्टा साक्षी । दृशं साक्षात्करोति ॥ * ॥ सनदिति नित्ये । सनत्कुमारः ॥ मान्तं तु नुतिपरिक्षणचिरंतनहिंसाकथननिर्भर्त्सनेषु[2] प्राकटायनः ॥ * ॥ साचि । इति तिर्यगर्थे । साचि स्रोचनयुगं नमयन्ती[3] ॥ * ॥ सत्यमिति प्रश्नप्रतिषेधसत्येषु[4] । सत्यं करोषि ॥ ननु किमर्थमिदम् । सत्यम्[5] ॥ सत्यं हारि नितम्बिनीकुचयुगं सत्यं मनोज्ञाः स्त्रियः ॥ * ॥ मङ्कु । इति शैघ्र्ये । मङ्कूदपाति परितः पटच्चरस्रोनाम्[6] ॥ * ॥ विहायसा । इति वियदर्थे । विहायसा रम्यतमं[7] विभाति ॥ * ॥ आशु । इति शैघ्र्ये । आशुपेहि मम सौधुभाजनात्[8] ॥ * ॥ सहसा । इत्याकस्मिकाविमर्शयोः[9] । दिवः प्रसूतं[10] सहसा पपात । सहसा विदधीत न क्रियामविवेकः परमापदां पदम्[11] ॥ * ॥ प्रायः । इति बाहुल्ये । प्रायः स इह नेष्यति[12] ॥ * ॥ स्वयमित्यात्मनेत्यर्थे । स्वयं प्रदुग्धेऽस्य वसूनि मेदिनी ॥ चक्रे स्वात्मानमित्यर्थे[13] ॥ * ॥ संवदिति वर्षे । संवत्सरः । संवत्सृतीये ॥ १४ ॥

उच्चैर्नीचैरवश्यंसपदि बलवतः प्रादुराविःपुरस्तात्-
तूष्णींजोषं निकामं युगपदनिशमः[14] साम्यभीक्ष्णंस-
नोषाः ।

---

1 Kum. S. 1, 52.

2 ?मातन्तु तिनुपरि° A.; मांतमिति तु परि° D.; मांतं तु नतिपरि° F.; निर्भर्त्सनेष्विति A. D.; Prof. Aufrecht would refer these meanings to some other word.

3 Kirât. 9, 44.

4 प्रश्ननिषेध° F.

5 Om. D.

6 Śiśup. 5, 37.

7 रम्यतरं F.

8 शीधु° B. F.; साधु° C.

9 °आकस्मिकवि° C.

10 प्रभूतं C.

11 Kirât. 2, 30; Böhtl. Sp. 6970.

12 सह नेष्यति A.

13 F. adds ऽपि; D. om. from चक्रे°.

14 युगपदनिशः C.

Digitized by Google

रोदस्योंभूर्भुवस् कंरुटितिपुरतसो ऽतीवसुष्ठुप्रसभ-
द्राक्साग्मिथ्यावृथाशंकुमिथुनमृधको ऽञ्जाऽञ्जसा-
ऽवोमनाकः[1] ॥ १५ ॥

उच्चैः । नीचैरिति महदल्पयोः । उत्कृष्टनिकृष्टयोरिति शाकटायनः । किं पुनर्यत्नयोच्चैः[2] । नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण[2] ॥ * ॥ अवश्यमिति निश्चये । अवश्यं यातारश्चिरतरमुषित्वापि विषयाः[3] ॥ * ॥ सपदि । इति वर्तमानतत्क्षणशीघ्रार्थेषु[4] । सपदि विपदो विदधेरमखनर्गलवृत्तयः[5] । सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या[6] । सपदि प्रदहत्युपेक्षितो ऽग्निः ॥ * ॥ बलवदित्यतिशये[7] । बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः[8] ॥ * ॥ प्रादुरिति नामप्राकाश्ययोः[9] । विष्णोर्दश प्रादुर्भावाः । मत्स्यकूर्मादीनि दश नामानीत्यर्थः[10] ॥ प्रादुरासीत् ॥ * ॥ आविरिति प्राकाश्ये । आविर्भूतप्रथममुकुलाः कन्दलीस्वानुकच्छम्[11] ॥ * ॥ पुरस्तादित्यग्रत इत्यर्थे । रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्तात्[12] ॥ * ॥ तूष्णीमिति मौने । राजन् राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिता;[13] ॥ * ॥ जोषमिति सुखमौनयोः । जोषमास्ते जितेन्द्रियः । जोषमास्स्व[14] ॥ व्योषमिति[15] शाकटायनः ॥ * ॥ निकाममित्यतिशये । निकामं चामाक्षी ॥ * ॥ युगपदित्येककालार्थे ।

---

१ मिथुनमृधगञ्जांव° F.
२ Megh. 17 and 106.
३ Bhartṛih. 3, 13.
४ वर्तमानक्षण° F.; °शीघ्रार्थे A.; इति तत्क्षणशीघ्रार्थयोः D.
५ °वेक्षस्व [न supplied] गंखवृत्तयः A.; D. om. this example.
६ Kum. S. 3, 76.
७ इति सुष्ठ्वर्थे C.
८ °अप्रत्ययचेतः A.; Śakunt. 2.
९ °प्रकाश्ययोः A. B.
१० मत्स्यकूर्मादीनीत्यर्थः C.
११ Megh. 22.
१२ Megh. 15.
१३ Aufr. Śârng. P. sub *Handmat*; Khaṇḍaprasasti (Paṇḍ. vi.) śl. 119.
१४ जोषमास्ते C.; जोषमास Kshîr.
१५ स्वोषमिति A.; ह्योषमिति D.

Digitized by Google

तदल्पुना युगपदुन्मिषितेन तावत्[1] ॥ क्रियासमभिहारेऽपि ॥ * ॥ अनिशमिति सातत्ये । यच्चानिशं[2] कीर्त्यते ॥ * ॥ सामि । इत्यर्धकृत्स्नयोः । सामिसंमीलिताक्षी[3]। सामिहृतमहृतं स्यात् ॥ * ॥ अभीक्ष्णमिति पौनःपुन्यसातत्ययोः । अभीक्ष्णमाख्यातयतीव कुम्भम्[4]। अभीक्ष्णं वक्ति ॥ नित्यमिति । सदा सदिति । अजस्रं संततमिति[5] सातत्ये कश्चिदाह ॥ * ॥ सना । इति नित्ये । एष धर्मः सनातनः ॥[6] तात्स्थमपि ॥ * ॥ उषा । इति रात्रौ । उषातनो वायुः ॥ * ॥ रोदसी । इति द्यावापृथिव्यर्थे । द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च[7] ॥ * ॥ ओमिति ब्रह्मवाचि । ओमित्येकाक्षरं ब्रह्म ॥ * ॥ भूर्भुवः । इति पृथिव्यन्तरिक्षयोः । भूर्लोको भुवर्लोकः ॥ भुवस्तु महाव्याहृतेरिति[8] रेफो भवति ॥ * ॥ कमिति वारिमूर्धसुखनिन्द्याव्योमसु[9]। कंजं पद्मम् । कंजाः केशाः । कंयुः । कंदर्पः । कंगामिनः खगाः ॥ * ॥ झटिति । इति शैघ्र्ये । आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः[10] ॥ झगितीत्यपि[11] केचित् ॥ तरसोद्दितासजसेञ्चिति[12] सञ्ज्ञात् तरसापि ॥ तूर्णं द्रुतं चिप्रं शीघ्रं सञ्चिति क्रियाविशेषणम्[13] ॥ * ॥ पुरतः । इत्यग्रत इत्यर्थे । नीरसतरुरिह विलसति[14] पुरतः ॥ * ॥ अतीव । इत्यतिशये । अतीव शोभते ॥ * ॥ सुष्ठु । इति प्रशंसानिर्भरयोः । सुष्ठूक्तम् । सुष्ठु

---

1 Ragh. 5, 68.

2 यस्माऽनिशं F.

3 Kshir. adds अगौ. He has both examples.

4 Thus MSS.; °तोभकुम्भं Kshir.

5 नित्यं नित्यदासदित्यजस्रं संततमिति B.; नित्यदासदित्यजस्रं° D.

6 Man. 4, 138; Böhtl. Sp. 6732; °सांतमपि A.; तातमपि C.

7 Cf. Hemach. Abhidh. 938.

8 Cf. Pâṇ. viii. 2, 71.

9 मुख for सुख B. D.; D. om. व्योम.

10 Ratnâv. p. 291, 6; Böhtl. Sp. 3026.

11 झगित्यपि F.

12 ?°जसेञ्चिति B.; °सोद्दितासजसेञ्चिति C.; तरसेर्द्रुता जसेञ्चिति°A.

13 A. om. from तूर्णं. Probably a gloss from Kshîrasv. on A. K. iii. 5, 2.

14 निवसति B. C.

Digitized by Google

विभाति ॥ * ॥ प्रसह्य । इति शीघ्रार्थे हठार्थे च । प्रसह्य सिंहः किल तां चकर्ष[1] । प्रसह्य वित्तानि हरन्ति चौराः ॥ * ॥ द्राक् । झागिति[2] शैघ्र्ये । द्राग्विद्रुतं कातरैः । झाक्[3] सरन्त्यभिसारिकाः ॥ * ॥ मिथ्या । इत्यप्रत्ये[4] । मिथ्यावादिनि दूति ॥ अनव्ययोऽपि । यथा । निर्मिथ्यः[5] ॥ * ॥ वृथा । इति विफलाविधोः । प्रयुक्तमप्यस्तमितो वृथा स्यात्[6] । प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्[7] ॥ * ॥ श्रमिति दुःखोपशमे । शंकरः । शंभुः[8] ॥ * ॥ कु । इति कुत्सेषदर्थयोः । ग्राम्यं कापथघट्टनम्[9] । पयः पूर्वे सनिःश्वासं[10] कवोष्णमुपभुञ्जते ॥ पापार्थेऽपि ॥ * ॥ मिथुनमिति द्वौ द्वावित्यर्थे । मिथुनं रमन्ते[11] ॥ * ॥ झधगिति सत्ये । झधम्वदन्ति विद्वांसः ॥ वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये[12] ॥ * ॥ श्रद्धा । इति स्फुटार्थावधारणयोः ॥ आराधितोऽद्धा मनुरप्यरोभिः[13] ॥ सत्यतिशययोरित्येके[14] ॥ * ॥ अञ्जसा । इति तत्त्वशीघ्रार्थयोः[15] । वत्साञ्जसा मुनीश्वरः । सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव[16] ॥ * ॥ अवः[17] । इति बहिरित्यर्थे । अवो[17] गच्छति ॥ * ॥ मनागिति स्तोके । यस्मिन्मनागपि नवानुजपचगौरी[18] ॥ १५ ॥

---

१ Raghuv. 2, 27.
२ आगिति A. C. F.
३ आक् A. C. F.; आक् D.
४ D. F. add: भिथ्या पृथ्वीश्वर न कथयात्येव विद्वेषिषेवं [°षेव: D.].
५ अन(च suppl.)योपि यथा । निर्मंथ्यः । A.; अनयोपि । यथा निर्मिथ्या । B. C.; D. om. from अनव्ययो.
६ Raghuv. 2, 34.
७ Man. 8, 159.
८ शंचुः A.
९ ग्राम्ये कापथघट्टने C.; ग्राम्यकापथ° F.
१० पूर्वमनिः° B. D.; cf. Ragh. 1, 67.
११ रमते B. F.; न रमते C.
१२ वियोगसीमीप्य° D.
१३ Śiśup. 3, 42.
१४ ? मध्याऽतिशययोरपि F.; भव्याति° (orig. भव्यति°) C. D.
१५ तत्वदीर्घयोः C.
१६ व्यंजयत्यंजसैव B. F.; व्यंजसैव C. B. C. F. add स्त्रीलिङ्गो (चिलिङ्गो C.) ऽयं यथा समञ्जसमिति ।
१७ अध इति° अधो D.
१८ तवानुज° B. C. F.; °गौरीं A.

Digitized by Google

मिथुर्मिथो विष्वगुपांशु ताजग्-
मनश्चनः[1] प्रेत्य मिथः शनैसः[2]।
मुधाऽन्वगीषच्चिरमो मृषास्तं-
धिगानुषक् स्वस्ति पुरोऽस्र[3]इड्डाः ॥ १६ ॥

मिथुरिति द्वौ द्वावित्यर्थे[4]। मिथुर्मन्त्रयेते[5] ॥ उकारान्तमव्यय-
तार्थे[6] केचित् ॥ * ॥ मिथो। इति रहःसहार्थयोः। मन्त्रयन्ते मिथो ॥
विरहान्योन्यार्थयोरपि[7] ॥ * ॥ विष्वगिति समन्ततोभावे। कचाचितो
विष्वगिवागजो गजो[8] ॥ * ॥ उपांशु। इत्यप्रकाशोच्चारणरहस्ययोः।
जपतः सदा जपमुपांशु वदनमभितो विसारिभिः[9]। परिचेतुमुपांशु
धारणां कुशपूतं प्रवयास्तु विष्टरम्[10] ॥ कथमुपांशुवचः। उपचारा-
द्भविष्यति[11] ॥ * ॥ ताजगिति[12] ग्रैष्मे। ताजग् जरामृत्युरुजा जय-
न्ति[13] ॥ * ॥ मनः। इति नियमे। मनो वर्तते[14]। नियमो[15] वर्तत
इत्यर्थः ॥ * ॥ चनः। इत्यन्ननाम।[16] चनो दधिभ्व पयतोत सोमम् ॥
अद्धायामिति श्रीवसुक्रः[17] ॥ * ॥ प्रेत्य। इति भवान्तरे। अन्यो धर्म

---

१ तोजगमतश्चतः F.

२ ग्रनैर्मुधाः। किमन्वगी° D.E.

३ स्व A.; स्र B.

४ °इति द्वावित्यर्थे C.

५ मंचयंते B. D.; मंचयते F.; मं-
चायते तु C.

६ °अवृतार्थे C.; अववृतार्थे B.

७ विहीन्यो° C.

८ Kirât. 1, 36.

९ Kirât. 12, 8; D. has only उपांशु
जपति।

१० Raghuv. 8, 18.

११ उपांशुवधः A.; °उपांशुवचः° (!)
D. F.; B. C. om. from कथमु°.

१२ तोजगिति F.

१३ ? ताजकुंजरा° A.; ताजगत्जरा-
मृत्यु° B.; ताजकपचति। D.; तोजक्
पचति। तोजक् मृत्यु° F.

१४ मत इति° मतो वर्त्तते F.

१५ Thus MSS.; D. orig. नियमे.

१६ चनस्कृत्वंननाम B.; चनस्कृत्वे।
ननाम C.; चतस्कृत्वा। ननामचतो° F.;
the example is Rgv. x. 116, 8.

१७ Thus A.; श्रीवयुक्तः B.; श्रावयुक्तः
C.; D. F. om. from अद्धा°.

Digitized by Google

प्रेत्यगतस्य भुङ्क्ते ॥ अमुचग्रब्दस्याप्यत्र पाठो द्रष्टव्यः[1] ॥ * ॥ मिथः । इति रहोऽन्योन्यार्थयोः । तथापि वाचालतया युनक्ति मां मिथस्त्वदाभाषणलोलुपं मनः[2] ॥ * ॥ अनैरिति क्रियामान्ये । अनैः[3] अनैर्दात्येव पादौ भूतानुकम्पया[4] ॥ * ॥ मुधा । इति निष्फले । प्रीतिकरण[5] इत्यन्ये । किं पौलोमि मुधा क्रुधा[6] मयि न तु स्वप्नेऽपि ते विप्रियम् ॥ * ॥ अन्वगित्यानुकूल्ये । अन्वगयौ मध्यमलोकपालः[7] ॥ * ॥ ईषदित्यल्पे । ईषत्पचति[8] ॥ अप्राप्ते च ॥ * ॥ चिरमिति कालविप्रकर्षे । किंचिन्नमुखो प्रियेण हसता बाला चिरं चुम्बिता[9] ॥ * ॥ मृषा । इत्यसत्ये । मृषा वदति दुर्जनः[10] ॥ मृषा प्रयत्नार्थे[11] इति केचित् ॥ * ॥ अस्तमिति ग्रैष्मविशेषाद्ग्रनयोः । अस्तं भास्वान्प्रयातः । धृतिरस्तमिता रतिश्च्युता[12] ॥ * ॥ धिगिति निन्दाभर्त्सनयोः । धिगिमां देहभृतामसारताम्[13] । धिक्तार्किकान् ॥ * ॥ आनुषगित्यानुपूर्व्ये[14] । आनुषक् प्रविशतीह बन्धुता[15] ॥ अनुमानेऽनुषगिति शाकटायनः ॥ आनुषदित्याकारं दकारं च केचित् ॥ * ॥ स्वस्ति । इति पुण्याशीःक्षेममङ्गलप्रत्यभिवादनेषु[16] । स्वस्त्यस्तु ते धार्मिक मत्प्रसादात् । स्वस्ति तेऽस्तु सततं सदा दृष्ट ।

---

१ Cf. Amarak. iii. 5, 8.

२ °लोलुभं° A. B. C.; Śiś. 1, 40.

३ F. om. अनैः.

४ पादौ° D.; भूतानामनु° F.

५ प्रातिकरण C.

६ क्षुधा D.

७ Raghuv. 2, 16.

८ ईषदित्यव्ययाद्धकारयोः । ईषत्पचति । ईषत्करः कटो [ईषत्कारः काय B.] भवता । B. C. F.

९ Amarûś. 77 [where स्वप्नागमसुखी°]. Cf. Śâhityad. p. 7, l. 6.

१० अर्जुनः D.

११ ? मृषा प्रयत्नार्थे B. C. F.; cf. Śây. on वृषाशुध् Rgv. i. 33, 6.

१२ Raghuv. 8, 65.

१३ Raghuv. 8, 50.

१४ अनुषक्° C. D.

१५ प्रविशतीति° D.; °बंधुता C.

१६ पुण्याशीरक्षेममंगलप्राशस्त्यप्रत्यभि° B.F.; पुण्याशताक्षममंगलप्राशस्त्य° C.

स्वस्त्यस्तु ते सौम्य चिराय जीव[1]। स्वस्ति श्रीकुसुमपुरात्। राज्ञा नमस्कृता विप्राः स्वस्तीत्येते प्रयुञ्जते ॥ * ॥ पुरः। इत्ययत इत्यर्थे। पुरःसरा धाभवतां यशोधनाः[2] ॥ * ॥ अवः। इति[3] प्रीप्रसांप्रतिकयोः। अव एव[4] गच्छति। अवरेवागच्छति[5]। अवस्ऊधस्अवसां[6] रो वेति रेफो विकल्पेन[7] ॥ * ॥ दद्धेति प्राकाश्ये। समिद्धमिद्धेश मही दधासि[8] ॥ सामीप्यस्मरणयोरपि ॥ १६ ॥

स्थाने वरं दुष्टु हिरुग् बलातः
प्रबाहुकं ज्योक् तिरसो मुहुःशू[9]।
युक्तं प्रशानार्यहलं क्षमाऽवाग्-
विनाश्च नाना पृथकौ सुदिश्च ॥ १७ ॥

स्थाने। इति युक्ते[10]। स्थाने वृता भूपतिभिः[11] परोक्षैः ॥ * ॥ वरमिति हीनोत्कर्षे। वरं विरोधोऽपि समं महात्मभिः ॥ * ॥ दुष्टु। इति छक्ष्यार्थे। दुष्टुवादी खलः ॥ * ॥ हिरुगिति वियोगहिंसावर्जनेषु। हिरुक्करोति ॥ हिरुक्कर्मणां[12] मोचः। कर्मवर्जनाद्[13] मोच इत्यर्थः ॥ * ॥ बलादिति हठार्थे। त्वङ्मात्रिरेव मुखरीकुरुते बलान्माम्[14]। आपथ्यस्तितपोबलस्यबलात्कारकचग्रहैः[15] ॥ * ॥ प्रबाहुकमिति सम-

---

१ Cf. Ragh. 14, 59 [प्रीतासि ते सौम्य°].

२ Kirâtârj. 1, 43.

३ अव° B. D.; अव° A.

४ अव एव B.D.; अव एव A.; अवरेव F.

५ अवरे° A.; अवरे B. D.

६ अवसू° B.; अवसू° A.; अवसधस° F.; cf. Pâṇ. 8, 2, 70.

७ B. C. F. add अमनसित्वन्ये [°अन्यः F.]।

८ ? समिद्धमद्देशमहो° B. C.; समिद्धमिद्धेसमहो ददासि A.; समिद्धमिद्धेसमहो दधीसि। F.

९ मुहुः ग्वः B. C. F.

१० इति अवसरे। D.

११ नृपतिभिः A.; Ragh. 7, 13.

१२ °कर्मणां thus A. B. C. F. and Kshîr.; °कर्मणा D.; cf. Hem. Abhidh. 1527 Schol.

१३ कर्मवचे D.

१४ B. C. om. this example.

१५ Raghuv. 10, 48.

Digitized by Google

क्षेत्रे। प्रवाऽकं गृह्णीयात्[1] ॥ ऊर्ध्वार्थे प्रवाऽः प्रवाऽक् चेति कैश्चित्यचते[2] ॥ * ॥ व्योगिति कालभूयस्त्वे[3]। व्योग् जीवामः। व्योकृत्य नृपतिं गतः[4] ॥ क्षीघ्रार्थे संप्रत्यर्थेऽपि ॥ * ॥ तिरः। दृत्यन्तर्धानतिर्यगर्थयोः। विश्वयोनिस्तिरो दधे[5]। तिरः काष्ठं[6] करोति ॥ अवज्ञायामपि। यथा।

तिरस्कार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोशयोः श्रियम्[7] ॥ * ॥

मुञ्जः। इति पौनःपुन्ये। दृढ मुञ्जर्मुदितैः कलभैरवः[8] ॥ मुञ्जर्मुञ्जर्मुञ्जति सा मृगाक्षी। इत्यादिलक्ष्यदर्शनान्मुञ्जर्मुञ्जरित्यपि[9] ॥ * ॥ ग्रुञ्। इति पूजायाम्। ग्रुञ् नाक्षीरमस्येति ग्रुनाक्षीरः[10] ॥ ग्रुञ् अश्नुते। अश्नुरः[11] ॥ क्षिप्रार्थेऽपि। ग्रुञ् क्षिप्रं नयत्यन्तरिक्ष इति वा। ग्रुनो वायुः[12] ॥ * ॥ युक्तमिति न्याय्ये। यथा वीराचार्याणाम्।

युक्तं सिताम्बराणां तुम्बग्रहणं कुटुम्बपरिहरणम्।
कथमन्यथा तरीतुं शक्यः संसारतोयनिधिः[13] ॥ * ॥

प्रधानमिति समानार्थे। प्रधान्देवदत्तो यज्ञदत्तेन ॥ * ॥ आर्यहलमिति बलात्कारे। आर्यहलं गृह्णाति[14] ॥ आर्येति प्रीतिवन्धे। हलमिति च

---

१ अग्नीयात् C.

२ Thus A.; ऊर्ध्वार्थे प्रवाऽकेति कैश्चित्° F. (always व); प्रवाऽप्रवाऽकेति° B.; अन्यार्थे प्रवाऽकमेवमुच्यते C.; ॥ प्रवाऽक्केति D.

३ कालभूयस्त्वाप्रश्नयोः A.; कालभूयस्त्वप्रश्नयोः F.

४ B. C. D. om. this example.

५ Kum. S. 2, 62.

६ कोष्ठं C.; om. D.

७ भ्रमरावलीढयो° F.; D. omits this example; Ragh. 3, 8.

८ Śiśup. 4, 60.

९ D. om. from मुञ्जर्मुञ्जर्मुञ्जति.

१० ग्रुनाग्नीरमस्येति ग्रुनाग्नीरः B.C.

११ अग्नुरः A. C.

१२ °अन्तरिक्षमिति° A.; ग्रुनो वायुः A. B.; D. om. from क्षिप्रार्थे. Nir. 9, 40.

१३ संसारतोयधिः F.

१४ गृह्णामि B. C. F.

Digitized by Google

प्रतिषेधविषादयोरिति[1] शाकटायनः ॥ * ॥ चमा । इति चान्तौ । भवान् चमा[2] ॥ * ॥ अर्वागित्यधरे[3]। वर्षात्योऽग्रादर्वाक्। अर्वाक्कालीनः ॥ * ॥ विना । इति वर्जने ।

तात नोदधिविनोऽनं प्रति त्वदिनाद्य वयमुत्सहामहे[4] ॥ * ॥ नाना । इत्यनेकविनार्थयोः[5]। नानाविधं[6] कृतकदेहभृतां समाजम् ॥ उभयार्थत्वमनेकार्थत्वान्न व्यतिरिच्यते। तेन[7] नानापक्षावमर्शः संशय इत्यभिहितम्[8] ॥ नाना नारीं निष्कला लोकयात्रा[9] ॥ * ॥ पृथगिति विनार्थे । बहिर्विकारं प्रकृतेः पृथग्विदुः[10] ॥ * ॥ सुदि । इति शुक्लपक्षे ॥ १७ ॥ * ॥

खरादीनां कारकशक्त्याश्रयसत्त्वाभिधायिनां स्वर्गन्ता खः स्यृहयतीत्यादौ यथायोगमुत्पन्नाया[11] द्वितीयादिविभक्तेर्लुक्। पञ्चकलः प्रकृतयस्तु विभक्त्यर्थप्रधानाः। स च विभक्त्यर्थः प्रातिपदिकार्थः[12] संपन्न इति प्रातिपदिकार्थे प्रथमैव भवति[13]। सापि संख्याविशेषाभावान्न[14] सर्वा किं तर्ह्येकवचनमेव तस्योत्सर्गत्वात्[15]। तथा चोक्तम्। एकवचनमुत्सर्गः करिष्यत इति[16]। एतन्नः संमतम् ॥ सुधाकरस्त्वाह[17]। अव्ययेभ्यस्तु

---

१ हलमिति षेधविवादयोरिति D.

२ भवान्। चमाकरोति A.; भवतः चमा D.; सहनं चमा। F. (? भवन् चमा)

३ °इत्यवरे B. C. F.

४ Śiśup. 14, 83 [विनाद्य eds.].

५ °नेको भयाविनार्थेषु। D.

६ नानाधिकं D.

७ D. om. from उभयार्थ°.

८ इत्यपि सिद्धं A.; om. D.; °पक्षावमर्शः° C.

९ Thus B. Kshîr. नाना नारी नि° A. D. F.; वानरी निष्प्रलोकयाचाः C.

१० Śiśup. 1, 33.

११ ग्रब्दा योगमुन्नीय D.

१२ सर्ववि° D.; प्रातिकार्थः C.

१३ प्रथमैवेति.

१४ °विशेषाविशेषाभावान्न F.

१५ तस्योत्सर्गिकत्वात् A.; तस्योत्सर्गत्वात् B.

१६ उत्सर्गतः C. D.; करिष्यति इति B. C.

१७ सुखाकर° A. F.; तथा चाह सुधाकरः (orig. सुधारः) D.; cf. śl. 120 comm. where सुखाकर MSS. exc. D. a. m.

Digitized by Google

निःसंख्येभ्योऽव्ययादाप्सुप इति[1] ज्ञापकादिभक्त्युत्पत्तिः ॥ अचाऽऽङः । का पुनरसौ[2]। अचैके तसिलादीनामदूरविप्रकर्षादानुगुण्याच्च[3] पञ्चम्यादय एवेत्याऽऽङः । तन्न । अभिहितः सोऽर्थोऽन्तर्भूतः[4] प्रातिपदिकार्थीभूत इति प्रथमैव निःसंख्येभ्योऽपि न्याय्या ॥ अपि च । ज्ञापकात्प्रयोजनस्य पदत्वादेः सिद्धये क्रमव्यतिक्रमे प्रयोजनाभावात् कपिञ्जलाधिकरणन्यायेन प्रथमैव युक्ता । न हि कपिञ्जलानालभेतेति पञ्चम्या आलभ्यन्ते किंतु चय एव[5]। न हिंस्याद्भूतानीति वचनात् । अचैवमिति न वाच्यं क्रमव्यतिक्रमे प्रयोजनाभावात्[6]। न ह्योदकान्तात्प्रियं प्रोथमनुब्रूयेदिति[7] द्वितीयाद्युदकान्तानुब्रूया श्यायसी। तदुक्तम् । प्रथम एव वा नियम्येत कारणादतिक्रमः[8] स्यादिति । प्रथमचिले बहुवचनं नियम्यत इत्यत्र सूचार्थः ॥ अतसोसैःशब्दादीनामधिकरणशक्तिप्राधान्येऽपि प्रथमा न्याय्येति मत्वा वृत्तिकारैः सपूर्वायाः प्रथमाया विभाषेत्यत्र[9] ग्राम उच्चैस्ते स्वम्। ग्राम उच्चैस्तव स्वमित्याद्युदाहृतम्[10]। यत्तु तत्रेत्यत्र तत्रेति सप्तम्यन्तं समस्यत इति अयादित्यग्रन्थः स[11] सप्तम्यर्थाभिधानसाधर्म्यादेवमुक्तः[12] । एवमन्तःशब्दात् स्वयंशब्दाच्च प्रथमैव न्याय्या ॥ एकवचनमुत्सर्गः[13] करिष्यत इत्युक्तम् । अर्थकथनं चैषां चादीनामुपलक्षणमात्रं[14] द्रष्टव्यम् । तथा चोक्तम् ।

---

१ Pâṇ. ii. 4, 82.

२ पुनर्वसौ° D.; पुनरसायचै° B.

३ तसिलादीनामविप्रकर्षाद्° A.

४ अभिहितस्यार्थे । अन्तर्भूतप्राति° A.; °ऽनुभूतः C.

५ A. om. एव.

६ C. om. from कपिञ्जलाधिकरण°.

७ न ह्या उदकान्तात्° A. B. C.; प्रांथमनु° D.; प्रांमथनु° A.; प्रोथमनु° C.; cf. Mahâbh. on Pâṇ. i. 4, 56.

८ नियम्येतः कारणादिति क्रमः B.C.

९ सपूर्वाया विभा° A.; °विभाषेत्यत्र B.; P. viii. 1, 26.

१० विभाषेत्यत्र ग्रामे उच्चैस्ते वः स्वमित्याद्यु° F.; cf. P. ii. 3, 46 Mahâbh.

११ Om. C.

१२ °सामर्थ्यादेवमुक्तः F.

१३ एवमुत्सर्गः F.; करिष्यती° A.B.C.

१४ स्वरादीनामुप° D.

Digitized by Google

निपातास्त्रोपसर्गाश्च धातवश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठश्लेषां[1] निदर्शनमिति ॥

आकृतिगणो चेमौ । तेनान्येऽपि लक्ष्यानुसारतोऽनुसर्तव्याः[2] ॥ * ॥

इति चादिस्वरादौ ॥ * ॥

कस्कायस्कुण्डसाद्यस्काः सहकौतस्कुता मताः ।
सद्यस्कालशुनस्कर्णावयस्कान्तश्च भास्करः ॥ १८ ॥

कस्क आदिरित्यनेन कस्क इत्यादिः[3] शब्दगणो निपात्यते ॥ किम् सु[4] । किमः कः[5] । रोरिति[6] विसर्जनीयः । वीप्सायां द्विर्वचनम् ॥ कःक इति तच्च पूर्वस्य विसर्जनीयस्य कस्क आदिरित्यनेन सिः[7] ॥ स च विसर्जनीयजिह्वामूलीयोपध्मानीयानां बाधकः । उदा० । कस्को ऽचेत्युक्तिभिः कौतस्कुतीभिर्व्यानशे खभूः[8] ॥ ननु कथं कः कोऽच भो इति नाटकादौ प्रयोगः । उच्यते । संधावित्यधिकारादवसानविषयो[9] विसर्जनीयोऽचेत्यदोषः ॥ अपरे पुनराहुः । रूढिविषयत्वान्निपातनानां[10] वीप्सायामेवैतत् सित्वम्[11] । अत एव । तिष्ठति कः को वा गच्छतीति वीप्साभावे सित्वं[12] संहितायामपि न कृतम्[13] । एवमिहापि वीप्साभावे क इति पदं पूर्वमन्तर्भूतसत्ताकं[14] प्रयुज्यते । ततः को

---

१ पाठाश्लेषां C.

२ ऽनुद्रष्टव्याः B. C.; °सारतो द्रष्टव्याश्च F.

३ इत्यादिना A.; कस्क आदिरित्यनेन कस्क आदिरित्यादिशब्द° F.

४ किम् B.; कम् सु C.

५ Pân. vii. 2, 103.

६ ससजुषोरुः F.

७ कस्कादिरित्य° F.; सः C. F. and corr. D.

८ खभूः F.; वधूः D.

९ °अधिकारादवग्रहेष्ववसान°D.; °विषये A. (orig. D.).

१० °निपातानां F.

११ सत्वं C.; सिद्धं D.

१२ सत्वं C. F. and corr. D.

१३ न तत्कृतं F.

१४ इति पूर्वपदसंभवेऽन्तर्भूत° F.

Digitized by Google

ऽचेति ॥ न च क्रमविवक्षायां वीप्सेति[1] संहितायां युक्तो जिक्रामूक्षीयः। कxको[2] ऽचेति ॥ * ॥ अयसः कुण्डम्। अयस्कुण्डम् ॥ * ॥ सद्यः क्रीणातीति क्विप्। सद्यस्क्रीः। तस्यापत्यमिदं चेत्यण्[3]। एरितीकारलोपः[4]। ञ्नित्यक्कारेञित्यनेनारैच्[5]। तदा विवक्षितार्थाभिधायी। यदा तु सद्यः क्रीयते क्रयणं वा सद्यस्क्रीस् तच्चभवस्तदा साद्यस्क्रः[6] क्रतुः ॥ अपरे[7] सद्यः क्रियत इति साद्यस्क्रः क्रतुः। तेषां करोतेः स्वादिभ्यः क इति कप्रत्ययः[8]। प्रज्ञादिस्वणस्वाण् ॥ * ॥ सहकौतस्कुता इति। सह कौतस्कुतेन। सहकौतस्कुताः[9] ॥ सहस्य बहुव्रीहेः स इत्यनेन[10] विभाषितः सः ॥ किमः पञ्चम्या बहुव्रीह्यादिसर्वादिभ्य[11] इत्यादिना तस्प्रत्यये[12] वीप्साभीक्ष्ण्येत्यादिना द्विरुक्तिः[13]। ततः कुतः कुत आगत इति विवक्षायामण्[14]। तच सौ वादेरित्यन्ताजादिलोपः[15]। कौतस्कुती[16] ॥ नन्वत्र तत आगत इत्यनेन पञ्चम्यन्तादुच्यमानः प्रत्ययः[17] कथं तसन्तात् स्यात्। अथ तदर्थवृत्तेरपि समुदायात्समुत्पत्तावपि भविष्य-

---

१ C. om. from संहितायामपि न छतं.

२ कx्को B.C.; कः को D.; कस्को A.F.

३ चेत्यण् F.; cf. Pâṇ. iv. 1, 92.

४ परिती° A. B. C.; यस्येति चेतीत्वार° D.; cf. P. vi. 4, 148.

५ ञ्नित्य° A.; ञ्नित्यचेसंविञित्यनेनारिभू C.; तञ्जितेष्वचामादेरिति वृद्धिः F.; आदिवृद्धिः D.; cf. P. vii. 2, 115.

६ तच्चभवतः° A.; तच्चभवः° D.; °साद्यस्क्रीः C.

७ अपरे पुनराहुः। F.

८ स्वादिभ्य इति° A.; कः प्रत्ययः B. C. D.; cf. Pâṇ. iii. 1, 136.

९ सहकौतस्कुता B. C.

१० बहुव्रीही° F.; °सह इत्य° A.; स इत्यनेव° C.; cf. Pâṇ. vi. 3, 82.

११ बहुवादिसर्वाभ्य B. C.; बहुवद्यावदिसर्वादिभ्य A.; बहुादिस° F. and corr. D.; cf. Pâṇ. v. 3, 7.

१२ तत्प्रत्यये A.

१३ विभक्तिः D.; cf. Pâṇ. viii. 1, 4.

१४ आगच्छति° D.; विवक्षयामपि B. C.

१५ सौवादेरित्यंता° B.; सौवादिरि° C.; °इत्यजाजादि° A.

१६ कौतस्कुतः A.; कौतस्कुता C.; कौतस्कुती B.

१७ F. adds: उत्पद्यमान इत्यपि पाठः

तीति चेत् । न । क्रकुचेहामाचतसस्त्यबिति त्यपा[1] भवितव्यम् । कथमण् । गणपाठादिति ब्रूमः ॥ * ॥ सद्यस्काखेति समस्तमसमस्तं वा । उदा० । सद्यस्काखं युयुत्सुभिः ॥ * ॥ शुनः कर्णः । शुनस्कर्णः । सुक्प्रतिषेधोऽत एव पाठात्[2] ॥ उदा० । शुनस्कर्णोपमैर्मुक्ता मुष्टिभिश्चक्रपक्षयः[3] ॥ रत्नमतिस्तु शुनस्कर्ण इति वाक्यं[4] समासे तु श्वकर्ण इति प्राह ॥ * ॥ अयस आकर्षकः कान्तोऽयस्कान्तः । ननु[5] क्रकमीत्येव सिद्धः किमर्थोऽस्य पाठः । तस्यैव प्रपञ्चार्थः समस्तार्थः कन्यर्थो[6] वा ॥ उदा० । स चकर्ष परस्वं[7] तदयस्कान्त इवायसम् ॥ * ॥ भासं करोतीत्येवंशीलो विभादेरटि[8] । भास्करः ॥ * ॥ १८ ॥

मेदस्पिण्डतमस्काण्डायस्काण्डाहस्करास्तथा ।
रजःकर्णीरजस्कर्ण्यौ भ्रातुष्पुचदिवस्पती[9] ॥ १९ ॥

मेदसो वसायाः पिण्डो मेदस्पिण्डः ॥ * ॥ तमसः काण्डं तमस्काण्डम् ॥ प्रशस्तं वा तमः । तमस्काण्डम् ॥ उदा० । चपातमस्काण्डमलीमसं नभः[10] ॥ * ॥ अयसः काण्डम् अयस्काण्डम्[11] ॥ प्रशस्तमयो वा । अयस्काण्डम् ॥ * ॥ न जहाति न त्यजति[12] दिनकरमित्यहर्दिवा । तत्करोतीत्येवंशीलो[13] ऽहस्करः ॥ उदा० । अलंचकारास्य वधू-

---

१ क्रकुचेहामुचेतसस्त्यपि नित्यया A.; °त्यपि प्रत्ययो C.; °पिति त्यया B.; cf. Pâṇ. iv. 2, 104, Vârtt. 1.

२ प्रतिषेधात् B. C.; एव पात् D.

३ °क्रचपक्षयः F.

४ वाक्ये C. (? शुनः कर्णः).

५ नत्वतः C.; cf. Pâṇ. viii. 3, 46.

६ कन्यर्थो B.; कन्यार्था C.; कात्यर्थो F.

७ परस्वं A.; Ragh. 17, 63 (परस्वात् edd.).

८ विभातेरटि B.C.; cf. Pâṇ. iii. 2, 21.

९ मेदस्पिण्ड° हस्कारा° स्कर्णौ भ्रातुः पु° A.

१० Śiśup. 1, 38.

११ C. om. from प्रशस्तं.

१२ त्यजतीत्येवं A.

१३ तत्करोत्येवं A. D.

Digitized by Google

रश्चक्रुरः[1] ॥ * ॥ रजसः कर्णौ रजस्कर्णौ[2]। छकमीत्यादिना नित्यं स्यादेशे[3] प्राप्ते विकल्पार्थः पाठः ॥ * ॥ भ्रातुः पुत्रो भ्रातुष्पुत्रः। ऋतो विद्यायोनिसंबन्धाक्षेष्वित्यनेन[4] षष्ठीसमासे सुक्प्रतिषेधः ॥ * ॥ दिवः पतिः। दिवस्पतिः शक्रः। सुक्प्रतिषेधोऽत एव पाठात् ॥ * ॥ सर्पिष्कुण्डिका। धनुष्कपालम्। बर्हिष्कपालम्। यजुष्पात्रमित्येकेषां पाठ उत्तरपदस्थापि षत्वं यथा स्यादिति[5]। परमसर्पिःफलमित्येवमादिप्रत्युदाहरणं पाराशरिणिका आह्वः[6]। भाष्ये वृत्तौ नित्यं समासे ऽनुत्तरपदस्थस्येत्यत्र[7] परमसर्पिःकुण्डिकेत्येतदेव प्रत्युदाहरणम्[8]। अस्माकं चायमेव पक्षः संमतः ॥

आकृतिगणस्चायम्। तेनापरिगणितशब्दसमूहः। य आकृत्याकारेण[9] लक्ष्यते स आकृतिगणः। अयमर्थः। यथा भास्करादिशब्दः साधुः स्वार्थप्रत्ययने समर्थस्तद्वद्यो[10] ऽन्योऽपि सिविधानाक्षिप्तसंमतः स गणेऽस्मिन्प्रणिविष्टः[11] सन् साधुत्वभाग् द्रष्टव्य इति ॥ * ॥ १९ ॥ इति कस्कादिः ॥ * ॥

अहः पतौ गणे पुत्रे पतिपुत्रे च गीर्धुरः।
राज्ञि प्रचेतसो रः स्याद्[12] विसृष्टस्योषसो बुधे ॥ २० ॥

पत्याद्ये ऽहरादेर्वेत्यनेन[13] विकल्पेन रेफादेशो विधीयते ॥ उषसि

---

१ Śiśup. 1, 58.
२ रजस्कर्णौ A.
३ सादेशे A. C.
४ संबंधातेष्विति क्षनेन F.; Pāṇ. vi. 3, 23.
५ F. om. यथा.
६ °क्वाः प्राज्ञः F.
७ °पदस्थेत्यत्र F.; अनुत्तरपादस्थत्वत्र A.
८ C. om. from पाराशरिणिका.
९ यथा आकृत्या आकारेण B. C. F.
१० भास्करादिशब्दः साधुस्वार्थप्रत्ययेते समर्थस्तद्वद्यो D.
११ °प्रणिविष्टः B. D.; प्रतिविष्टः A. C.; प्रविष्टः F.
१२ प्रचेतसो ज्ञेया D. E.
१३ पत्याद्यहरादे° F.; D. corr. पत्यादिष्वहर°.

Digitized by Google

राची वुध्यते प्रकाश्यते । उषर्बुधः ॥ उषर्भुदित्यपि श्रीवसुक्रः[1] ॥ शेषं तु सुगमम् ॥ * ॥ २० ॥ इत्यहरादिपत्यादौ ॥

सर्वान्यविश्वोभयनेमयत्तदः किंयुष्मदस्मद्भिभवत्त्यदेतदः ।
उभत्वदन्योन्यपरस्परेतराः समः[2] सिमत्वान्यतरेतरेतराः ॥ २१ ॥

सर्वादेर्गणात् । ए । असि । ङ । इत्येतेषां स्थाने । सर्वादेरेभ्यः[3] स्मै । स्मात् । स्मिन् । इत्यनेन यथाक्रमं स्मै । इत्यादय आदेशा भवन्ति ॥ सर्व इति संख्याप्रकारकत्वावयवेषु कात्स्न्र्ये ॥ तच्च संख्याकात्स्न्र्ये । यथा । सर्व आयाता यावन्तो लिखिता दश द्वादश वा[4] त आयाताः । कात्स्न्र्येन समागता इत्यर्थः ॥ प्रकारकात्स्न्र्ये । यथा । सर्वाण्यन्नानि भुक्तानि । सर्वप्रकाराणीत्यर्थः ॥ कत्वावत्कात्स्न्र्ये । यथा । सर्व ओदनो भुक्तः । यो दत्त ओदनः स सकलो भुक्त इत्यर्थः ॥ सर्वस्मै । सर्वस्मात् । सर्वस्मिन् ॥ तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् परमसर्वस्मै । इत्यादावपि ॥ असर्वस्मै । इत्यादौ नञ्समासेऽपि स्वार्थापरित्यागात्[5] ॥ तथा हि । य एवान्यशब्देन वक्तुमिष्टः स एव जात्यादिविकल्पोऽनन्यशब्देनापि[6] ॥ विश्वादीनामप्येवम् । अतो न सर्वादित्वाघातः[7] ॥ यदा पुनरुपसर्जनीकृतस्वार्थानामर्थान्तरवृत्तित्वं तदा प्रियसर्वायेत्यादौ न स्यात् । एतच्च सर्वादेरिति षष्ठीनिर्देशान्निश्चीयते[8] ॥ * ॥ अन्यस्मै । अन्यत् । पृथ-

---

१ श्रीवसुक्रः A.; श्रावसुकः C. F.; D. om. from उषर्भुदि°.

२ सिमः A.

३ सर्वादेरस्यः B.; om. F.; सर्वादेरादेशाः स्युः C.

४ C. om. द्वादश.

५ नसमासे° F.; °सर्वापरि° D.

६ °विकल्पोत्वमन्य° A.; D. corr. ऽसर्वशब्दे°.

७ सर्वादित्वाघातः । A.

८ षष्ठीति निर्दे° C.

Digitized by Google

स्वचनो[1]ऽयम् ॥ * ॥ विश्वस्मिन् ॥ * ॥ उभयस्मिन् ॥ * ॥ नेम इति सर्वार्धार्धयोः[2]। नेमस्मिन् ॥ * ॥ यदिति निर्देशे। यस्मिन्। यतते प्रयत्नं करोति। तेनार्थमुद्देष्टुमिति व्युत्पत्त्या उद्देशेऽपि ॥ * ॥ तदिति परोक्षे। तस्मिन्। तनोति विस्तृणाति[3] प्रतिनिर्देशमिति[4] व्युत्पत्त्या निर्देशेऽपि वर्तते ॥ * ॥ किमिति प्रश्नचेपयोः[5]। पृच्छ्यते[6] श्नोप्स्यतेऽनेनेति किं प्रश्नवाची ॥ कस्मिन् ॥ * ॥ युष्मदिति प्रत्यक्षे। युष्यते सेव्यत उपचारवतीभिर्वाग्भिरिति। त्वकम् ॥ * ॥ अस्यते क्षिप्यते सत्कार इति। अहकम्[7] ॥ परात्मवाचिनौ युष्मदस्मच्छब्दौ ॥ * ॥ द्वकौ[8] ॥ * ॥ भवतुशब्दः[9] परोक्षे। भवकम्नः[10]। उदिच्च[11] च्छन्दोभङ्गभयात्नोपात्तः[12] ॥ * ॥ त्यस्मिन् ॥ * ॥ एतदिति प्रत्यक्षे। एतस्मिन्। एजति[13] कंपतेऽनेन वचसा सामीप्यवाचिना सत्वमिति व्युत्पत्त्या सामीप्येऽपि[14] ॥ * ॥ उभौ। उभाभ्यां हेतुभ्याम्। उभयोर्हेत्वोः। अस्य पाठः सर्वादेरवित्यनेन[15] सर्वविभक्त्यर्थः ॥ * ॥ त्वदिति समुच्चयवाचकः। त्वकत्[16] ॥ * ॥ अन्योन्यपरस्परशब्दौ क्रियाविनिमये। अन्योन्यस्मै। परस्परस्मै ॥ * ॥ इतरेति पृथगर्थे। इतरस्मिन् ॥ * ॥ समसिमशब्दौ

---

१ अन्वतः। पृषत्त्वचनो B. C. F.

२ सर्वार्धयोः A.; सर्वादीर्नयोः। D.; सर्वार्धार्थे C.

३ नीयाति। D.

४ निर्देशमि C.

५ प्रश्नाचेपयोः A.

६ क्वान्यते पृच्छ्यते F.; A. om. from पृच्छ्यते to प्रश्नवाची.

७ A. has only कस्मिन्। त्वकं। अहकं।

८ द्विकौ D.

९ भवच्छब्दः A. D.

१० भवंतः B.; भवतः C.; भवत्कम् D.

११ उदित्तु B. C. F.

१२ °न पठिताः A.; न छतः। D.

१३ एजते F.

१४ A. om. from एजति.

१५ सर्वादेरचित्व° D. a. m.; सर्वादेरदित्व° F.; C. om. from वचसा सा°.

१६ त्वति व्युत्पत्त्यासामीप्यवत् D.

Digitized by Google

सर्वार्थे। समस्मिन्। सिमस्मिन्॥ सिमः शक्तः। सितः[1]। अवबद्ध इत्यर्थ इत्येके। सिम इति मर्यादायामित्यपरे॥ * ॥ त्वान्यतरशब्दावन्यार्थे। त्वसौ। अन्यतरसौ। अस्य त्वसादेव गणपाठात्सिद्धिः॥ शाकटायनस्तु यत्तत्किमन्याद् द्वयोर्निर्धार्ये उतरः[2]। वैकाद्यकानां प्रश्ने उतमस्येति सूत्राभ्यां उतरउतमौ। अन्यतरान्यतमौ[3] सिद्धौ। ततोऽन्यतरशब्दस्य उतरात्प्रत्ययेनैव ग्रहणे सिद्धेऽन्यतरग्रहणमन्यतमव्यवच्छेदार्थमित्याह॥ * ॥ इतरेतरेति क्रियाविनिमये। इतरेतरसौ॥ २१॥

एकेदमदसो ज्ञेया डतरो डतमस्तथा।
स्वमज्ञातिधनेऽनात्मि कालदिग्देशवृत्तयः॥ २२॥
[पूर्वापरावरपरा उत्तरो दक्षिणाधरौ[4]।]

एकेति संख्यासहाययोः। एति गच्छति गणनामित्येकः[5]। एति गच्छत्यद्वितीय इति वा[6]। एकस्मिन्॥ * ॥ इदमिति प्रत्यये। अस्मिन्॥ * ॥ अदस्। इत्यप्रत्यये[7]। अमुस्मिन्॥ * ॥ उतरउतमौ प्रत्ययौ। तदन्तः सर्वादिर्भवति। यतरस्मिन्। यतमस्मिन्। ततरस्मिन्। ततमस्मिन्। कतरस्मिन्। कतमस्मिन्। एकतरस्मिन्। एकतमस्मिन्॥ * ॥ स्वमज्ञातिधन इति स्वशब्दोऽर्थचतुष्टयवृत्तिस्वचात्मनि ज्ञातिधनयोश्च रूढितः। अस्य वृत्तिः। यथा हरिशब्दस्य तुरङ्गवानरदर्दुरादिषु।

---

१ ? शक्तः सितः A.; शक्तः सितः F.; शक्तेः सितः B.; शक्तेः। C.; D. corr. °शक्तः। सिम अव°. ? सिमः = 1. शक्तः 2. सितः *i.e.* अवबद्धः; Sâyana records the meanings सर्वः, सर्वत्रगः, श्रेष्ठः, शत्रूणां बन्धकः; cf. also Mahîdh. V.S. 23,37.

२ यत्किम° D.; °किमन्याद्वयो निर्धार्ये° A. D.; cf. Pân. v. 3, 92-94.

३ A. om. अन्यतरान्यतमौ.

४ Conjectured to complete metre.

परावराधराः पूर्वदक्षिणावृत्ततापरौ। B. C. F.; पूर्वापरावरधरदक्षिणोत्तर इत्यमी। व्यवस्थायामसंज्ञायां ज्ञेयाः पूर्वादिकार्येण॥ D.; om. A. E.

५ पति धेनगास्त्रिकाखदि गच्छति। गणनामित्येकः D.; om. A.

६ एको गच्छति अद्वितीय° F.; om. A.

७ इति प्रत्यये B. C. F.; D. om. from अदस् to यतरस्मिन्.

Digitized by Google

आत्मीये तु सर्वत्र विशेषणरूपतया वृत्तिस्वाच्च सर्वनामसंज्ञा । स्वे पुत्राः । स्वेषां गृहाणां स्वामी । आत्मीयानामित्यर्थः ॥ स्वस्मै यज्ञमानः । आत्मन इत्यर्थः ॥ स्वे पुत्रा[1] इति न पुत्रा ज्ञातयः किंतु पितृव्यमातुलश्वशुरादयः सपरिच्छदाः । स्वे गाव इति न गावो धनं[2] किंतु रूक्मरजतकार्षापणरूपकादिकं[3] धनमुच्यते ॥ ज्ञातिधनयोस्तु न भवति । स्वे रक्षा विधेया । ज्ञाताविति यर्थः ॥ स्वाय स्पृहयति । धनायेत्यर्थः ॥ तथा ज्ञातिधनविशेषणत्वेऽपि स्वशब्दस्य निषेध एव । स्वा ज्ञातयश्चैवस्य[4] । स्वे धने रक्षा । आत्मीय इत्यर्थः ॥ अपरे तु स्वस्मै पुत्राय । स्वस्मै गव इति ज्ञातिधनार्थयोः प्रतीतौ कथं न निषेधः । उच्यते । पुत्रगोशब्दयोर्हि सान्निध्यादेतदुभयं गम्यते स्वशब्दात् स्वात्मीयत्वमात्रमिति । स्वाय[5] ज्ञातये । स्वाय धनायेत्यत्र च शब्दान्तरमनपेक्ष्य ज्ञातिधने स्वरूपेणैव स्वशब्देनाभिधीयेते[6] । यद्येवं ज्ञातिधनयोरनुप्रयोगोऽपि नोपपद्यते पर्यायत्वात्[7]। यथा वृक्षशब्दप्रयोगे तरुशब्दस्य । नैष दोषः । पर्यायशब्दो हि यत्रानेकार्थः संदिग्धार्थो वा तत्र तदर्थस्य व्यक्तीकरणार्थः[8] पर्यायान्तरस्यानुप्रयोगो[9] न विरुध्यते । यथाऽर्कादयनेकार्थवृत्तेर्हरिशब्दस्य प्रयोगे सिंहशब्दस्य । यथा च संदिग्धार्थस्य पिकशब्दस्य प्रयोगे[10] कोकिलशब्दस्य । स्वशब्दस्यायमनेकार्थ इति तत्रास्यानुप्रयोगे[11] किंविषयोऽयं प्रदेश इति संदेहः स्यात् । तन्निरासार्थो[12] युज्यते ज्ञातिशब्दस्यानुप्रयोग इति व्याचक्षते ॥ * ॥

---

१ स्वपुत्रा D.
२ स्वे माता इति न माता धनं D.
३ किंतु कनकरजत° F.
४ ज्ञातयश्चैतस्य D.
५ स्वायै D.
६ अभिधीयते A. B.
७ पर्यायशब्दत्वात् F.; om. C.
८ व्यक्तीकरणार्थपर्यायान्तर° B. C.
९ °नुपयोगो A.
१० यथा संदिग्धार्थस्य प्रयोगे A.
११ तत्रास्यप्रयोगे C.
१२ °निरार्थो A.

Digitized by Google

अनादि कालदिग्देशवृत्तय इति । पूर्वादयः शब्दा असंज्ञायां वर्तमाना दिगादिवृत्तयः[1] सर्वादिकार्यभाजो भवन्ति । तदुक्तं ।

पूर्वापरादिशब्दानां केषांचित् प्रविभागतः ।
सामान्येनाभिधानेऽपि प्रवृत्तिर्देशकालयोः ॥

तथा हि । पूर्वापरावरपरोत्तरशब्दा मुख्यवृत्त्या दिक्कालयोर्वर्तन्ते । तद्वच्छिष्टे देशग्रामारामक्षेत्रकुल्यादौ च । तथा हि । पूर्वस्यां दिशि वसति । पूर्वस्या दिशः आगतः । पूर्वदिक्संबन्धात्[2] पूर्वा वापी । पूर्वस्यां वाप्यां[3] शीतमुदकम् । तथा पूर्वस्मिन्ग्रामे वने देशे वा सुखवासः[4] ॥ पूर्वः कालो[5] रम्यः । पूर्वकालसंबन्धात् पूर्वो[6] गुरुः । पूर्वस्मिन्गुरौ वसति । पूर्वस्मात्प्रासादादागतः[7] ॥ * ॥ अपरावरपरशब्दत्रयस्य विनापि दिक्कालसंबन्धं देशवृत्तित्वं[8] स्यात् । तथा हि । अपरदेशसंबन्धादपरो[9] ग्रामः । अवरो वा ॥ तस्मिन् परस्मिन् पर्वते वसति । सति संनिकर्षे विप्रकर्षे च सर्वासु दिक्षु तुल्योऽयं व्यपदेशः । ततो न दिगभिसंबन्धवृत्तिः । एकस्यामेव दिशि स्थितयोर्निकटानिकटयोः परावरादिव्यपदेशप्रवृत्तेरेतच्छब्दत्रयापेक्षया[10] मुख्यवृत्त्या सार्थकं देशग्रहणं न त्वन्यस्य[11] ततो देशवृत्तित्वम् । संनिकर्षासंनिकर्षयोर्देशवत्कालो[12] ऽप्युपाश्रयः[13] । ततः परः कालः[14] । अपरोऽवरो वा । परस्मिन्

---

१ °वृत्तय इति A.
२ सर्वेदिक्° A.
३ वाप्यां C.; वा D.; om. B.
४ देशे वासः C.
५ पूर्वकालो C. F.; पूर्वकाले B.
६ पूर्वको C.
७ °प्रसादादा° C.
८ °संबंधदेश° B. C.
९ अपदेशे सं° D.
१० °प्रवृत्तेरेव शब्द° D.
११ सार्थकदेशग्रहणं न त्वस्य F.
१२ °वृत्तित्वं सन्निकर्षयोर्दे° C.
१३ ष्यपाश्रयः D.; कालोपुपाश्रयः B.
१४ परकालः B. C. F.

Digitized by Google

काले जातः । अपरस्मिन् । अवरस्मिन् वा[1] ॥ अथ परकालसंबन्धात् परः श्रीहर्षः । अपरकालसंबन्धादपरो भोजदेवः ॥ परः पाणिनिः । अपरः शिवस्वामी[2] ॥ परस्मिञ्श्रीहर्षे भक्त इत्यादि[3] ॥ * ॥ दक्षिणाधरशब्दौ दिशि[4] दिगवच्छिन्ने च कालशब्दौ वर्तेते[5] न तु काले नापि कालावच्छिन्ने । दक्षिणस्यां दिशि वसति । दक्षिणस्मिन्पर्वते देशे वा तदवच्छिन्ने । तथा हि । अधरस्यां दिशि पर्वतादसति । अधरदिक्संबन्धादधरस्मिन्प्रासादे[6] देशे वा वसति ॥ अनाक्षीति किम् । उत्तराः कुरवः । संज्ञारूपेण रूढो[7]ऽयोत्तरशब्दः । विदेहवर्षवासिनामेकस्यामेव[8] दिशि देवकुरूत्तरवर्षे ॥ दिग्देशकालेभ्योऽन्यच[9] । दक्षिणा गाथकाः । प्रवीणा इत्यर्थः ॥ एवम् अधरे ताम्बूलरागः । उत्तरे प्रत्युत्तरे वा भक्तः ॥ दक्षिणायां कृतमतिर्विप्रः । इत्यादिदिग्देशकालवृत्तय[10] इति विस्पष्टो[11]ऽयमर्थनिर्देशः ॥ ननु व्यवस्थायामसंज्ञायामित्येवमुपक्षिप्य स्वाभिधेयापेक्षो[12]ऽवधिनियमो[13] व्यवस्थेति यथान्यैर्व्याख्याता[14]। दुरवबोधत्वात्[15] ॥ ननु। स्वेषां चैव परेषां च[16] जायन्ते कल्पसंपदः । क्षीणाः परे[17] प्रचवः । इत्याऽऽरपरे । इत्यादिप्रयो-

---

१ °वा परस्मिन् परस्मिन् काले जातः° B.; °वास्मिन् परस्मिन् काले° C.; °वा परस्मिन् अपरस्मिन् काले जातः । अपरस्मिन् वा । A.

२ अवरः D. and corr. क्षीरस्वामी ।

३ अपरस्मिन्° B. C. D.; °हर्षभक्त° A. B.; °हर्षसक्त° C.; °हर्षे भक्त° D.; °इत्यादिः B. C.

४ हि दिशि F.; दिश B.

५ वर्तेते B. C.

६ °अवरस्मिन्° A.

७ संज्ञारूपेणारूधो F.

८ °वर्षावा° C.; °वासिनामेव B.

९ ऽन्यश्च C.

१० इत्यादिदिग्° B. C. F.; इत्यादिग्° D.

११ इति स्पष्टो B. C. F.

१२ स्वाधिभिधे° B.

१३ °धेयापेक्षाविधिनियमो F.

१४ व्याख्यातः A. B. C.

१५ दुरवरोधत्वात् A.

१६ वा A.; चैव D.

१७ क्षीणापरे B. C.

Digitized by Google

गेषु कथं जसादीनां सर्वादिकार्यविधिः । न चात्र दिग्देशाद्यवच्छेदो ऽस्तीति[1]। उच्यते । साहचर्योपचाराच्छिष्टाभीष्टेषु न[2] दुष्टता ॥ २२ ॥

अन्तरं चोपसंव्याने बहिर्योगे तथापुरि ॥ २३ ॥

उपसंव्यान इति । उपसंवीयत आच्छाद्यते यत्तदित्युपसंव्यानम् । यद्वा । संवीयतेऽनेनेति संव्यानम् । तस्य समीपम् उपसंव्यानम् । तस्मिन् ॥ बहिर्योग इति । बहिरित्यनावृतो देशः । तेन योगो बहिर्योगः । एतस्मिंश्च पूर्वजिते[3] ऽन्तरशब्दः सर्वादिर्भवति ॥ अन्तरस्मै शाटकाय[4] । वस्त्रान्तरेणावृतायेत्यर्थः[5] ॥ अन्तरस्मै गृहाय । बाह्याय चाण्डालगृहायेत्यर्थः[6] ॥ अपुरीति किम्[7] । अन्तरायां पुरि वसति । बाह्यायामित्यर्थः ॥ अयमनयोरन्तरे तापसः प्रतिवसतीत्यादौ मध्यवृत्तित्वेन न भवति[8] ॥ २३ ॥ इति सर्वादिः ॥

त्यत्तद्यदिदं युष्मद्येकादः स्यादथो भवत्वेतत् ।
अस्मत्किमौ च विबुधैर्विज्ञातव्यौ त्यदादिगणे ॥ २४ ॥

एषां त्यदादित्वे यथास्थानं प्रयोजनं द्रष्टव्यम्[9] ॥ इति त्यदादिः[10] ॥

यस्कोत्कासवशिष्टकुत्सखरपाः[11] कुड्प्रचिजङ्गारथाः[12]
पर्णाटोपरिमेखली[13] विषपुटद्रुह्याङ्गिरोविश्रयः ।

---

१ भवतीति F.
२ क्व साहचर्य शिष्टाभीष्टेवतन दुष्टता क्व D.; शिष्टाभीष्टेन F.—? śloka.
३ पूर्ववर्जिते C.
४ शाकटाय A.
५ नवमुन्नेरेणावृतायेत्यर्थः D.
६ चंडाल° A.; B. C. om. अपुरीति किम्.
७ F. om. अपुरीति किं.
१३ Kirât. 5, 28, रतिश्रमगुदस्य eds.
१४ गुणवचनान्न A.; गुणशब्दात् D.

Digitized by Google

सुन्दरा गिर इति भवति[1] ॥ भोजस्तु सामान्येनैव ङीप्रत्ययं दर्शयति ॥ * ॥ पूयी। दुर्गन्धा ॥ * ॥ शक्यन्ते म्रक्ष्यन्ति तस्यां परस्परसंबन्धं निस्तुषतिला[2] इति शष्कुली। भक्ष्यविशेषः ॥ अथवा। शक्नोति पर्याप्नोति पुद्गलविकारं शब्दं गृहीतुमिति शष्कुली। कर्णशष्कुली ॥ * ॥ दिह्यते। देहली। द्वारायस्यला ॥ * ॥ तटी[3] ॥ * ॥ तपः शीलमस्याः।[4] छन्नादेर्ण इति णे सति। तापसी ॥ * ॥ सिनी सिता[5] वासा कला यस्यां सा सिनीवाली[6]। दृष्टेन्दुरमावास्या ॥ * ॥ पूली। तृणसंघातः ॥ * ॥ अस्रक्षल्लक्यत[7] आस्वाद्यते गजैरिति सल्लकी। गजप्रिया[8] ॥ * ॥ गौतमी[9]। अस्य पाठः सुखार्थः। मतान्तरे तु स्वरः प्रयोजनम्[10] ॥ * ॥ तटतापसयोरजातित्वात्। अन्येषां तु स्त्रीविषयत्वाद्प्राप्ते ॥ ४९ ॥

कटेटभौलिङ्गधिकारदेहा
गवादनोद्वाहनतेजनाः स्युः।
आपश्चिको भौलिकिभौरिकी च
काकादनः प्रत्यवरोहिणी च[11] ॥ ५० ॥

कटस्य ईटः। कटेटः। कटेटी[12] ॥ * ॥ भुवि लिङ्गं कीर्तिरस्येति भूलिङ्ग ऋषिः। तस्यापत्यमिति आश्वांसेत्यादिना[13]। दृञि भौलि-

---

१ सुंदरगिर° C.; सुंदरीणां सुंदराणामिति° D.; cf. śl. 53 comm.

२ तस्या परस्परसंबधसुष° C.; तस्याः परस्परसंबंधं सुषतिला B.; तस्यां परस्परसंबंधिनसुषतिला F.

३ Or देहली। द्वारायस्यला तटी ॥ acc. to the other version.

४ तपतेऽस्यां C.; cf. śl. 386.

५ शिनी° A. B. C. D.; °शिता A. D.

६ शिनीवाली A. B. C. D.; cf. Aufr. Hál. s.v.

७ °लक्ष्यते A. C.; शक्नत् शब्दते? D.

८ गजप्रिया खता F.

९ गोतमी D.

१० स्वरप्रयोजनं A.; D. om. from तटतापस° to end.

११ आपश्चिको °प्रत्यवरोहणी च F.

१२ °टः कटेटी। C.

१३ आश्वांशे° A.; साश्वांसे° B.; साश्वांशे° F.; संघासे° C.; cf. Pāṇ. iv. 1, 173.

Digitized by Google

क्ष्णिः । स्त्री भौक्षिक्ष्णी । ञ्यञि प्राग्वे[1] ॥ * ॥ अधिकः कारो[2]ऽस्या इति । आधिकारी । अधिक्रियत इति बहुलाधिकाराद् ञ्यञि स्त्रियां यथा ग्रोभेत्येके[3] ॥ * ॥ देवी ॥ * ॥ गवादनी । इन्द्रवारुणी[4] ॥ * ॥ उदाहनी ॥ * ॥ तेजयत्यग्निमिति तेजनी । करुणी ॥ * ॥ आपचिको नाम जनपदः[5] । समाननामा चचियः । तस्यापत्यं स्त्रीति राष्ट्राख्याद्राष्ट्रो ऽञेवेत्यनेनाञि तस्य च युचि[6] । आपचिकी[7] ॥ * ॥ भूलिकस्यापत्यमिञि[8] स्त्री । भौलिकी ॥ * ॥ भूरिकस्यापत्यमिञि[9] स्त्री । भौरिकी । गोत्रादिपठितादित्यनेन[10] ञस्य प्राग्वे ॥ * ॥ काकादनी । गुच्छा ॥ * ॥ प्रत्यवरोहिणी ॥ टन्प्रत्ययान्तस्यास्यान्येषां च टिड्ढारेणैव ङीप्रत्यये[11] सिद्धे गणे पाठः पुंवद्भावप्रतिषेधार्थः । मतान्तरे तु स्वरः प्रयोजनम् ॥ ५० ॥

बर्बरदाडिमचमसास्तरुणस्तलुनायहायणीबन्दाः ।
पण्डरपुष्कललवणाः पिङ्गलमुसली[12] विभीतको नन्दः ॥५१॥

बर्बरी ॥ * ॥ दाडिमी । वृत्तजातिः[13] ॥ * ॥ चमसी । सोमपा-

---

१ ञ्यञि प्राग्वे D. (P. iv. 1, 78); ङी प्राग्वे A.

२ करो B. C.

३ बहुलाधिकाराद् घञि अधिकारी । स्त्रियां यथा ग्रोभा इत्येके F.; ग्रोभतेत्येके A.; °कारात्ष्यञि° corr. D.; ? cf, Vâmana Kâvy. 5, 2, 43.

४ इंद्रवारणी F.; इंद्रवारिणी A. B. C. and orig. D.

५ अपत्रिको° A.; आपित्रिको जनपदसमाननामा° F.

६ ऽञचेत्य° युचि C.; युचि D.

७ आपित्रिकी F.

८ °इति B. F.; om. C.

९ °इञिः A.; om. C.

१० गोत्रादपठिताद्° A.; cf. P. iv. 1, 79.

११ टनप्रत्ययांतस्य । तस्यां च टि° A.; टन्प्रत्ययास्यान्येषां च° C. F.; ङीप्प्रत्यये C.; cf. Pân. iv. 1, 15.

१२ पंडुरपुष्कल° B. F.; पंडुरपुन्नल° C.; °पुष्करलवणाः° D.; °पिंगलमुग्रली A. C. F.; विभीतको B. C. F.

१३ वृत्तभेदः F.

Digitized by Google

चम् ॥ * ॥ तरुणी । सुरा ॥ * ॥ तलुनी । सुरा[1] ॥ * ॥ अयं हायनमस्याः[2] । आयहायणी पौर्णमासी । अत एव निपातनाद्दीर्घत्वं णत्वं च ॥ * ॥ बन्दी । हठहृता[3] स्त्री ॥ * ॥ पण्डते याति मनोऽस्मिन् । पण्डरः । तद्योगात् पण्डरी[4] । पटी ॥ * ॥ पुष्कली । वनस्पतिः[5] ॥ * ॥ लवणी । ओषधिः[6] । समुद्रपार्श्वस्रोतो यत्र वहनानि स्थाप्यन्त इत्येके[7] ॥ लवणा यवागूरिति गुणशब्दोऽजातौ द्रष्टव्यः[8] ॥ * ॥ पिङ्गली । पिशङ्गी[9] ॥ * ॥ मुसली । ओषधिः[10] ॥ * ॥ विभीतकी[11] ॥ * ॥ नन्दति । ऋद्धिं यातीति नन्दी । प्रज्ञाद्यणि । नान्दी ॥ * ॥

पण्डरपिङ्गलनन्दानामजातित्वात्[12] । अन्येषां तु स्त्रीविषयत्वाद्प्राप्ते ॥ आकृतिगणोऽयम् । तेन देवदासी पटोलीत्यादयो[13] द्रष्टव्याः ॥ ५१ ॥ इति गौरादिः ॥

शोणोऽथ भरुजस्तूणकमली विकटाहनी ।
चान्द्रभागा भवेन्नद्यां ऋंयर्थशून्यादिकारतः ॥ ५२ ॥

शोणादयः शब्दाः शोणादिरित्यनेन[14] ङीप्रत्ययभाजो वा भव-

---

१ तलुनी च ॥ F.; तलुनी ॥ C.

२ अयहायनमस्याः A.; अये हा° F.

३ हठगृहीता F.

४ ? पंडुरः° पंडुरी B. C. F.; C. F. om. पटी.

५ पुन्नली° B. C.; पुष्कली धनऋद्धिः । D.; see p. 80, l. 2.

६ लवली° B. C. (not in text); ओषधिः C.; उषरिः D.

७ समुद्रपार्श्वस्रोतो° A. B. C.; समुद्रपार्श्वे स्थाः । यत्र वाहनानि° F.; D. om. from समुद्र° ; A. inserts these words before लवणी.

८ °शब्दो जादिर्द्रष्टव्यः D.; °इति लवणशब्दोऽजादौ द्रष्टव्यः F.

९ पिप्पली । पिसंगी A.; °पिशंगवर्णयुक्ता D.

१० मुशली° A. B. D. F.; मुषली C.

११ विभीतकी B. C. F.

१२ पंडुर° B. C. F.; D. om. from पण्डर° to अप्राप्ते.

१३ देवदासी पटोली वेदी [वेदी F.; वेटी C.] वाकुची धातकी पांटसीत्यादयो B. C. F.

१४ शोणादयः शब्दा विशंकटपर्यंताः [विसंकट° F.] शोणादेरित्य° D. F.

Digitized by Google

न्ति ॥ ग्रोणी । ग्रोणा । रक्तवर्णयुक्ता ॥ कश्चित्संज्ञायामपि ग्रोणी ग्रोणा वडवेति[1] ॥ * ॥ भरुजी । भरुजा । स्नेहभ्रष्टाः किल तण्डुलाः[2] ॥ * ॥ त्रुणी । त्रुणा । त्रुणीमुखोद्धृतग्ररेण विशीर्णपङ्क्ति[3] । वीणा धिषणा त्रुणा[4] स्त्रूणेत्यादि ॥ * ॥ कमली । कमला नाम काचित् ॥ * ॥ विकटी । विकटा । रचना ॥ * ॥ दीर्घाङ्गी । दीर्घाङ्गा ग्ररत्[5] ॥ अङ्गन्शब्दः केवलः स्त्रियां न संभवति नित्यं नपुंसकलिङ्गत्वात्[6]। अतस्तदन्त उदाहृतः ॥ अङ्गी । अङ्गा । इति कश्चित् केवलस्य स्त्रियामुदाहरति ॥ * ॥ चान्द्रभागी वनराजिः । चान्द्रभागा[7] नदी । टिड्ढाणञित्यादिना[8] ङी प्राप्तः स ग्रोणादिपाठात्तस्यां निषिध्यान्यत्र विधीयत इति विकल्पार्थः ॥ चन्द्रभागा नद्यामिति केचिदाहुः[9]। यदृच्छया चन्द्रभागी[10] चन्द्रभागा काचित् । नदी तु चन्द्रभागेति[11] मतद्वयं वामनाचार्यस्य[12] ॥ पाणिनिग्रकटाक्षजौ तु चन्द्रभाग इव भागो यस्यास्यचन्द्रभागो[13] चन्द्रभागा नाम नदी । अन्यच्च चन्द्रभागा[14] नाम देवता स्त्री वा काचिदित्याहतुः ॥ केचित्तु चन्द्रभागो नाम पर्वतः । ततः प्रभवतीत्यणि । चान्द्रभागी चान्द्रभागा[15] नदी । चान्द्रभाग्यन्येत्युदाह-

---

१ ग्रोघी । ग्रोघा ॥ C.; cf. Pâṇ. iv. 1, 43.

२ स्नेहभ्रष्टा किल तंडुला । A.; स्नेहपृष्टाः किल तंडुला C.; स्नेहभ्रष्टाः° F.

३ Raghuv. 9, 56.

४ धिषणाख्या D.

५ ? रीर्घाङ्गी । दीर्घाङ्गा । दीर्घाहा ग्ररत् B. C.; दीर्घाही । दीर्घाहा । दीर्घाहा वर्षा । D.; सरत् A.; ग्ररत् । प्रावृट् F.

६ नपुंसकत्वात् B. C. F.

७ चंद्रभागा F.

८ P. iv. 1, 15; B. C. F. om. ङी.

९ Thus Kâś. V. iv. 1, 45.

१० Om. C.

११ नदी चंद्रभगेति D.

१२ °द्वयं ॥ वामनावोर्चैभ पा° C.

१३ Om. B.; F. om. from चन्द्रभागा काचित्.

१४ चंद्रभागो C.

१५ ततः भवतीत्यणि चंद्रभागी चांद्रभागा A.

Digitized by Google

रञ्जि[1] ॥ भोजस्तु चान्द्रभागादनद्यामिति[2] सूत्रं पपाठ ॥ * ॥ त्र्यर्थप्रभृत्यादिकारतः । त्र्यकणाविति क्रिप्रत्ययो भावाकर्त्रोर्विहितस्तदन्तस्तदर्थप्रत्ययान्तो वा यो न भवति[3] । ततोऽनेन ङी विकल्पितः । अग्निः । अग्नी ॥ शक्तिः । शक्ती । शक्तम्[4] ॥ आत्मंभरिः । आत्मंभरी ॥ त्र्यर्थप्रभृत्यादिति किम् । शक्तिः सामर्थ्यम् ॥ कश्चिदस्मादपि ङीं मन्यते । अहरणिः । कां त्वं कारिमकार्षीः[5] ॥ ५२ ॥

चण्डः पङ्क्तिकल्याणपुराणकृपणध्वजाः[6] ।
विशालारालमूषा हन्नबहूदारविशङ्कटाः[7] ॥ ५३ ॥

चण्डी । चण्डा । परुषा ।

सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ[8] ॥

चण्डारालशब्दयोर्गौरादिलक्षणे ङीप्रत्यये सिद्धे बह्वादौ[9] पाठः संज्ञायां विकल्पार्थ इति शाकटायनः ॥ * ॥ पादयोर्हतिः[10] । पङ्क्तिः । पङ्क्तती । त्र्यर्थः पाठः ॥ * ॥ कल्याणी । कल्याणा कथा ॥ * ॥ पुराणी । पुराणा छाया ॥ * ॥ कृपणी । कृपणा नाम काचित् ॥ * ॥

---

१ चांद्रभाम्या इत्युदा° C.

२ ? चांद्रभागादन्नद्यामिति A.; चांद्रभागी युनद्यामिति C.; चंद्रभागाद° F. The *Kātantraparishṭa* remarks: चान्द्रभागादनद्याम् । अनद्यामर्थे चान्द्रभागादीर्भवति । चन्द्रभागभवा चान्द्रभागी युतिः ॥ अनद्यामिति किम् । चन्द्रभागनामगिरिः । तच भवतीत्यणि चान्द्रभागा नदी ॥

३ भावाकर्त्रो वि° B.; भावाकर्त्तोर्वि° A.; त्र्यकरणाविति° भावात्कर्त्रा हितस्त° C.; भावकर्त्रोर्विहित° F.; °प्रत्ययांते° B. C.; D. corr. °तदंतस्तदर्थप्रत्ययांता ङ्याटो न भवंति.

४ शक्ता । शक्त आ° C.; शिक्षत्करिः । शक्षत्करी । वत्सा । D.; शक्तं । शक्षत्करिः । शक्षत्करी F.

५ ङीप् मन्यते° C.; मन्यते । सामर्थ्यात् । अहरणिः । का त्वं° A.; त्र्यर्थ° किं । क्षतिः । क्षतिः । अहरणिः । का त्वं° D. F.; अहरतिः ।° B. C.

६ चंडपङ्क्ति° B. C.

७ °विसंकटाः F.

८ Raghuv. 12, 5.

९ शोणादौ F.; *Śākaṭāyana* apparently begins this *gaṇa* with बह्व.

१० पादयोहतः A.

ध्वजी । ध्वजा । पताका ॥ * ॥ विशाखी । विशाखा कीर्तिः ॥ * ॥ अराली । अराला । भूमिः[1] ॥ * ॥ मूषी । मूषा । सुवर्णाद्यावर्तनस्थानं[2] प्राणिविशेषो वा ॥ * ॥ वृचक्षी । वृचक्षा ॥ * ॥ वक्षी । वक्षुर्नाम काचित् । गुणवचनादुतो वाऽखरोरित्यनेन[3] गुणवचनादिकल्पः सिद्ध एव ॥ * ॥ उदारी । उदारा सूक्तिः[4] ॥ * ॥ विग्रकुटी । विग्रकुटा[5] बुद्धिः ॥ * ॥ आकृतिगणोऽयम् । तेन सुन्दरकन्दरादयो[6] द्रष्टव्याः ॥ ५३ ॥ इति ग्रोणादिः ॥

कुण्डः पाचे ऽकृचिमार्थे स्थलं च
भाजः पक्वे कामुकः स्यादिरंसी[7] ।
नागः स्थूले कृष्णवर्णे च कालो
धान्याधारे[8] संमतो गोणशब्दः ॥ ५४ ॥

कुण्डादयः शब्दाः पाचादावर्थे पाचाद्ये कुण्डादेरित्यनेन[9] ङीप्रत्ययान्ता भवन्ति । पाचे कुण्डी । कुण्डाऽन्या ॥ दाहक्रियैव तत्संबन्धादन्यदा तथोच्यते । यस्तु द्रव्यवचनः कुण्डशब्दः[10] स नित्यं नपुंसक एव वर्तत इति न प्रत्युदाहर्तुं युक्तः[11] ॥ * ॥ अकृचिमेऽर्थे स्थली । स्थलाऽन्या ॥ पुरुषप्रयत्ननिष्पाद्या वेदिका इत्यन्ये ॥ * ॥ पक्वेऽर्थे भाजी । भिक्षायामित्यन्यः । भाजाऽन्या । वक्रयष्टिः[12] ॥ * ॥ मैथुनेच्छौ नायि-

---

१ अराजा राजिः भूमिः B.; भूतिः F.
२ सुवर्णप्रवर्त्तनस्थानं D.
३ यो खरोरित्य° A.; यो खरेरित्यनेन° B.; इत्यनेन विकल्पः° F.; काचित्। गुणवचनात्तु पूर्वेण विकल्पः° D.; cf. P. iv. 1, 44.
४ शुक्तिः F.
५ विसंवटी । विसंवटा D. F.
६ सुंदरादयो F.
७ ऽकृचिमेर्थे स्थलस्य° E.; °पक्वकामुकः° A.
८ धान्यागारे F.
९ कुंडादिरित्यनेन B. C. F.; F. om. पाचाद्ये.
१० यस्तु द्रव्यवचनः° A.; °कुण्डशब्दे D.
११ न प्रत्युदाहरणं । तस्य युक्तं । F.
१२ वक्रयष्टिः B. D.

Digitized by Google

कायां[1] कामुकी । कामुकाऽन्या । धनाद्यभिलाषुका ॥ * ॥ स्थूलेऽर्थे नागी । नागाऽन्या । दीर्घादिगुणयुक्ता संज्ञा वा काचित्[2] । चयविशेष इत्यन्ये ॥ हस्तिसर्पजातिवाचिनस्तु ङी भवत्येव । प्रत्युदाहरणं गुणवचनस्य[3] ॥ * ॥ कृष्णवर्णेऽर्थे काली । छाया बलान्याशु ततान काली ॥ कालाऽन्या । धमनी ॥ रत्नमतिस्तु कालशब्दस्य संज्ञावाचिनो ङी । न तु कृष्णवर्णवाचकस्य कृष्णत्वाव्यभिचारादित्याह ॥ * ॥ धान्याधारे[4] गोणी । यस्याश्छाटीति[5] प्रसिद्धिः । यथा ।

गोणीं जनेन स्म निधातुमुद्धृतामनुज्झणं नोज्झतरः प्रतीच्छति[6] ।

गोणाऽन्या । कृष्णविशेषः ॥ ५४ ॥

कुशो लोहविकारे स्याद् घटः कुम्भश्च मृन्मये ।
कबरः केशविन्यासे[7] नीलश्चौषधिदेहिनोः ॥ ५५ ॥

अयोविकारे कुशी । कृष्युपकरणम् । न सामान्येनायोविकारः ॥ कुशाऽन्या । अलोहविकाराकृतिरेव काष्ठादिमयी ॥ भग्नस्याचस्य प्रतिष्टम्भ इत्यन्ये । अपरे तु वक्षेति ब्रुवते[8] ॥ * ॥ मृन्मये पात्रे । घटी ॥ घटाऽन्या । गजघटा । करिघटा ॥ * ॥ कुम्भी । तैलादिस्थानं स्तम्भाधारो वा[9] । कुम्भाऽन्या ॥ * ॥ केशरचनायां कबरी । वेणी । कबरा[10]

---

१ गायकायां F.; मैथुनेच्छायां C.

२ संज्ञेवा काचित्° A.; संज्ञेति केचित् । क्वापिविशेष° D.

३ हस्तिभार्य्यजाति° प्रत्युदाहरणं तु गुण° A.; हस्तिसर्पवाचिनस्तु° F.; D. om. from हस्ति°.

४ धान्यागारे° F.

५ ? धान्याधारे गौणो यस्याश्छेति A.; °यस्याः छट्टोति C.; यस्यास्त्वट्टेति D.; यस्याः छाटीति F.; cf. Mahr. छाटी (S. शाटी) a piece of cloth.

६ Śiśup. 12, 10.

७ केशविन्यासे A.

८ ? वक्षेविक्रवतो D. (? cf. Mahrâṭhi वक्षी "a pole for impelling a boat in shallow water"); वक्षेति°.C.; वक्षोवि° B.; वरेक्षेति° F. (cf. वरक्ष, वरोक्ष).

९ तिलादिस्थानं° B.; for the second meaning cf. कुम्भक.

१० कावरा D.; F. om. वेणी.

Digitized by Google

ऽन्या। वर्णविशेषोपेता। व्याकीर्णमाञ्जकबरां कबरीं तरुण्याः[1] ॥ * ॥ ओषधौ प्राणिनि च। नीली। ओषधिः। नीली वडवा ॥ अन्यच। नीला घाटी ॥ ५५ ॥

सूचस्तीक्ष्णे[2] भाजने पाचपारौ
स्थालः कुम्भ्यां रेवती रोहिणीभे।
ज्ञेयस्तालो[3] लोहमय्यां विपञ्चः
स्याद्वीणायां लोकवृन्दे च गोष्ठः ॥ ५६ ॥

तीक्ष्णाया सूची। सूचाऽन्या ॥ * ॥ भाजने पाची। काष्ठपाची ॥ अन्यच[4]। पाचमियं ब्राह्मणी। पाचं तपस्विसंहतिः ॥ * ॥ पारी। गोदोहनी। यथा। प्रीत्या विमुक्ताँश्चिरतीः स्तनंधयान्
निगृह्य पारीमुभयेन जानुनोः।
वर्धिष्णुधाराध्वनि रोहिणीः पयश्
चिरं निदध्यौ दुहतः स गोदुहः[5] ॥

पाराऽन्या ॥ * ॥ पिठरिकायां स्थाली। स्थालाऽन्या ॥ * ॥ नक्षत्रे रेवती रोहिणी। रेवता रोहिणाऽन्या ॥ ननु कथं रेवती कन्या। रोहिणी कन्येति न ताभ्यां नक्षत्रं वाच्यम्। सत्यम्। रै विद्यते[6] यस्याः। निपातनादेले कृते[7]। रेवती ॥ रोहितस्य रोहिणी ॥ रेवतरोहिणशब्दौ च नक्षत्रवाचिनौ प्रातिपदिकौ। पञ्च रोहिण्यो रेवत्यो वा देवता यस्य। पञ्चरोहिणः पञ्चरेवत इत्यादिप्रयोगदर्शनादिशेषो[8] द्रष्टव्यः ॥ * ॥ लोहविकारे तालो लोकप्रसिद्धा। तालाऽन्या ॥ * ॥ वीणायां वि-

---

१ Śiś. 5, 19; om. D.
२ सूचस्तीक्ष्णो E.
३ ज्ञेयस्तालो C.
४ Om. B. C.
५ Śiś. 12, 40 (प्रीत्या नियुक्तान् eds.).
६ रैर्विद्यते B. D. F.; A. om. from यस्याः to फाल्गुनः खण्डेऽचो in śloka 58.
७ C. om. from रेवती रोहिणी। रेवता°.
८ B. C. om. इत्यादि.

Digitized by Google

पत्नी । विपक्षाऽन्या ॥ * ॥ लोकवृन्दे गोष्ठी । समानजातीयो जनसमुदायः[1] । यथा । गोष्ठेषु गोष्ठीकृतमण्डलासनान्[2] ॥ गोष्ठाऽन्या । भूर्यच[3] गावस्तिष्ठन्ति ॥ ५६ ॥

श्लेषद्रव्ये खलो लक्ष्यो विदारशठमोषधौ[4] ।
दूतः संदेशहारिण्यां कुट्टिन्यां शम्भलो बुधैः ॥ ५७ ॥

श्लेषद्रव्ये खली । खलाऽन्या ॥ * ॥ विदारी । शठी । ओषधिः ॥ विदारा । शठाऽन्या ॥ * ॥ दूती संदेशहारिका । दूताऽन्या । यथा ।

कुसुमपुष्परयनाँसतागृहानेत्य दूतिकृतमार्गदर्शनः[5] ।

दूत्यादिलक्ष्यदर्शनादिकारान्नोऽप्यनुमीयते ॥ * ॥ शम्भं श्रेयोयुक्तं खाति गृह्णातीति वा । शम्भली । कुट्टिनी ॥ वामनस्तु दूत्यां शम्भलीत्याह[6] । न तदस्मन्मनोरञ्जकं लक्ष्येष्वदर्शनात् ॥ शम्भलाऽन्या । देशविभक्तिः ॥

कश्चित्[7] शम्भलविदारशब्दौ गौरादावाह । कश्चिन्नायिकायां[8] सुन्दरी । अन्यच्च सुन्दराऽस्य बुद्धिरित्युवाच । तन्न समीचीनं गौरादावस्य दर्शनात्[9] । अयं चास्माभिर्लक्ष्यानुसारेण तत्रैव व्याख्यातः ॥ ५७ ॥

---

१ समानजातीयजन° D.; समानजातीये जनसमुदाये F.

२ Śiśup. 12, 38; °आसनात् MSS.; D. has the whole stanza with several miscorrections.

३ C. om. भूः; F. om. from भूः to खलाऽन्या in the next śloka; for A. see p. ९२, note ६.

४ विदारसठ° D. E.; A. om. this śloka and comment.

५ Raghuv. 19, 23.

६ दूत्या° C.; °शम्भलीत्याह B.

७ रत्नमतिस्तु corr. D.

८ कश्चित् प्रायिकायां C.; °नायकायां F.; om. सुन्दरी.

९ °अस्मादर्शनात् D.; see śl. 49.

Digitized by Google

[मातङ्गानां स्नेहपानप्रकारे[1]
पीनः शालो वल्लभाया भगिन्याम्।
फालः खण्डे ऽधो खनित्रे कशश्च[2]
ज्ञेयः श्रोण्यां बुद्धिमद्भिः कटश्च[3] ॥ ५८ ॥]

पीनी हस्तिनां स्नेहपानप्रकारः[4]। पीनाऽन्या[5] ॥ * ॥ शाली कलत्रस्वसा। शालाऽन्या ॥ * ॥ फाली खण्डम्। यथा।

कर्पूरस्कारफालीकलितकिशलयस्वस्तरोद्दामलीला[6]।

फालाऽन्या ॥ * ॥ खनित्रे कशी। कशा[7]ऽन्या। अश्वताडनहेतुश्चर्ममयी यष्टिः ॥ * ॥ श्रोण्यां कटी। कटाऽन्या। व्यवस्था क्षित्युपाश्रितिर्वा[8] ॥ * ॥

आकृतिगणोऽयम्। तेन। एषणी। नाराची वैद्यशलाका वा[9]। एषणाऽन्या। इत्यादयोऽर्थविभागेन ज्ञेयाः ॥ ५८ ॥ इति कुष्ठादिपाचादौ ॥

---

१ मातंगात् स्नेह° C.

२ घो रत्नवतिघकुशश्च B.; खंडेघो° F.; कसिश्च [corr. कसश्च] C.; for A. see note ६, page ९२.

३ E. om. this śloka; D. om. text and comment and reads instead:
आकृतिगणावेती तेन खनित्रे कशी। कशाऽन्या। अश्वताडन° यष्टिः। खंडे काली। यथा कर्पूरस्काक्राक्षीवलितकिशलय अक्षरोद्दामलाधस्वाः क्रीयंते वरयुवतिवर्णैर्यत्र धारागृहेषु। काक्षाऽन्या। श्रोण्यां कटी। कटाऽन्या। व्यवस्था क्षित्याधारो वा। करणे एषणी। एषणाऽन्या। कलत्रभगिन्यां शालो। शालाऽन्या। इत्येते शब्दा अन्येपि अर्थविभागाश्रया द्रष्टव्याः॥

४ पाना हस्तिनां° B.; °प्रकारे F.

५ B. C. om. पीनाऽन्या.

६ किशलय A. F.; अक्षरो° MSS.

७ कसी। कसा B. C.; see note २.

८ व्यवस्था क्षित्युश्रितिर्वी A.; व्यवस्थक्षित्युपाश्रिति वा B.; °उपश्रिति वा C.; °क्षितिरुपाश्रितिर्वा F.; D. see note ३. [*i.e.* 'seat for resting,' as Prof. Roth suggests, cf. Mahr. कटा or कटु 'a raised place for resting burdens, a seat.']

९ वैद्यः शलाका वा B.; विद्यः। शलाक वा C.

Digitized by Google

लोहितश्रुवकतालिगुकक्षा[1]
बभ्रुवल्गुमनुसूनुतलुक्षाः[2]।
तण्डमण्डुकपिकन्थकवृक्षा[3]
मन्तुतन्तुतनुमङ्कुतरुक्षाः[4] ॥ ५९ ॥

यञ्लोहितादिभ्यकलाञ्तयञ्कौरव्यासुरिमाण्डूकाड्ढायन्[5] दृत्यनेन स्त्रियां नित्यं ङी भवति ढायनादेशस्य ॥ लौहित्यायनी ॥ * ॥ श्रौव्यायणी ॥ * ॥ कात्यायनी[6] ॥ * ॥ आलिगव्यायनी[7] ॥ * ॥ काक्ष्यायणी ॥ * ॥ बाभ्रव्यायणी। कौशिकी[8] तु बाभ्रवी बाभ्रव्यायणी ॥ गर्गादौ[9] तु बभ्रुः कौशिक इति पाठादिति नः संमतम्[10]। वामनस्तु बभ्रुपाठं मन्यते[11]। कपिशब्दस्य च ॥ * ॥ वाल्वाव्यायनी[12] ॥ * ॥ मानव्यायनी ॥ * ॥ सौनव्यायनी ॥ * ॥ तालुक्ष्यायणी[13] ॥ * ॥ ताण्ड्यायनी ॥ * ॥ माण्डव्यायनी ॥ * ॥ काप्यायनी। आङ्गिरसो तु कापी काप्यायनी[14] ॥ * ॥

---

१ कटालिगु॰ A.; °काचा B. C.; °गुकक्षा F.

२ बबुवबाग्लामनु॰ B.; बभ्रुवबु॰ D. E.; °सूनुतनुषा A.

३ तंडुमंडु॰ A. C.; तंडमंड॰ D.; मंडुमंडु B.; °कार्थकवृषा C.; °तरषाः F.

४ मङ for तनु D. E.; मंकुरषाः A.; मंकुतरषाः B. C.

५ ? यञ्लोहि॰ यञ्कौरव्यासुरिमंडूकानुदेयन् A.; (य oblit.) लोहितादिभ्यकालञ्पक्षीरव्यासुरिमांडूकाडायन् D.; °ड्ढायम् B.; °यञ्कौरव्यासुरिमांडूकाड्ढीयम् C.; °यत्कौरव्या॰ F.; ? the double यञ्; cf. P. iv. 1, 16-19.

६ लोहित्यायनी श्रौव्यायणी काल्यायनी A.; लौहत्यायनी श्रौयायणी कात्यायनी B.

७ आलिंगव्यायनी D.; लिंगयायना B.; लौगव्यायनी C.; F. adds लिंगव्यायनी.

८ कौशका B.; कौसिकी D.

९ °बाभ्रयायणी की गर्गादौ॰ B.

१० °इति न संमतं। B. C. F.; cf. sl. 249.

११ वामनस्तु पाठं मन्यते B. C.

१२ वा for च B. C.; वाल्लायायनी B.; वाल्लाव्यायनी C.; वाल्लव्यायनी D.

१३ तालुच्यायणी B. C.; तालुक्ष्यायणी A.

१४ कापायनी B. C. F.

Digitized by Google

काण्यक्यायनी[1] ॥ * ॥ वार्ष्ण्यायणी[2] ॥ * ॥ मान्तव्यायनी ॥ * ॥ तान्तव्यायनी[3] ॥ * ॥ तानव्यायनी[4] ॥ * ॥ माङ्क्व्यायणी ॥ * ॥ तारक्ष्यायणी[5] ॥ ५९ ॥

गुहलुः संशितः शङ्कुमनायीलिगुसक्थवः[6]।
वतण्डः शकलो मङ्कुलतुञ्चृक्षजिगीषवः[7] ॥ ६० ॥

गौहलव्यायनी[8] ॥ * ॥ सांग्रित्यायनी[9] ॥ * ॥ ग्राङ्कव्यायनी ॥ * ॥ मानाय्यायनी ॥ * ॥ लैगव्यायनी[10] ॥ * ॥ साम्बव्यायनी[11] ॥ * ॥ अनाङ्गिरसी तु वातण्ड्यायनी[12]। शिवादिपाठाद् वातण्डी। आङ्गिरसी तु वतण्डी[13]। अस्त्रीयपाककर्णपर्णपुष्पफलमूलवालान्ताच्छातेरित्यनेन[14] ङीप्रत्ययः ॥ * ॥ ग्राकक्ष्यायनी ॥ * ॥ माङ्क्व्यायनी[15] ॥ * ॥ खातव्यायनी[16] ॥ * ॥ आर्ष्ण्यायणी। रौच्यायणीत्यन्यः[17] ॥ * ॥ जैगीषव्यायणी ॥ ६० ॥ इति खोदितादिः ॥

---

१ काण्यक्यायनी A. D.; काण्यक्यायनी C.

२ वार्षायणी D.; वार्ष्णयिणी B.

३ Om. A.; तांतयायनी B.

४ तानयायनी B.; om. F.; °मान्यायणी D.

५ तारक्ष्यायणी B. C. F.

६ शृंकुमनावी E. and corr. D.; संकुमनायी लिगुसंबंधः। A.; °संवत्राः B. C.; संवचः D.; संचचः E.; लिंगुसंवत्रः F.

७ वतण्डः सकलो° B.; मन्युलतु E.; मंखुलंतु° F.; °खतु° D.; ऋक्षजिगीषवः A.

८ गौहलव्यायनी A. D.

९ ग्रांग्रित्यायनी A.; सांसित्यायनी B. C.

१० ग्रांकयायनी लैमव्यायनी B.; लैगव्यायनी F.; मानायव्यायनी° C.; मानाव्यायनी° D.

११ सांवव्यायनी A. B. C. D.; Kâś. V. MS. I. O. 2440 has शृंवु (not शृङ्कु).

१२ अनांगिरसा° B.; वाडंड्यायनी C.; for शिवादि° see śl. 212.

१३ आंगिरसातु° C.; वतुंडी B.

१४ (त्र obliterated) स्त्रीपात्र° D.; cf. P. iv. 1, 63-4.

१५ मांक्ष्यायायनी B.; मांत्रव्यायनी A.; D. corr. मान्यव्यायनी.

१६ खातवयाव्यनी B.; D. corr. खानव्यायनी; खांतव्यायनी F.

१७ Thus D. F.; आक्षायणी। त्रन्यः। A.; आर्षायणी रौचायणी रौचायणीत्रतः B.; आर्षायणी। रौचायणी। रौचायणीत्रतः C.

Digitized by Google

यच्छष्टो मेनका चाच दण्डकापिप्पकेष्टकाः।
रेवका धारका चैव द्वारकादेवकैरकाः[1] ॥ ६१ ॥

यदादय एडकान्ताः स्युतोऽयदाम्[2] इत्यनेनाकारस्येलं यत्प्राप्तं यदादिपर्युदासात् तद्राजो न भवन्ति ॥ यका ॥ * ॥ मनिपचिमचां नाक्षीत्यनेनाकारस्यैत्वे[3]। मेनका। अप्सराः ॥ * ॥ दण्डका। अरण्यम् ॥

वर्षाणि तिष्ठतु चतुर्दश दण्डकायाम्[4] ॥

प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखीबभूवुः ॥

इति रघुकाव्ये चिन्त्यम्[5] ॥ * ॥ पिप्पका ॥ * ॥ इष्यते काम्यते प्रासादादिषु या सा। इष्टका मृद्विकारः ॥ * ॥ रेवा नदी। ततः संज्ञायां के। कुत्सादौ वा। रेवका ॥ * ॥ धारयतीति धारका ॥ * ॥ द्वारप्रकारा। द्वारका नगरी[6] ॥ यथा धनंजयस्य।

चलत्पताकामुद्धूतोरणां तावविचिताम्।
द्वारकां गोपुरद्वारैः किष्किन्धनगरीमिव[7] ॥

देवका। अप्सराः ॥ * ॥ एरका। उदकट्टणजातिः ॥ ६१ ॥

क्षिपका ध्रुवका चरका तत्सेवकया करकाचटके स्तः[8]।
अवकालहके अलका स्यात् कन्यकया ध्रुवकैडकया च[9] ॥ ६२ ॥

क्षिपतीति क्षिपका। आयुधम् ॥ अथवा। अज्ञाता क्षिपा। क्षिप-

---

१ रेवका द्वारका चैव द्वारकादेव° A.; °द्वारकादेव° E.

२ ? एडकांतास्यातोयदाम् A. D.; °तास्त्र्यातोय° F.; एरकांतास्यातोय° B.; एरकास्याख्यातोय° C.; cf. P. vii. 3, 44-46.

३ मतिपचिपचां° B. F.; मेतीति पचिपची° C.; मनिपधिमचां नाक्षीत्य° D.; cf. Kâś. V. vi. 4, 120; Up. S. 5, 37.

४ Anarghar. (Calc. Ş. 1782, p. 116) 4, 66.

५ Raghuv. 14, 25.

६ द्वारका नदी नगरी B. C.

७ द्वारकांगपुर° A. B. C., original D.; किष्किंधानग° F.; किष्किंधन° B. D.

८ क्षिपकाध्रुवकाचटकाः सेव° E.

९ अवकालहके °ध्रुवकै° E.

Digitized by Google

का ॥ * ॥ धू विधूनने । धुवतीति धुवका । आवपनविशेषः ॥ अथवा । अज्ञाता धुवा । धुवका ॥ * ॥ चरका ॥ * ॥ सका ॥ * ॥ सेवा[1] भक्तिः । कुत्सिता वा सेवा । सेवका ॥ * ॥ करका । वर्षोपलः ।

ताम्कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्[2] ।

केचित्तु करकशब्दं पुंस्याहुः । कमण्डलौ च करक[3] इति ॥ * ॥ चटका ॥ * ॥ अवतीति । अवका । ग्रैवेयकम्[4] ॥ * ॥ खट्टका ॥ * ॥ अलका । नगरी ॥ * ॥ कन्यका ।

सवर्णकन्यका रूपयौवनारम्भशालिनी[5] ॥

भुवतीति भुवका । आवपनविशेषः[6] ॥ अथवा । कुत्सिता भुवा । भुवका ॥ * ॥ एडका । अविजातिः ॥

वेगवती छन्दः । त्रिसकारपरं गुरुकं चेद्वेगवतीति च भादथ भौ गौ ॥

आकृतिगणोऽयम् । तेन यथादर्शनमन्येऽपि भवन्तीति ॥ ६२ ॥

इति यदादिः ॥

इति

श्रीगोविन्दसूरिशिष्यपण्डितश्रीवर्धमानविरचितस्वीयगणरत्नमहोदधिग्रन्थवृत्तौ प्रथमो नामाध्यायः[7] समाप्तः ॥

---

१ सेवका सेवा F.; सेवा A.

२ Meghad. 54.

३ कमंडलू च° A. D.; कमंडलू क° C.; कमंडलुः क° F.; कमंडलूक क° B.; Am. K. 3, 4, 1, 6.

४ सेवकं A. D.; ग्रेवकं F.

५ Vâm. Kâvyâl. 3, 2, 3; सवर्णा कन्यका° ed. Capp.

६ आवपनपनविशेषः B.; D. corr. आवर्तनवि°.

७ गोविंदाचार्यशिष्य° D. E.; °प्रथमोध्यायः E. F.

Digitized by Google

अथ द्वितीयोऽध्यायः ॥

अर्धर्चध्वजकुञ्जशीधुमधवो वर्चस्ककूर्चाढकाः[1]
पङ्कानीकपिनाकनिष्ककपटाष्टङ्कः किरीटः कुटः ।
कूटः कङ्कटकर्बटाण्डशकटा वल्मीकसानू नटः ।
खण्डोद्योगविडङ्गशृङ्गसरकाः पुङ्खव्रजो मोदकः[2]॥ ६३॥

एतेऽर्धर्चादयः शब्दाः पुंसि नपुंसके साधवो भवन्ति॥ अर्धञ्चासौ । ऋक् च । अर्धर्चः । अर्धर्चम् ॥ * ॥ ध्वजं पताका ॥ * ॥ कुञ्जो वनषण्डो हस्तिदन्तश्च[3]। यथा ।

अथोष्णभासेव सुमेरुकुञ्जान् विहीयमानानुदयाय तेन[4] ॥

निकुञ्जोऽपि ॥ * ॥ शेते सुप्यतेनेनास्मिन् वा हिताहितप्रतिपत्तिरिति शीधुर्मद्यम्[5]।

मनोज्ञगन्धं सहकारभङ्गं पुराणशीधु नवपाटलं च[6] ॥

मधुर्द्राक्षादिमद्यम्[7]।

बिभ्रतौ मधुरतामधिपाचं रागिभिर्युगपदेव पपाते[8]।

आननैर्मधुरसौ[9] विकसद्भिर्नासिकाभिरसितोत्पलगन्धः ॥

वर्चस्कं शकृत्[10] ॥ * ॥ कूर्चो दीर्घश्मश्रु[11] ॥ * ॥ आढकं मानविशेषः ॥ * ॥ पङ्कं कर्दमः[12]। यथा ।

---

१ °ध्वजकुञ्ज° E.; °सीधु° A.; °कूर्चाटका: D. E.

२ विडंगरसका: B. C. (in C. शृंग is supplied).

३ वनषण्डो° B.; वनखंडो° A. D.; °हस्तिदंतिश्च A.; वनखंडे° F.

४ Kirât. 3, 32.

५ शेते सुप्यतेनास्मिन्स हि° D.; °पत्तिसीधु° A.

६ °सीधु° A.; Ragh. 16, 52.

७ मधु द्रा° B. C.

८ मधुरतां मधुपाचं D.; Śiś. 10, 8 (°अतिमाचं eds.).

९ मधुरसो eds. for मधुर् असौ.

१० वर्चस्कः° F.; संकृत् A.

११ श्मश्रुः B. C. F.

१२ पंकः F.; A. om. पङ्कं कर्दमः

पुरोगैः कलुषास्तस्य सहप्रस्थायिभिः कृताः ।
पश्चात्प्रयायिभिः पङ्क्तास्चक्रिरे मार्गनिःस्वगाः[1] ॥

अनीकं सैन्यं संग्रामस्य ॥ * ॥ पिनाको रुद्रधनुः । त्रिशूलं च ॥ * ॥ निष्क आभरणम् । कण्ठे निष्क इवार्पितः[2] ॥ * ॥ कपटं व्याजः ॥ * ॥ टङ्कः पाषाणच्छेदनः[3] ॥ * ॥ किरीटो मुकुटम् ॥ * ॥ कुटं घटः । हस्याङ्गविशेषस्य[4] ॥ * ॥ कूटम् । संघातो माया निःस्वलो मृगादिवधार्थं कृतं[5] कैतवम् अयोघनः शैलशृङ्गं वीराङ्गं च[6] ॥ * ॥ कङ्कटं संनाहः ॥ * ॥ कर्बटः । नद्यद्रिवेष्टितं खेटं कर्बटं शैलवेष्टितम् ॥

दुर्गस्तु कर्पटम् अल्पोपकरणस्थानमित्याह[7] ॥ * ॥ अण्डं पक्ष्यादिप्रसवः ॥ * ॥ शकटो गन्त्री ॥ * ॥ वल्मीको वामलूरः ॥ * ॥ सानु प्रस्थम् । सानूनि गन्धः सुरभीकरोति[8] ॥ * ॥ नटो नर्तनविशेषः[9]। आनट इति शाकटायनः ॥ * ॥ खण्ड इक्षुविकारविशेषः शकलं च[10]। यथा ।

जनस्य नूनं परिपूरणाय ताराः स्फुरन्ति प्रतिमानखण्डाः[11] ॥

खण्डनक्रियावाचिनस्तु वाच्यलिङ्गतैव । खण्डी घटी । खण्डो घटः[12]। खण्डं कुलम् ॥ * ॥ उद्योग उत्साहः[13] ॥ * ॥ विडङ्ग औषधम् ॥ * ॥ शृङ्गो विषाणम् ॥ * ॥ सरकं मद्यम् ॥ * ॥ पुङ्खः शराङ्गम्[14] ॥ * ॥ व्रजं पुङ्खः ॥ * ॥ मोदकं भक्ष्यविशेषः ॥ ६३ ॥

---

१ पंकं चक्रिरे° A. B. C. D.; A. B. C. om. the first half-śloka; Raghuv. 4, 31 additional śl.; cf. Aufr. Cat. p. 112, a.

२ Kum. S. 2, 49, V. L. cf. Oxf. Cat. p. 115, b.

३ पाषाणभेदकः F.

४ हस्याङ्गविशेषस्य A.

५ कृतं B. C.; मृगादिवत्तद्वै कृतं D.

६ शीराङ्गं च A. D.

७ कर्पटः अल्पो° F.; अल्पोपकरणमित्याह A.

८ Kum. S. 1, 9.

९ नर्त्तकविशेषः F.

१० शकलं च A.

११ Anarghar. 7, 82 (प्रतिपूरणाय ed. Calc. Ś. 1782, p. 215); D. om. fr. यथा.

१२ खंडी च खंडो° B.; खंडी घखंडो C.

१३ उद्योगमुत्साहः A. D.

१४ शरस्य। A. B. C. (!); सरस्य। D.; शरस्यानुजं F.

Digitized by Google

शाको मस्तककल्कशूकनिकटाः शुल्कं निदाघो नखो
बाणद्रोणसुवर्णभूषणरणाः कार्षापणस्तोरणः।
काण्डस्ताण्डवदण्डमण्डपिटकाः सक्तुस्तडागव्रणी[1]
पेटो मञ्चकवारबाणचरणा वस्त्राश्वैरावताः॥ ६४॥

शाकं भक्ष्यविशेषः[2]॥*॥ मस्तको मूर्धा॥*॥ कल्कम्। औषधानां निर्यासो दम्भः पातकं च[3]॥*॥ शूकं धान्यादेः सूची। दृष्टिकादेः कण्टकोऽपि॥*॥ निकटः समीपम्॥*॥ शुल्को मञ्जपिकायामाथस्थानं स्त्रीधनं च[4]॥*॥ निदाघं ग्रीष्मः॥*॥ नखं पाणिजः। यथा रुद्रस्य त्रैलोक्यसुन्दर्यां हस्तिवर्णने[5]। ज्योत्स्नाजनितदन्तवेदनाशङ्कया प्रसादनार्थं पादलग्नानि चन्द्रमण्डलानीवोज्ज्वलानि नखानि धारयन्तम्[6]॥*॥ बाणं शरः॥*॥ द्रोणं चतुराढको ऽष्टाढको वा देशभेदात्[7]॥*॥ सुवर्णं कनकम्॥ दुर्गस्तु स्त्रीनरलिङ्ग इत्याह[8]। सवर्ण इति शाकटायनः[9]॥*॥ भूषणम् अलंकारः॥*॥ रणन्ति दुन्दुभयो ऽत्रेति रणम्। यथा।[10] रणे रभसनिर्भिन्नदिपपाटविकासिनि॥ रभसेन निर्भिन्ना दिपपाटविकानामसयो यत्र तदित्यर्थः॥*॥ कार्षापणं हिरण्यप्रमाणम्। अणप्रत्ययं विनापि पुंनपुंसकवाचीत्यर्थः॥*॥ तोरणं वन्दनमाला॥*॥ काण्डः शरो नालं वर्गो वारि कुत्सितं च॥*॥ ताण्डवम्। उद्भूतनृत्तं[11] तण्विशेषश्च॥*॥ दण्डं यष्टिश्चतुर्थोपायो दमो मन्त्राश्च॥*॥ मण्डं सर्वरसानां द्रवद्रव्याणां मुख्यम्॥*॥ पिटकं

---

१ शक्तु° A.; सक्तुसटाकवृणी पोटो मंच° E.

२ भक्ष्यादिविशेषः D.; भक्षविशेषः A.

३ दंशः° D.; दंभपातकं च B. C.

४ स्त्रीपण्यं च D.

५ Om. B. C. F. [? हस्तवर्णने].

६ °द्वोज्ज्वलनखानि° A.; D. om. from यथा रुद्रस्य.

७ B. C. om. ऽष्टाढको cf. Weber Jyot. p. 81; D. om. from द्रोणं.

८ दुर्गस्तु नरलिंग° F.

९ सुवर्णः कनकं। दुर्गः स्त्री° इत्यपि शाकटायनः A.; om. D. [? स्वर्ण इति° or सुवर्ण masc. only].

१० D. om. from भूषणं; Śiś. 19, 56.

११ उद्भूतनृत्तं B.; उद्धतं नृत्तं F.

Digitized by Google

गण्डोलकः[१] । विस्फोटवाची तु चिलिङ्गः[२] ॥ * ॥ मक्कु यवादिविकारः[३] ॥ * ॥ तडागः सरः ॥ * ॥ व्रणं क्षतम् ।

विपक्वचित्तोन्मथना नखव्रणास्त्रिरोहिता विभ्रममण्डनेन ये[४] ॥

समासे तु पुंलिङ्गो यथा नाडीव्रणः ॥ * ॥ पेटं[५] संहतिः परिच्छदश्च ॥ * ॥ मन्थकं मथनविशेषः ॥ * ॥ वारम् आच्छादकं वाससश्च खनन्यादेः[६] प्राग्वदित्यनेन णले[७] । वारवाणं कञ्चुकः ॥ वाणे वारणस्य व्यत्ययो[८] मयूरव्यंसकादित्वादिति श्रीभोजः ॥ * ॥ चरणं पादः । यथा ।

स्खलति चरणं भूमौ न्यस्तं न चार्द्रतरा मही
स्फुरति च तथा वामो बाहुस्तनुश्च[९] विकम्पते ।
मकुनिरहितस्वार्थं तारं विरौति हि नैकमः
कथयति महाघोरं वृत्तं न चाच विचारणा[१०] ॥ * ॥

वस्त्रो वासः ॥ * ॥ अम्बरो वस्त्रम् ॥ * ॥ ऐरावतम् । इन्द्रगजः ॥ ६४ ॥

चरकमठविटङ्कक्ष्वेडिता भूतवृत्त-
प्रयुतघृतवसन्ता हस्तबुस्तापराह्णाः ।
पलितफलककण्ठा[११] नामकर्माभिधाना-
ऽयुतशततृणनीडा यौवनोद्यानयानाः ॥ ६५ ॥

---

१ गाडालकः B. C.

२ विस्फाडवाचा तु° B.; विस्फोटकवाची° F.

३ मक्कु यवादिविकारः A.

४ Kirât. 8, 34; विपक्वचित्तो° A.; D. om. from विपच्च to गाडीव्रणः.

५ पटं A. B.; पेटः C. (orig. पटः).

६ मथादेः D.; येनाग्न्यादेः F. (? P. viii. 4, 3; 30).

७ णीले A. B.; णिले C.

८ Thus A. (? वारस्य); वाणवारणस्य° D.; वारणं वारणस्य यत्वयो B.; C. corr. वाणवारस्य°; वारणं वाणस्य वा मयूर° F.

९ बाहुः स्तनस्य B. C. F.

१० वृत्तं° A.; वृत्तं तवाच B. C. D.—Mṛichchh. act 9, p. 143 (ed. St.): स्खलति चरणं° न चार्द्रतमा मही स्फुरति नयनं वामो बाहुर्भुजस्य वि°। मकुनिरपरस्वार्थं तावद्विरौति हि° कथयति महाघोरं मुखं न चाच°॥ eds.

११ °कंठा A.; °कण्या C.; कंवा D.; °किखा F.

Digitized by Google

चरकं प्राक्तविशेषः ॥ * ॥ मठं व्रतिनां स्थानम् ॥ * ॥ विटङ्कं कपोतपाली ॥ * ॥[1] स्खेडितो मुखध्वनितभेदः[2] ॥ * ॥ भूतः पिशाचः ॥ * ॥ वृत्तः शीलम् ॥ * ॥ प्रयुतम् । दश लक्षाः ॥ * ॥ घृतः । आज्यम् ॥ * ॥ वसन्तम् । ऋतुविशेषः[3] ॥ * ॥ हस्तं पाणिः ॥ * ॥ मुस्तं मांसशष्कुली[4] ॥ * ॥ अपराह्णं दिवसापरार्धभागः ॥ * ॥ पलितः । पाण्डुराः केशाः[5] ॥ * ॥ फलकः खेटकम्[6] ॥ * ॥ कर्णं[7] पापम् ॥ * ॥ नामा ॥ * ॥ अयं कर्मा[8] ॥ * ॥ अभिधानं नाम शब्दस्य ॥ * ॥ अयुतम् । दश सहस्राणि ॥ * ॥ अतः । संख्याविशेषः ॥ * ॥ हृणः शत्रुः ॥ * ॥ गीतः कुलायः ॥ * ॥ यौवनो द्वितीयं वयः ॥ * ॥ उद्यान आरामः ॥ * ॥ यानो वाहनम् ॥ ६५ ॥

तीर्थप्रोथौ नलिनपुलिनस्तेनयोधौषधानि
स्थानं शूर्पे[9] निधनशयनद्वीपपुच्छायुधानि ।
यूथं गूथं कुणपकुतपक्षेमवर्णासनानि
छत्राकाशप्रतिसरमुखाष्टापदारण्यवर्षाः[10] ॥ ६६ ॥

तीर्थः पुण्यस्थानम् ॥ * ॥ प्रोथोऽश्वादीनां नासा ॥ * ॥ नलिनः कमलम् ॥ * ॥ पुलिनः सैकतम्[11] ॥ * ॥ स्तेनं चौर्यं चोरश्च ॥ * ॥ योधं सुभटः । यथा सूराचार्याणाम्[12] ।

---

१ कपोतपाला चेडितो° B.
२ मुखध्वनिभेदः F.
३ वसन्त ऋ° B. C. F.
४ मांसं । F.; मांसशष्कुली D.
५ पांडुरः केशः F.
६ खेटं B.; खेठकं D.
७ कंठं A.; कंठं D.; किल्बं F.
८ अथकर्मा A.; अथाकर्मा C.
९ सूर्पे all MSS.
१० छत्राकाश° E. and corr. D.; °प्रतिशर° C. D. E.
११ शैकतं A.; सोकतं B.
१२ शूराचार्याणां A.; D. corr. सेनाचार्याणां.

Digitized by Google

योधैर्योधानि हन्यन्ते क्रोधान्धैः सिन्धुरैर्गजाः ।
न गण्यते क्षपचोऽपि धिक् क्रोधमसमञ्जसम् ॥

औषधो भेषजम् ॥ * ॥ स्थानम् । आधारः ॥ * ॥ भूर्पै[1] मानविशेषः ॥ * ॥ निधनो मृत्युः ॥ * ॥ शयनः शय्या ॥ * ॥ दीपम् । अन्तरीपः ॥ * ॥ पुच्छं लाङ्गूलम्[2] ॥ * ॥ आयुधो हेतिः ॥ * ॥ यूथः पशुसमूहः । द्वयोर्यूथयोः समाहार इति विग्रहे द्वियूथमित्यपि शाकटायनः ॥ * ॥ गूथो विष्ठा ॥ * ॥ कुणपं शवः ॥ * ॥ कुं तपति सूर्योऽत्रेति कुतपः आद्धकालः । यत्स्मृतिः ।

दिवसस्याष्टमे भागे मन्दीभवति भास्करः[3] ।
स कालः कुतपो यत्र पितृभ्यो दत्तमक्षयम् ॥

यद्वा छागरोममयो वस्त्रविशेषः ॥ * ॥ क्षेमः । कुशलम् ॥ * ॥ वर्णम् । अक्षरम् । शुक्लादिद्विजादिश्रुतिवाची तु पुंलिङ्गः[4] ॥ * ॥ आसनः पीठम् ॥ आवृत्त्या । असनं[5] वृक्षविशेषः ॥ * ॥ छत्रं आतपत्रम् ॥ * ॥ आकाशो नभः ॥ * ॥ प्रतिसरः । कङ्कणं वाहिनीजघनं च[6] ॥ * ॥ मुखो वदनम् ॥ * ॥ अष्टसु लोहेषु पदं प्रतिष्ठाऽस्येति संज्ञायामष्ट[7] इत्यनेनात्वे । अष्टौ पदान्यत्र । अष्टापदं शारीफलम्[8] । अष्टापदः सुवर्णम् ॥ * ॥ अरण्यः । अटवी ॥ * ॥ वर्षं वृष्टिः संवत्सरश्च । यथा । पुष्पवर्ष इव मौक्तिकवर्षः[9] ॥ ६६ ॥

---

१ भूर्प all MSS.

२ पुछं भांडं लांगूलं F.

३ °भास्करे A. B. C. F.; Śabdakalp. s.v. कुतप reads: °रः । स कालः कुतपो ज्ञेयः पितृणामक्षयप्रदः । इति शातातपः । cf. Schol. on Hem. Abh. 141. Acc. to Prof. Roth, not in Śât. in Calc. Smṛitis. The Vâchaspatyam has °रः । स कालः कुतपो ज्ञेयः पितृणां दत्तमक्षयम् । मत्° पु°. The Matsyap., acc. to Prof. Haas, has: । तथाष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः ॥ मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः ।

४ शुक्लादिद्विजातिश्रुति° B. C. F.

५ अवृत्या° B.; आसनं F.

६ प्रतिशरः° D.; °क्षयं । वाहिनी जघनं च A.

७ Cf. Pâṇ. vi. 3, 125.

८ सारीफलं A.; शारफलं B.; शारीरफलं C.; शारिफलं F.

९ D. has only वर्षं संवत्सरः; cf. Śiś. 10, 74; पुष्पवृष्टिरिव मौक्तिकवृष्टिः eds.

Digitized by Google

कमण्डलुर्मण्डपकुट्टिमार्बुदा-
ऽवतंसपाराः शतमानचन्दनौ[1]।
समानयूषौ दृढमूषिकौदना[2]
दिनं विमानं च वितानलोहितौ ॥ ६७ ॥

कमण्डलुः करकं कुण्डिका च[3] ॥ * ॥ मण्डपं जनाश्रयः ॥ * ॥ कुट्टेन निर्वृत्तः। घणञ्भावादिम[4] इत्यनेन। इमप्रत्यये। कुट्टिमो बद्धभूमिकम्[5] ॥ * ॥ अर्बुदो दशकोटिरचलो व्याधिश्च[6]। पर्वते तु पुंलिङ्गः ॥ * ॥ अवतंसं शेखरम्[7] ॥ * ॥ पारः परतीरम् ॥ * ॥ शतं मानमस्य[8]। शतमानो भूभागविशेषः ॥ यद्वा। शतमानं रूप्यपलम् ॥ यत्स्मृतिः[9]।

द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते।
शतमानं तु दशभिर्धरणैः पलमेव च ॥ * ॥

चन्दनो मलयजम् ॥ * ॥ समानः सदृशम् ॥ * ॥ यूषो मुद्गनिर्यासः ॥ * ॥ दृढोऽविनष्टम् ॥ * ॥ मूषिकम्[10]। आखुः ॥ * ॥ उप्यते मिश्र्यते व्यञ्जनैरिति। ओदनम्[11] ॥ * ॥ दिनो वासरः ॥ * ॥ विमानो देवतायानं सप्तभूमिकगृहं च[12] ॥ * ॥ वितानो याग उल्लोचो विस्तारश्च। तुच्छवाची तु चिलिङ्गः ॥ * ॥ लोहितः शोणितम्। गुणवचनस्तु वाच्यलिङ्गः। लोहितो गौः। लोहिता शाटी। लोहितं वस्त्रम् ॥ ६७ ॥

---

१ वतंसपराः° E.; शततमानं चंदनौ B.
२ समानयूषौ A.; °मूषकौदना F.
३ कुटिका च B.; कुंटिका च C.
४ Thus A. (? घणच्); °घणभावा° B.; घणवभावा° C.; घकवावादिम D.; घनभावादिम F.; cf. P. iv. 4, 20 V.
५ °भूमिका D.
६ °कोटि वचसो व्याधिश्च D.
७ शेषरं B. F.
८ शतं मानमस्य D. F.
९ Yâjn. I. 363-4.
१० मुषकं F.
११ उप्यते मथ्यते पच्यते इत्योदनं D.
१२ देवयानं F.; °कं गृहं च B. C. F.

Digitized by Google

अंसक्षीरकषायबिम्बविटपा[1] नेचाव्ययौ शेखरः
केदाराश्रमशल्यशूलवलया बालस्तमालो मलः।
गुल्माङ्गारविहारतोमररसाः पाचं पवित्रं पुरं
मध्यं बुध्नमृणालमण्डलनला नालप्रवालोत्पलाः॥ ६८॥

अश्नते भारेण। अंसं स्कन्धः[2]॥ * ॥ क्षीरं पयः॥ * ॥ कषायं तुवराम्लो[3] रसो निर्यासरागविशेषौ च॥ * ॥ बिम्बो मण्डलम् आतपत्रं च॥ * ॥ विटपं स्तम्बः। स्कन्धादूर्ध्वं तरोः शाखा॥ * ॥ नेचो नयनं परिधानपरिमाणविशेषौ च[4]॥ * ॥ अव्ययम्। अक्लिक्लसंख्यम्[5]॥ * ॥ शेखरम्। आपीडः॥ * ॥ क्लिद्यति। आर्द्रीभवति पाकार्थं जलेनेति केदारम्। क्षेत्रविशेषः॥ * ॥ आश्रमो मुनीनां स्थानम्॥ * ॥ शल्यं वंशादीनां कीलविशेषः॥ * ॥ शूलं प्रहरणविशेषो रुजा च॥ * ॥ वलयो हस्ताभरणम्। यथा।

तनुतरमणीयस्य मध्यस्य च भुजस्य च।
अभवन्नितरां तस्या वलयः कान्तिदुर्भगे[6]॥

बालं शिशुः केशस्य॥ * ॥ तमालं वृक्षविशेषः॥ * ॥ मलः पापविट्किट्टानि[7]। यथा सागरचक्रस्य।

मुष्णातु कल्मषमलानि मनोऽपकूल-
खेलन्मरालमिथुनाप्तपनात्मजेव[8]॥

स्वेदो तु। वसा शुक्रमसृङ् मज्जा मूत्रं विट्कर्णविण्मलाः।
श्लेष्माश्रु दूषिका स्वेदो दादशैते नृणां मलाः[9]॥

---

१ अंश° A.; अंसं क्षी° विटमा B.
२ अश्नते° D.; अंश° A.; अस्नते° अंसः स्कंधः C. F.
३ तुवराम्लो C.; तुवराम्लो D.
४ नयनं परिमाणविशेषश्च A. D. F.
५ °संख्ये D.; °संज्ञं A.
६ A.D. om. fr. यथा; cf. p. 115, n. 3.
७ °विहानि A.; °वीर्याणि corr. D.
८ ? पुष्णातु° A.D.; मनोपकूलखेलपराल° A.; मनोपिकूल° D.; मतोपकूल° मिथुनातप° F.; मनोप° B. C.
९ Man. 5, 135.

Digitized by Google

गुल्मः प्रकाण्डम्[1]। यद्वा। गुल्मन्ते व्याकुलीक्रियन्ते[2] पथिकसार्थास्त-स्मिन्निति गुल्मः। आयस्थानम् ॥ * ॥ अङ्गति[3] गच्छति निर्धूमकाला-ग्निरामिति। अङ्गारो वह्निदग्धकाष्ठम् ॥ * ॥ विहारं भिक्षुस्थानम् ॥ * ॥ तान्यन्ति काङ्क्षन्ति तेनारोन्मर्दुमिति तोमरं गर्वला[4] ॥ * ॥ रसम्। मधुरादिः शृङ्गारादिश्च विषं वीर्यं रागश्च ॥ * ॥ पात्रो भाजनम्[5]। अत्रास्य पाठः प्रचुरप्रयोगापेक्षः[6] ॥ * ॥ पवित्रः पावनम् ॥ * ॥ पुरः पुरी ॥ * ॥ मध्यः। उदरम्।

आकर्षते वोर्ध्वमपि क्रमीयान्
अत्युन्नतत्वात् कुचमण्डलेन[7]।
ननाम मध्योऽतिगुरुत्वभाजां[8]
नितान्तमाक्रान्त दृवाङ्गनानाम् ॥

बुध्नम् अधोभागः ॥ * ॥ मृणालो बिसम्[9]। मृणालोत्यपि दृश्यते महाकविप्रयोगेषु[10] ॥ बिसाङ्कुर इत्यन्ये ॥ * ॥ मण्डलो बिम्बं भूभाग-विशेषश्च। यथा।

अयमनेन महोदधिभोगिना वलयितो वसुधाफणिमण्डलः[11] ॥

नलं शुषिरं[12] तृणम् ॥ * ॥ नालः पुष्करादीनां दण्डः ॥ अमरमा-लायां तु नालं नाला स्त्रियामिति स्त्रीलिङ्गोऽभिहितः[13] ॥ * ॥ प्रवालं पल्लवो विद्रुमश्च ॥ * ॥ उत्पलो जलजम् ॥ ६८ ॥

---

1 A. om. from गुल्मः.
2 गुह्यते° क्रियते A. D.; गुर्व्यते° F.
3 अगति B.; आयस्थाने अगति C.
4 नान्यं कांक्षंति° D.; गुर्वरा A.; सर्वला F.; सर्वरा B. C.
5 भोजनं MSS.; पात्रं° C.
6 प्राचुरप्रयोगोपपत्रे C.; °प्रयोगो-पपो B.
7 चोर्ध्वमपि°? MSS.; अभुन्नतत्वात् A. D.; कुचं मंडलेन B.
8 ऽपि गुरुत्व° A. D.; °गुरुत्वभाजा B. C. D. F.
9 विसं A. D.
10 दृश्यते। कविप्रयोगेषु F.; । कथित-प्रयोगेषु C.; कथितप्रयोगेषु B.; महाकवि-सूत्रेषु D.
11 Anargh. 7, 28; D. om. from यथा.
12 सुषिरं A.
13 नालं नालो स्त्रियामिति° B. C.; cf. A. K. 1, 2, 3, 41.

Digitized by Google

जृम्भो वज्रकबन्धकर्षककुदाश्चक्रान्धकाराङ्कुशा[1]
वक्रं संगमदेहदाडिमहिमाः पचं बलं वल्कलम् ।
कर्षासामिषकाशकोशकुसुमप्रग्रीवमासेक्षसा[2]
निर्यासः कलशाक्षरीषकलला माषः करीषं कुशः[3] ॥ ६९ ॥

जृम्भो जृम्भणम् ॥ * ॥ वज्रः कुलिशम् । यथा । वनस्पतिं वज्र इवावभज्य[4] ॥ यथा वा । भिन्दानो हृदयमसाद्रि नोदवज्रः[5] ॥ हीरकस्य ॥ * ॥ कबन्धं रुण्डः । यथा ।

वामांससंसक्तसुराङ्गनः खं नृत्यत्कबन्धं समरे ददर्श[6] ॥

कर्षः पलचतुर्थभागः ॥ * ॥ ककुदः । प्रधानं राजचिह्नं शृङ्गं च ॥ * ॥ चक्रो रथाङ्गम् ॥ * ॥ अन्धकारस्तमः । यथा । प्रोषितार्यमणं मेरोरन्धकारस्तटोमिव[7] ॥ * ॥ अङ्कुशः सृणिः[8] । यथा ।

प्रत्यग्रनागं चलितस्खरावता निरस्य कुम्भं दधतान्यमङ्कुशम्[9] ॥

वक्रो मुखं क्रन्दोजातिश्च ॥ वक्रेत्यपि शाकटायनः ॥ * ॥ संगमं[10] नद्यादिमेलः ॥ * ॥ देहं शरीरम् ॥ * ॥ दाडिमं फलविशेषः ॥ * ॥ हन्ति[11] हिनस्ति पद्मवनानीति हिमः । तुहिनम् ॥ * ॥ पचं पर्णं वाहनं च ॥ * ॥ बलं सामर्थ्यं सैन्यं च ॥ * ॥ वल्कलं तरुत्वक् ॥ * ॥ कर्षासं तूल-

---

१ जृम्भो° C.; °ककुदात्साक्राधकारांकुशा A.

२ मासेक्षसा MSS. (क्ष often for क्ष).

३ कलसांवरीषकलिला° A.; मार्षं° D.

४ Kum. S. 3, 74.

५ Śiś. 8, 39; भिंदतो द्रु° A.; D. has the whole stanza; C. om. from जृम्भो to हीरकस्य.

६ Raghuv. 7, 48; वामाक्षसंसक्त° eds.

७ Śiś. 2, 39; D. has the whole śloka; it also quotes Kum. S. 1, 12a (भीतं for भीतं).

८ आंकुशः B.; अंकुशं A. D.; घृणिः A.; शृंणिः D.; cf. Nirukta 5, 28.

९ Śiś. 12, 12; D. quotes the whole, but corrupt.

१० संगमो B. C. F.

११ हेति B.; हति D.; cf. Uṇ. S. 1, 146.

Digitized by Google

कारणम् ॥ * ॥ आमिषो मांसम् ॥ * ॥ काशं तृणभेदः ॥ * ॥ कोशं धनम् । अमरसिंहस्तु कोष इत्याह[1] ॥ * ॥ कुसुमः पुष्पम् ॥ * ॥ प्रपीवं वातायनं वास्तुनिमित्तधारणं च[2] ॥ * ॥ मासं त्रिंशद्दिनोरात्रः ॥ * ॥ इक्षवः ।[3] चिक्कसं यवपिष्टपर्यायम् अमरसिंहाद्याः ॥ * ॥ निर्यासं वृक्षादेर्निस्यन्दः ॥ * ॥ कलशं घटः । कलशस्त्रियामित्यमरसिंहः[4] ॥ * ॥ अम्बरीषं भ्राष्ट्रः । अमरसिंहस्तु क्लीबे[5] ॥ * ॥ कलसं शुष्कशोणितपर्यायः ॥ * ॥ माषं द्रव्यार्धगुञ्जो व्रीहिविशेषश्च ॥ * ॥ करीषो गोमयाग्निः । शुष्कगोमयसंघात इत्येके[6] ॥ * ॥ कुशं दर्भः ॥ ६९ ॥

मुसलमुकुलमूलाः पार्श्वपाचीवपूर्वाः[7]
कमलहलचषालाः[8] खण्डलं कुण्डलं च ।
निगडफलपलालाः[9] मङ्गलं शालशीले[10]
विषचषकविशालाः[11] पूलतैले कपालम् ॥ ७० ॥

मुसलम् । आयुधविशेषः क्षोदनविशेषश्च[12] ॥ * ॥ मुकुलः कुड्मलम्[13] । यथा विक्रमोर्वश्याम् ।

---

१ A. K. 3, 4, 29, 233; Kshîr. takes no notice of another spelling, but Râyam. refers to the double spelling in Med. *śânta* 5.

२ सुग्रीवं° वस्तुनि° A.

३ इक्ष for इक्ष B. C. D. F.; इक्षसः । चिक्कसं A., for चिक्कसं cf. A. K. 3, 6, 35 (यवपिष्टं Kshîr.; गोधूमादिचूर्णं Rây.).

४ कलशस्त्रियामित्य° C.; A. K. 2, 9, 31.

५ A. K. 3, 9, 30.

६ शुष्कगोमयं । संघात° C.; शुष्कगोमयसघातः° D.; इत्यन्ये F.

७ मुशल° A. C.; °पाचाकपूर्वाः B.; °पाचीकपूर्वाः C. F.

८ °चखालाः A. D.; °वखालाः B. C.; °वषालाः E.

९ निगल° A. D. E.; निगडपलपलाला C.; निगद्रुपलप° B.; निगमपलप° F.

१० सालशीले B. F.; शालीले E.

११ विषवषक° B. C. D. E.

१२ मुशलं° A. B. C.; चादन B. C.

१३ कुशलं A. B. D.; om. C.

Digitized by Google

उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरि कर्णिकारमुकुलान्यध्यासते षट्पदाः[1] ॥

मूलः । प्रतिष्ठा । आदिः । शिफा । नक्षत्रभेदश्च[2] ॥ * ॥ पर्णानां समूहः । पार्श्वम् । कक्षयोरधः ॥ * ॥ पाचीवं[3] यज्ञोपकरणम् ॥ * ॥ पूर्वं रूढितोऽर्थोऽवगन्तव्यः ॥ दिक्कालयोगे त्वाश्रयलिङ्गः । पूर्वः पर्वतः । पूर्वा नदी । पूर्वं वनम् ॥ * ॥ कमलं पद्मम् ॥ * ॥ क्षीरः क्षीरम्[4] ॥ * ॥ चषालं[5] यज्ञपात्रम् ॥ * ॥ खण्डलं खण्डम् ॥ * ॥ कुण्डलः कर्णवेष्टनम् ॥ * ॥ निगडं[6] पादबन्धः । यथा कालिदासस्य ।

मणिबन्धविगलितमिदं संक्रान्तोशीरपरिमलं तस्याः ।
हृदयस्य निगडमिव मे मृणालवलयं स्खलितं पुरतः[7] ॥

फलं[8] प्रयोजनं कुसुमादिसंभवश्च ॥ * ॥ पलालः । धान्यादेः शुष्कतृणम् ॥ * ॥ मङ्गलः[9] प्रशस्तम् ॥ * ॥ शालो[10] वृक्षविशेषः ॥ * ॥ शीलः । चरित्रम् ॥ * ॥ विषः शृङ्गिकादिद्रव्यभेदः[11] ॥ * ॥ चषको मधुपानभाजनविशेषः[12] । यथा ।

अधिरजनि वधूभिः पीतमैरेयरिक्तं
कनकचषकमेतद्रोचनालोहितेन ।

---

१ Vikr. śloka 41; °मुकुलान्यध्यासते षट्पदाः A.; मुकुलानध्यासते B. C.; [कुसुमान्याश्रयते षट्पदाः or (Pisch.) मुकुलान्याक्षीयते षट्पदः eds.; cf. also the scholium कर्णिकारमुकुलानि° Boll. p. 303] D. adds the half-verse, reading क्रीडावेश्मनि वैष°, cf. Pischel °वेष.

२ A. D. om. from मूलः

३ पाचीवं B. C. F. [MSS. Kshîr. A. K. 3, 6, 35 read पाचीयं; Rây. पाचीवं].

४ शीरं A. B. C. D.

५ चषालं A. C. D.; खषालं B.

६ निगड्डं B.; निगलं D.

७ Śak. Pischel śl. 83 (मणिबन्धनगलित° ed.).

८ फलः A.

९ मंगलं B. C.

१० सालो B. F.; शाको A.

११ शृंगकादि° B. C.; शृंगारादि° D.

१२ वषको° B. C.; मधुपानविशेषः A.

Digitized by Google

उदयदहिमरोचिर्ज्योतिषाक्रान्तमन्तर्-
मधुन इव तथैवापूर्णमद्यापि भाति[1] ॥

विशालो विशङ्कटम्[2] ॥ * ॥ पूलं बद्धतृणसंचयभेदः[3] ॥ * ॥ तैलः । तिलादीनां विकारः[4] ॥ * ॥ कपालः । शिरसोऽस्थि । घटादिखण्डोऽप्युपचारात् ॥ ७० ॥

समरतिमिरवारा राजसूयोपवासौ
चमसदिवसकंसा वाजपेयो हिरण्यम् ।
जठरदरशरीरारावकान्तारराष्ट्राः[5]
पटहगृहकवाटाः कुक्कुटार्द्रौ च धाम[6] ॥ ७१ ॥

समरो रणम् ॥ * ॥ तिमिरः । तमः ॥ * ॥ वारं परिपाटिः ॥ * ॥ राजसूयं क्रतुः ॥ * ॥ उपवासं भोजनच्छेदः ॥ * ॥ चमसं यज्ञपात्रविशेषः ॥ * ॥ दिवसं दिनम् । यथा ।

प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय विभ्यद्दिवसानि कौशिकः[7] ॥

कंसं परिमाणभेदः । लोहभेदो वा ॥ नृवाची तु पुंलिङ्गः[8] ॥ * ॥ वाजपेयं यागः[9] ॥ * ॥ हिरण्यो धनम् ॥ * ॥ जठरम् । उदरम् ॥ * ॥ दरं त्रासः भयं च[10] ॥ * ॥ शरीरः कायः ॥ * ॥ आरावं शब्दः ॥ * ॥

---

१ Śiś. 11, 51. In the second pâda, the Calc. ed. 1815 reads कनकचषकमेतत्प्रातरालोहितेन ।; Târânâtha reads as above.

२ विसंकटं F.

३ तृणवज्रसंचयभेदः A.; वज्रतृणसंचयः F.

४ तिलादीनां कारः B. C.

५ °शरीराव° D. E.; कांतारा राष्ट्राः A.

६ कुक्कुटार्द्रौ° A.; कुर्कुटाद्रौ° B.; कुर्कुटाद्रौ C.; कुक्कुराद्रि वि । धाम D.

७ Śiśup. 1, 53.

८ लोहभेदनृवाची° B. C.; [कंसः । चषको मल्लिका पारी च Kshîr.; A. K. 2, 9, 32] D. om. from लोह°.

९ यज्ञविशेषः C.; B. om. from वाजपेयं.

१० स्वर्भं च A.; स्वर्गं च B.; स्वसं च C.; त्रासं च D.

Digitized by Google

कान्तारो महारण्यं दुर्गपथश्च ॥ * ॥ राष्ट्रम् । जनपद उपद्रवश्च । पराद्राष्ट्रभयम्[1] ॥ * ॥ पटहं डिण्डिमः ॥ * ॥ गृहो वासः । गृहाः पुंसि च भूम्न्येवेति कश्चित्[2] ॥ * ॥ कं शिरः पाटयति प्रविशतां । अपादित्वात् । कवाटो द्वारपिधानम्[3] ॥ * ॥ कुक्कुटं ताम्रचूडः । अमरसिंहस्तु कुक्कुटः पुंस्येवेत्याह[4] ॥ * ॥ आर्द्रः शृङ्गवेरम् ॥ * ॥ धामा गृहं तेजश्च ॥ ७१ ॥

पद्माषाढकपित्थषष्टिककुलान्यम्भोजवाजामृताः[5]
स्थूलद्यूतखलीनलोहकवचाशोकक्षयानेकपाः ।
शङ्खस्तण्डकधर्मचर्मरजतस्नेहासिहंसापराः
सारः सैन्धवमध्यमाध्वरधनुर्मानस्तनस्थाणवः ॥ ७२ ॥

पद्मो जलजम् । निधिवचनस्तु पुंलिङ्ग एव । यथा श्रीहर्षस्य ।

अच्छिस्नास्तबिन्दुदृष्टिसदृशीं प्रीतिं दधत्या दृशां[6]
याताया विगलत्पयोधरपटाद्रष्टव्यतां कामपि ।
अस्माभ्यङ्गमसक्तनोरिव करस्पर्शात्सदृत्वं गता
यत्नैते[7] मुकुलीभवन्ति सहसा पद्मास्तदेवाद्भुतम् ॥

यथा वा कुमारिलस्य[8] ।

---

१ परराष्ट्रं भयं C.

२ Viz., Amaras. 2, 2, 5.

३ कं शिरः पाटयति प्रविशतां कवाटो द्वारपटुः । अपादित्वादलं Kshîr. on A. K. 2, 2, 17.—Vardh. does not give the *japâdi* in this work.

४ A. K. 2, 5, 17.

५ पद्मषाटक° E.; पद्मापातदपि° °कपिच्छषष्टि° A.

६ Priyadarśikâ (Calc. S. 1931) 2, 7; ददत्या for दधत्या ed.; दृग्गा यताया° A.; दृग्गो या° F.; दृग्गो यो विग° B.; दृग्गीं या विगलत्° C.; दृग्गोर्यातायां विगलत्पयो° D.; पयोधरपदद्रष्टव्यतां° MSS.

७ नैते यत्नु° ed. Calc.; यत्नैते B.; यचैते C.; यचैते D.; °मुकुलीभ° A.; मुकुलीभ° D.

८ कुमारलस्य C.

Digitized by Google

संपिञ्छिताङ्गावयवा उदीयुः पद्मा नवाः कण्टकितोर्ध्वदण्डाः[१]।
अन्तर्जलावासविवृद्धुशीतच्छाया वसन्तातपकाम्ययेव[२]॥

आषाढम्। व्रतिनां दण्डं मासश्च॥*॥ कपित्थो वृक्षविशेषः॥*॥ यष्टिकं व्रीहिभेदः॥*॥ कुलोऽभिजनो गृहं च॥*॥ अम्भोजः कमलम्॥*॥ वाजं पिच्छम्[३]॥*॥ अमृतम्। सलिलं[४] सुधा मोचो हृद्यं च॥*॥ स्थूलं दृढः॥*॥ द्यूतो दुरोदरम्॥*॥ खलीनं कविकम्। खलिनेति[५] प्राकटायनः॥*॥ लोष्टोऽयःप्रभृतिद्रव्यविशेषः॥*॥ कवचः संनाहः॥*॥ अश्लोकं तद्विशेषः॥*॥ क्षयं गृहम्॥*॥ अनेकपं हस्ती॥*॥ अङ्गं कमुः। निधिललाटाक्षिवचनस्तु पुंलिङ्ग एव॥*॥ तण्डकम्। छन्दोगयोग्यो ब्राह्मणो ग्रन्थविशेषः[६] परिष्कारो दण्डको वा॥*॥ धर्मोऽदृष्टार्थवाची[७]। तत्साधनवाची तु नपुंसकलिङ्गः[८]। तानि धर्माणि प्रथमान्यासन्[९]॥ अमरसिंहस्तु धर्ममक्षियामिति[१०] पठन् सामान्येनाह। धर्माः पुण्ययमन्यायस्वभावाचारसोमपा इति च[११]॥*॥ चर्माऽजिनम्॥*॥ रजतो रूप्यं श्वेतं च॥*॥ स्नेहं सौहृदम्॥*॥ असि खड्गः॥*॥ हंसं सितच्छदः॥*॥ अपरोऽपरमन्यत्॥*॥ सारो

---

१ कंटकितांगद्रुधाः A.

२ अंतर्जला च। सविवृद्धशीतच्छाया वसंतातपकाम्ययेव A.; °काम्यथैव C. F.; अंतर्जलावातवलद्वृशीतच्छाया वंसानातप° D.

३ पित्थं B.; पिष्टं D.

४ ग्रलिलं B. C. D.; सलिला A.

५ खलितेति A.

६ C. om. from कवचः संनाहः°; °परिष्कारो B. C. D.

७ धर्मो दृष्टार्थवाची B. C.

८ तत्साधनवाची च पुंलिंगः। A. D.

९ Rigv. i. 164, 43; V. S. 31, 16.

१० A. K. 1, 1, 4, 2; धारणाद्धर्मः। यागाङ्गे नपुंसकम्। तानि धर्माणि प्रथमान्यासन्॥ फले तु पुमान्। एष धर्मः सनातनः। इति विशेषोऽस्य नेष्टः। लोकधर्मी नाट्यधर्मीति पारिभाषिको धर्मीशब्दोऽप्यस्ति। Kshîr.

११ A. K. 3, 4, 141; पुण्यः। यागाद्यहिंसा वा॥ यमो धर्मराजः। धर्मस्तु भीमवत्॥ न्याये च। धर्माधिकारिणः॥ स्वभावे यथा क्रूरधर्माः॥ आचारे यथा धर्मशास्त्रम्॥ सोमपे यथा। एष धर्मः सनातनः॥ युधिष्ठिरपितापि तावदेव॥ धर्मसाधने यागादौ च क्लीवे। यत्कृतिः। तानि धर्माणि प्रथमान्यासन्। Kshîr.

Digitized by Google

वलं चन्दनादिस्थिरांशस्य[1]। सारं न्यायादनपेतम्। उत्कर्षवाचकस्तु चिह्नितः॥ यत्तु अमरादित्येनोक्तम्। उत्कर्षे सारशब्दः पुंलिङ्ग एवेति[2] तन्न समीचीनम्। सख्या सुतवती सारा दर्पिकाव्रतगर्भिनः[3]॥ तथा। अये धरित्र्याः पुरमेव सारम्[4]। इत्यादिबहुतरप्रयोगविरोधात्॥ ननु वाच्यलिङ्गत्वेऽस्य। सारं सारङ्गलोचना[5]।

राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधम्[6]।

इत्यादौ कथं न विशेष्यपदलिङ्गपरिग्रहः। सत्यम्। सामान्यविशेषभावयोजनाया[7] अनङ्गीकृतत्वादिति न यथोक्तदोषप्रसङ्गः॥ * ॥ सैन्धवो लवणोत्तमम्। यौगिकस्तु चिह्नितः। सैन्धवं वस्त्रम्। सैन्धवोऽश्वः। सैन्धवी शाटी[8]॥ * ॥ मध्यमो मध्यगं[9] नातिप्रधानम्॥ * ॥ अध्वरं क्रतुः॥ * ॥ धनुः कोदण्डम्। यथा।

धनुर्वंशविशुद्धोऽपि निर्गुणो किं करिष्यति[10]॥ * ॥

मानं दर्पः॥ * ॥ स्तनं पयोधरः॥ * ॥ स्थाणुः कीलकः॥ ७२॥

महिमनेचकपञ्चकदण्डकाः क्रकचशस्त्रलकुण्डपकन्दराः[11]।
कटकमालकमर्मरदैवताः शिखरकेशरदारुभगंदराः[12]॥ ७३॥

---

१ °स्थिरांसस्य B. C.; Kshîr. A. K. 3, 4, 173: वले यथा। सुसारः। घृतात्मांसं तु सारवत्॥ स्थिरांशे। चन्दनसारो मज्जासारः॥ न्याय्ये। नैतत्सारं चरेत्। अये धरित्र्याः पुरमेव सारम्॥

२ Kâś. V. ii. 4, 31.

३ ?सख्यासुतवतीसारादर्पिकाव्रतगर्हितः A.; सख्यासुतं वती° C.; सर्वासुताधनीसारादर्पिका व्रतगर्ह्यितपा अये° D.—The above reading is suggested by Prof. Roth, who translates: 'Eine bereitwillige und kindergebärende (Gattin) ist die beste für einen liebesüchtigen.' Prof. Weber proposes: सख्या सुतवती सारा° 'Eine treffliche Gattin ist ein Freund für etc.'

४ Bṛihats. 74, 1; Böht. Sp. 2347.

५ Böhtl. Sp. 778.

६ Böhtl. Sp. 5776.

७ °भावेन योजनाया D.

८ साटी A. D.

९ मध्यं B. C. F.; twice मध्यमो D.

१० Böhtl. Sp. 5369; A. D. om. from यथा.

११ °संवच्च° A. D.

१२ देवताः° A. C.; °केसर° B. C. F.

Digitized by Google

महिम महत्त्वम् ॥ * ॥ नेचकः घृष्टशुल्वकम् ॥ * ॥ पञ्चकः पञ्चकं विस्तारः ॥ * ॥ दण्डकं छन्दोविशेषः ॥ * ॥ ककचः करपत्रम् ॥ * ॥ शम्बलं[1] पाथेयम् ॥ * ॥ कुण्डपं क्रतुविशेषः ॥ * ॥ कन्दरं दरी ॥ * ॥ कटकः सैन्यम् । यथा सागरचक्रस्य ।

कटकः कण्टकान्यस्य दलयामास निर्दयम् ।
स हि न क्षमते किंचिद्विन्दुनाप्यात्मनोऽधिकम्[2] ॥

वलयं भूभृन्नितम्बश्च[3] ॥ * ॥ मालको ग्रामान्तराखाटवी ॥ * ॥ मर्मरं शुष्कपत्रध्वनिः ॥ * ॥ दैवतो देवः ।

यथायं दारुणाचारः सर्वदैव विभाव्यते ।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा[4] ॥

शिखरोऽग्रम् । यथा ।

अगस्त्याश्वासघ्रमितविकलोच्छ्वासविषमान्
उदश्वन्तः सेतावलगितवतो विन्ध्यशिखरान्[5] ॥

केशरः[6] किञ्जल्कम् । यथा ।

संपिण्डीकृतजीर्णजीरककणश्रेणीश्रियः केशरान्
संनद्धे परितो निरन्तरदलद्द्रोणीनिवेशैः स्खलिभिः[7] ॥

दारुः काष्ठम् । केचिद् दार्विति नपुंसकमेवाऽऽहुः ॥ * ॥ भगंदरो रोगः ॥ ७२ ॥

---

१ संवलं D.; om. ककचः करपत्रं.

२ कटकैः कंट° D.; कटकः कटकान्य° C.; °क्षमति° B.

३ A. D. add: यथा । तनुस्वरमणीयस्य मध्यस्य च भुजस्य च । अभवन्नितरां तस्या वलयः कान्तिवृद्धये ॥ transferred here by mistake from the comment on वलय in śl. 68 above; cf. p. 106, n. 6.

४ सर्वदेव° C.; देवतोऽस्य A. C. This śloka is quoted by Mammaṭa on Kâvyapr. 7, 3.

५ Anarghar. 6, 32; °विपुलोच्छ्वास° ed. Calc. p. 166; D. om. from यथा.

६ केसरं F.

७ Bâlarâm. 5, 27 (संनद्धं ed. Ben.).

Digitized by Google

दीपोद्यमब्रह्मपिधानभावा
वास्तुव्रतार्धप्रवरापिधानाः[१]।
अर्मो मुहूर्त धनवप्रसौधा
रेणुस्तलं लोम पटो विहायः[२]॥ ७४॥

दीपं प्रकाशविशेषः॥ * ॥ उद्यमम् उत्साहः। शाकटायनस्तस्मा-देव पाठादाह। उद्यममित्याह॥ * ॥ ब्रह्म। प्रजापतिर्वेदाः शाश्वतं ज्ञानं तपश्च॥ वेधसि पुंस्त्वमित्यन्यः[३]॥ * ॥ पिधानः संवरणम्॥ * ॥ भावम्। स्वभावः शब्दविषयोऽभिप्राय आत्मा योनिश्च॥ * ॥ वास्तुः। वेश्मभूर्गृहं च[४]॥ * ॥ व्रतो ब्रह्मचर्यादिनियमः॥ * ॥ अर्धं समभागः। अर्धोऽसमभागः[५]॥ * ॥ प्रवरः प्रकृष्टम्॥ * ॥ अपिधानः स्थगनम्[६]॥ * ॥ अर्मं चक्षूरोगविशेषः[७]। अर्मन्निति दुर्गः[८]॥ * ॥ मुहूर्तो द्वादश क्षणाः॥ * ॥ धनो वित्तम्॥ * ॥ वप्रं प्राकारः केदारं तटं च। तच्च तटे।

वप्रेण पर्यन्तचरोऽुचक्रः सुमेरुवप्रोऽम्बुदमन्वकारि[९]॥

तथा। अर्कोपलोन्नमितवह्निभिरभ्रि दीप्तास्
तीव्रं महाव्रतमिवास्य चरन्ति वप्राः[१०]॥

---

१ द्वासुव्रता° A.; वास्तुव्रतेऽर्ध° B. C.; °प्रवराऽभिधानाः D.

२ अर्मा मुहूर्तश्च° लोमपदौ विहाय A.; अर्मा मुहूर्तश्च धनं वप्रं सौधं रेणुस्ततश्च विहायाः D.; अर्मामुहूर्तौ° E.

३ साध्वंतज्ज्ञातं तच्च वेधसिपुंस्त्व° A.; वेदाः शास्त्रं तंच ज्ञानं° F.; D. om. from वेदाः (? वेदः); cf. A. K. 3, 4, 117.

४ वेश्मभूगृहं च A. B. C.

५ C. only अर्धो समभागः।

६ F. adds अभिधानो नाम शब्दस्येत्यपि।; D. has only अभिधानो नाम शब्दश्च।

७ अर्मा चक्षुरो° D.; अर्मो चक्षु° A.

८ अर्मन्निति° A.; om. D.

९ Śiśup. 3, 37.

१० Śiśup. 4, 58 (eds. अद्रि तप्तास्° द्वाच्च चरन्ति).

Digitized by Google

सौधः सुधाधवलितम् ॥ * ॥ रेणुर्धूलिः ॥ * ॥ तलोऽधो रूपं च ॥ * ॥ लोमा तनूरुहम् ॥ * ॥ पटं वस्त्रविशेषः ॥ * ॥ विहायः । आकाशम् ॥ ७४ ॥

उटजचापनपुंसकपातका
भुवनकोटरपल्लवगोमयाः ।
अतिखरं हरिचन्दनमूलकौ
भवनसंक्रमगाण्डिवपत्तनाः ॥ ७५ ॥

उटजः पर्णशाला ॥ * ॥ चापो धनुः । यथा परिमलस्य ।

विपक्षदृङ्मृक्षकृता नितान्तं भूलेखया कुञ्चितयोल्लसन्त्या ।
नाकारमात्रेण परंतपस्य यस्याञ्चकारि क्रियया[1] ॥

नपुंसकं शण्ढः । स नपुंसकोऽभवदिति भाष्यकारवचनात्पुंस्यपि ॥ * ॥ पातकः पापम् ॥ * ॥ भुवनो लोकः ॥ * ॥ कोटरं निष्कुटः ॥ * ॥ पल्लवं किशलयम् । यथा ।

लोलोष्ठमौष्टकमुदग्रमुखं तरूणाम्
अभ्रंलिहानि लिलिहे नवपल्लवानि[2] ॥

गोमयः करीषः ॥ * ॥ अतिखरम् । अर्धस्तु लोकादवसेयः ॥ * ॥ हरिचन्दनम् । हरेरिन्द्रस्य चन्दनो हरिचन्दनः । स चातिपीतः शीतश्च[3] देववृक्षश्च ॥ * ॥ मूलकं शाकविशेषः ॥ * ॥ भवनो गृहम् ॥ * ॥ संक्रमः । दुर्गसंचरः सेत्वादिः ॥ * ॥ गाण्डिर्विद्यते यस्य । गाण्डजगात्संज्ञायामित्यनेन[4] वप्रत्यये । गाण्डिवोऽर्जुनधनुः ॥ * ॥ पत्तनोऽधिष्ठानम्[5] ॥ ७५ ॥

---

१ परंतपस्य वस्त्राध्वकारि° A.; D. om. from यथा परिमलस्य ।

२ Śiś. 5, 65; D. has the whole verse, but corrupt.

३ शीतस्य च D.; °पीतशीतश्च A.

४ Pâṇ. v. 2, 110.

५ D. om. from सो दुर्गसंचरः सेत्वादिः

कर्पूरकुर्पासकषष्ट्युशीरा[1]
गाण्डीवनिष्ठेवसुपर्णभस्त्राः[2]।
पिण्याकपुस्ती नखरेषुषण्डा[3]
वैनीतकं द्वीपिनमारकूटम्[4] ॥ ७६ ॥

कर्पूरं घनसारः ॥ * ॥ कुर्परेऽस्ते। कुर्पासकः[5]। स्त्रीणां कञ्चुकिकाख्यः[6] ॥ * ॥ षष्टिः संख्यावाची[7]। अन्ये पुनः स्त्रियामेव मन्यन्ते ॥ * ॥ उशीरो वालकम् ॥ * ॥ गाण्डी विद्यते यस्य। गाण्डीवगात्संज्ञायामित्यनेन[8] वप्रत्यये। गाण्डीवोऽर्जुनधनुः ॥ * ॥ निष्ठेवो निष्ठीवनम्[9] ॥ * ॥ सुपर्णो गरुडः[10] ॥ * ॥ भस्त्रम् ॥ * ॥ पिण्याकः। सुगन्धिषवकीप्रभवधूपस्त्रिवकल्कं च ॥ * ॥ पुस्तं लेप्यकर्म ॥ * ॥ नखरं नखः ॥ * ॥ इषुशरः। स्त्रीपुंसयोरित्यन्ये ॥ * ॥ षण्डः[11] पद्मादीनां समुदायः ॥ * ॥ वोढुपरंपरया वाह्यते यत्तद्विनीतानामिदम्। वैनीतकं[12] यानम् ॥ * ॥ द्वीपिनं व्याघ्रः ॥ * ॥ आरकूटं पित्तलम्[13] ॥ ७६ ॥

[मञ्जीरनूपुरशफाणुतरण्डमेढ्राः[14]
संसारचूर्णवटवासरजन्तुसत्त्वाः।

---

१ कर्प्पूरकर्प्पासक° E.; D. om. śloka 76 with comment.

२ निष्टिव C., om. A.; सवर्ष° A.E.; °सुवर्ष° B. C.

३ पिणाकपस्ती° F.; पक्षाक° नखेषुषण्डा A.; खंडा B. C. E. F.

४ वैनीतिकं° A. B. C. E. (D. n. १).

५ कूर्परे° कूर्पासकः F.

६ Thus MSS. (कंचुकि° A.); Kshîr. A. K. 2, 6, 3, 19: कुर्परेऽस्ते कुर्पास स्त्रीणां कञ्चुकिकाख्यः ॥

७ षष्टि सख्यावाची C.; षष्टिः° F.

८ Pâṇ. v. 2, 110.

९ निष्टिवो निष्ठावणं C.

१० सुवर्ष° B. C.; गरुडं B. C. F.; cf. Hem. Anek.; सवर्षो। सुवर्षस्तु यमपूज्ञः। A.; for D. see note १.

११ खंडः B. C. F.

१२ वैनीतिकं MSS.; D. see note १.

१३ पित्तला A. B.; पित्तलाः C.; for D. see note १.

१४ °ग्निफाणु° B. C.; A. D. E. om. this śloka and comment.

Digitized by Google

कोलाहलः ककुभजानुभगाद्वेषा
विन्नस्वभूर्जलशुनाः शललं च गेहम् ॥ ७७ ॥]

मञ्जीरो हंसकम् ॥ * ॥ नूपुरं तुलाकोटिः ॥ * ॥ अर्फं[1] खुरः ॥ * ॥ अणुः सूक्ष्मपरिमाणविशेषोऽन्नविशेषस्य ॥ * ॥ तरण्डं शवः ॥ * ॥ मेढ्रं मेहनम् । यथा । ह्रस्वं वृत्तं मृदु स्थूलं मेढ्रं शस्तं[2] महामुखं ॥ * ॥ संसारं जगत् ॥ * ॥ चूर्णं घोदः ॥ * ॥ वटं तुल्यता गोलस्य[3] ॥ * ॥ वासरं दिनम् । यथा ।

वासराणि कतिचित्कथंचन स्थाणुना पदमकार्यत प्रिया[4] ॥

जन्तुसत्त्वेति । जन्तौ प्राणिन्यभिधेये सत्त्वं पुंनपुंसकं भवति । यथा । वन्याग्निनेव्यग्निव दुष्टसत्त्वान्[5] ॥ जन्ताविति किम् । सत्त्वं द्रव्यं प्रकृतिगुणस्य ॥ * ॥ कोलाहलम् । अव्यक्तो ध्वनिः ॥ * ॥ ककुभो वीणावादनम् ॥ * ॥ जानु । अष्ठीवान् । यथा । जानुमस्य गृह्णीयात्[6] ॥ * ॥ भगं योनिः ॥ * ॥ अब्दं संवत्सरः ॥ * ॥ वेषो नेपथ्यम् ॥ * ॥ विन्ने खम् । विन्ने वाच्ये खं पुंनपुंसकम् । खाः । खानि ॥ * ॥ भूर्जो वृक्षविशेषः ॥ * ॥ लशुनः । रसोनः स्निग्धस्योष्णस्य लशुनः कटुको गुरुः ॥ * ॥ शललं सल्लकसूची[7] ॥ * ॥ गेहं वेश्म ॥ * ॥ अत्रणदन्ताभिप्रायेणैते दर्शिताः ॥ ७७ ॥ इत्यर्धर्चादिः ॥

राजदन्तार्पितोतावक्लिन्नपक्षपरःशताः ।
नृवरोऽग्रेवणं भृष्टलुञ्चितो लिप्तवासितः[8] ॥ ७८ ॥

राजदन्तादौ समासे पूर्वनिपातो न भवति[9] । दन्तानां राजा ।

---

१ शिर्फं B. C.
२ मेढ्रः शिश्नं F.; cf. Bṛihats. 68, 7-8.
३ गुलक्ष्य B. C.
४ Kum. S. 8, 13.
५ Raghuv. 2, 8.
६ मृन्नीयात् B.; मृज्नीयात् F.
७ सललं सल्लकपूर्वः C.
८ पक्षग्रः॰ नृवराग्रवर्ण॰ A.
९ F. om. न भवति.

Digitized by Google

राजदन्तः। प्रमुखदृश्यदन्तदयम्। अच षष्ठीत्यनेन[1]। यदा तु राजा च दन्तश्चेति समासान्तरं[2] तदा न नियमः ॥ * ॥ पूर्वमुतम्[3] आतानवितानीकृतं पश्चादर्पितम्। अर्पितोतम्। यथा।

व्योत्नापटे तुहिनदीधितिनार्पितोते[4]
द्यौरास नग्नमुषितेव हृतेऽरुणेन[5]।
व्योमोप्नगाढमिव भानुमरीचिसख्यं[6]
विक्लिन्नपक्वफलिनीफलवच्च बभ्रे ॥[7]

पूर्वं पक्वं पश्चादवक्लिन्नम् आर्द्रम्। अवक्लिन्नपक्वम्।[8] अनयोरेकादिसूत्रेण ॥ * ॥ यतात्परे। परःयताः। यथा।

स जवेन पतन्परःयतानां पततां व्रात दवारवं वितेने[9]।

मृषोदरादित्वात्सकारागमः। अच पञ्चमीसूत्रेण[10] ॥ * ॥ ना चासौ वरश्च। नृवरः। प्रधानपुरुषः ॥ * ॥ वनस्थाये। अग्रेवणम्। अत एव पाठात्सप्तम्या अलुक्। अव्ययीभावत्वात्।

बहुधा भिन्नमर्माणो[11] भीमाः खरणसादयः।
अग्रेवणं वर्तमाने प्रतीच्यां चन्द्रमण्डले ॥

वनस्थायम् अग्रेवणमित्येके[12]। निपातनात्सत्वम्। अच षष्ठीसूत्रेण ॥ * ॥ पूर्वं लुञ्चितम् अपनीतं पश्चाद्दृष्टं पक्वम्। भ्रष्टलुञ्चितम्। यथा।

---

१ Cf. Pâṇ. ii. 2, 8.

२ यदा तु राजदंतश्चेति° A.; °समासांतरं C.

३ पूर्वमूतं F.

४ दीधिनार्पितोते F.

५ हतेऽरुणेन A. B. C.

६ यस्तं A. D. F.; सस्तविक्लिन्न° C.; D. om. from the beginning of śloka 77 to व्योमोप्नगाढमिव.

७ °फलवधुपूर्वम्° C.; पक्किनीफलवच्च वधो D.

८ A. D. add विक्लिन्नं.—For एकादिसूत्रेण cf. Pâṇ. ii. 1, 49.

९ Kirât. 13, 26.

१० Cf. Pâṇ. ii. 1, 37-9.

११ भिन्नधर्माणो all MSS.; Bhaṭṭ. 9, 93.

१२ वनस्थायमग्रवणमित्येके F.

Digitized by Google

यद्भृष्टलुञ्चितग्रग्रेव ग्रग्राङ्कपाची[1] ॥ * ॥

पूर्वं वासितं भावितं पश्चाल्लिप्तं दिग्धं लिप्तवासितं। अनयोरेकादिसूत्रेण। यथा। यल्लिप्तवासितमिव द्युसदोऽजवातैः ॥ ७८ ॥

उप्तगाढकुरुश्रेष्ठौ सिक्तसंमृष्टसंयुतौ[2]।
उत्तमर्णाधमर्णौ च परःसहस्र इत्यपि ॥ ७९ ॥

पूर्वं गाढम् अवलोडितं पश्चादुप्तम् उप्तगाढम्। अचैकादिसूत्रेण। यथा। व्योमोप्तगाढमिव भानुमरीचिसख्यम्[3] ॥ * ॥ कुरुश्चासौ श्रेष्ठश्च। कुरुश्रेष्ठः ॥ * ॥ पूर्वं संमृष्टं पश्चात्सिक्तम्। सिक्तसंमृष्टम्[4] ॥ सिक्तसंसृष्टमित्यन्ये[5] ॥ अचैकादिसूत्रेण। यथा।

यत्सिक्तसृष्टमसृणेव नभोऽङ्गणश्रीः[6] ॥

ऋण उत्तमः। उत्तमर्णः ॥ ऋणेऽधमः। अधमर्णः। अत्र सप्तमी श्रौण्डैरित्यनेन[7] ॥ * ॥ सहस्रात्परे। परःसहस्राः। अत्र पञ्चमीत्यनेन ॥ शतसहस्राविति उपलक्षणम्। तेन

परोरजोभिः खगुणैरगाधः सगाधिपुत्रोऽपि गृहानुपेति[8]।

इत्यपि सिद्धं भवति। पृषोदरादावणेतद्द्रष्टव्यम्[9] ॥ ७९ ॥

कुबेरकेशवौ श्रज्ञातपसौ विष्णुवासवौ।
सोमरुद्रौ शिरोजानु चित्रास्वाती शिरोविजु[10] ॥ ८० ॥

---

१ यल्लिप्तवासितमिव द्युत्पदोज्जवातैर्यत्सिक्तमृष्टमसृणेव नभोंगणश्रीः यद्भृष्टलुञ्चितग्रसेव ग्रग्राङ्कपाची तत्प्रातरासभवे। दिवचालसूर्यः। D.

२ Thus D. E.; सिक्तसंसृष्टसंयुतौ A. B. C. F.

३ °ग्रख्यं A. D.; C. om. from पूर्वं गाढं to कुरुश्रेष्ठः.

४ पूर्वं संसृष्ट° सिक्तसंसृष्टं MSS.

५ °समृष्टमित्यन्ये C.; । संमृष्ट° F.

६ नभोगणश्रीः A.; ऽगणः श्रीः B.

७ Pân. ii. 1, 40.

८ Anarghar. (Calc. S. 1782) 1, 21.

९ एतत्सिद्धं द्रष्टव्यं F.; cf. śl. 145-6.

१० °चित्रस्वाती° F.; शिरोविजुः B. C. F.; शिरोविदुः A.; शिरोविज्ञः D.

Digitized by Google

कुबेरस्य केशवस्य । कुबेरकेशवौ । पूज्यद्वारेण ॥ * ॥ श्रद्धा च तपस्य । श्रद्धातपसी । लघुद्वारेण ॥ * ॥ विष्णुश्च वासवश्च । विष्णुवासवौ । वर्णाद्वर्णानामनुपूर्वमित्यनेन[1] ॥ * ॥ सोमश्च रुद्रश्च । सोमरुद्रौ । पूज्यद्वारेण ॥ * ॥ शिरश्च जानुश्च । शिरोजानु ॥ * ॥ चिच्चा च खातिश्च । चिच्चाखाती ॥ * ॥ शिरश्च विष्णुश्च । शिरोविष्णु ।[2] विष्णुर्ग्रीवा स्कन्धो वा । अषखियुद्द्वारेण[3] ॥ भोजस्तु शिरोविजू[4] इत्याह ॥ ८० ॥

जंपती दंपती जायापती पुचपती तथा ।
गौपालिधानपूलासविष्वक्सेनार्जुना मताः[5] ॥ ८१ ॥

जाया च पतिश्च । जंपती । दंपती । जायापती । इह पाठाज्जायाशब्दस्य जंदंभावश्च[6] ॥ * ॥ पुचश्च पतिश्च । पुचपती । एषामषखियुद्द्वारेण ॥ * ॥ गाः पालयतीति गोपालः । तस्यापत्यं गौपालिः[7] । स धीयते यस्मिंस्तद् गौपालिधानम् । गोमोऽवस्थानं वा[8] ॥ पूलानस्यतीति पूलासः ॥ गौपालिधानं च पूलासश्च । गौपालिधानपूलासम् ॥ अजाद्यदारेण[9] ॥ * ॥ विष्वक्सेनश्चार्जुनश्च । विष्वक्सेनार्जुनौ । अजाद्यदारेण[10] । यदा पूज्यता न विवक्ष्यते तदा परनिपातार्थः पाठः । अथवा । विष्णोरन्यो विष्वक्सेनः ॥ ८१ ॥

---

१ Cf. Pâṇ. ii. 2, 34, Vs. 5, 6.

२ शिरोविजुः ।° A. B. C. F.; विजुग्रीवा° A. B. C.; विष्वश्च । शिरोविष्व । विष्वग्रीवा° D.

३ युत् (MSS. mostly यु) prâtip. in द् and ज; cf. Pâṇ. ii. 2, 32.

४ शिरोविदू A.; शिरोविष्व D.

५ गोपालिधान° A.

६ जाया च पतिश्च जायापती ॥ C.

७ गोपालिः A.

८ गामो वा अवस्थानं वा A. D.; गावोऽव° F.

९ Cf. Pâṇ. ii. 2, 34.

१० A. and D. read this reference generally अजाद्यदारेण; B. C. and F. throughout अजाद्यदारेण; [D. here अजाद्यदंत्तदा°, and once अजाद्यतदा°] cf. P. ii. 2, 33.

Digitized by Google

वैकारिमतं तण्डुलकिण्वावन्त्यश्मकाश्च दारगवम्।
केशश्मश्रु स्नातकराजानौ नग्नमुषितश्च ॥ ८२ ॥

विकारस्यापत्यं वैकारिः। स च मतश्च। वैकारिमतम्। अत्याज्-द्वारेण ॥ शाकटायनस्तु वैकारेर्मतौ वैकारिमतः। गाजयतीति गाजः। वाजयतीति[1] वाजः। गाजश्च वाजः। गाजवाजः[2]। वैकारिमतश्च गा-जवाजश्च। वैकारिमतगाजवाजमित्याह ॥ * ॥ तण्डुलाश्च किण्वं च। तण्डुलकिण्वम् ॥ * ॥ अवन्तिर्नाम राजा जनपदो वा। अश्मका नाम जनपदः[3]। अवन्तयश्चाश्मकाश्च। अवन्त्यश्मकम्। अजाद्यद्द्वारेण ॥ * ॥ दाराश्च गौश्च। दारगवम्। अत्याज्द्वारेण ॥ * ॥ केशाश्च श्मश्रु च[4]। केशश्मश्रु ॥ केशश्मश्रू[5] इति भोजः ॥ असखियुद्द्वारेण ॥ * ॥ स्नातकः समाप्तवेदः। स च राजा च। स्नातकराजानौ। अत्याज्द्वारेण ॥ * ॥ पूर्वं मुषितः पश्चान्नग्नः। नग्नमुषितः। यथा।

क्षौरास्त्र नग्नमुषितेव हृतेऽरुणेन[6]।

एकादिसूत्रेण ॥ ८२ ॥

दृषदुपलं पुच्छपशू पूलासकुरण्डगाजवाजानि[7]।
आरड्वायनिचान्धनिसिञ्जास्थोशीरबीजानि[8] ॥ ८३ ॥

दृषच्चोपलं च। दृषदुपलम्। अजाद्यद्द्वारेण ॥ * ॥ पुच्छस्य पशुश्च।

---

१ वाजयंतीति C.

२ गाजश्च वाजश्च गाजवाजौ F.

३ अश्मकोवाजनाम जनपदः A.; अश्मको नाम° F.

४ श्मश्रुश्च B. C. F.

५ केशश्मश्रु A.; om. C.; B. om. केशश्मश्रु.

६ नग्नमुषिते° F.; हृतेऽरु° A.B.C.D.

७ पूलांश्म° B. C.

८ आरड्वायनिचांधविञ्जिका° A.; आरड्वापनि° D.; आरड्वायनिवांधनि° E.; आरड्वायनि° D. C. F.—Cf. śl. 83 (अरड्वश्च। आरड्वी?) and 231 (*tikādi* where MSS. and Kâś. V. आरड्वायनि!).

Digitized by Google

पुचपप्रू । असखियुद्द्वारेण ॥ * ॥ पूलासस्य कुरण्डस्य । पूलासकुरण्डम्[१] ॥ शाकटायनस्तु कुरण्डानां स्थलं कुरण्डस्थलम् । कुरण्डस्थलं च पूलासस्य । कुरण्डस्थलपूलासमित्युवाच[२] ॥ * ॥ गाजस्य वाजस्य । गाजवाजम् ॥ अन्यस्तु । गजानां समूहो गाजम् । वाजिनां समूहो वाजम् । गाजं च वाजं चेति गाजवाजम् । तत्प्रत्ययस्तु[३] गणपाठादेव न भवतीत्याह ॥ अनियमप्रसङ्गे वाजशब्दस्यैव परनिपातः ॥ * ॥ आरटतीति । आरट्टो नाम कश्चित् । तस्यापत्यम् आरट्टायनिः[४] । तिकादित्वात् फिञ्[५] ॥ चर्म्यं भर्त्र्यं धनमस्य । तस्यापत्यं चान्धनिः[६] ॥ आरट्टायनिश्च चान्धनिश्च । आरट्टायनिचान्धनि[७] । अल्पाज्द्वारेण ॥ कश्चिद् आरट्टायनिबन्धनीत्याह[८] । पाणिनिस्तु । आरट्टायनिबन्धकीत्याह[९] ॥ * ॥ सिञ्चनं सिञ्चा । आख्यानम् आख्या । सिञ्चा चाख्या च । सिञ्चाख्यम् । अचानियमे प्राप्ते नियमः ॥ * ॥ उशीरं च बीजं च । उशीरबीजम् ॥ शाकटायनस्तु । उशीरं बीजं यस्मिन् । उशीरबीजो नाम पर्वतः । सिञ्चायां तिष्ठतीति सिञ्चास्थः पर्वतः । उशीरबीजश्च सिञ्चास्थश्च । उशीरबीजसिञ्चास्थम्[१०] ॥ अल्पाज्द्वारेण ॥ ८३ ॥

---

१ °कुरंडं A.; पूलाश्च° twice B. C.

२ A. thrice कुरंड° (om. कुरण्डानां स्थलं); B. C. twice पूलाश्च°.

३ तत्प्रापयस्तु A.; तत्प्रयोजनस्तु C.; ततः प्रत्ययस्तु D.; A. om. from गाजं च to गाजवाहम.

४ आरट्टो °आरट्टायनिः A.; D. corr. आरट्टा° आरट्टायनिः (orig. ट्ट); आरट्टो° आरट्टायनिः B. C. F.; cf. p. १२३, note ८.

५ पिञ् A. B. (*tikâdi* śl. 231).

६ चर्म्म भर्त्र्यं °चाधनिः A.; चं भर्त्र्यं° F.; चर्म्यं भर्त्र्यं C.; वर्म्यं °वंधनीत्याह D.

७ आरट्टायनि° twice B. C. F.; आरंडायनिश्च रांधनिश्च आरट्टायनिचांधनि A.

८ ? आरट्टायनचांधतीत्याह A.; D. om. from आरट्टायनिश्च, but see note ६.

९ आरट्टा° B. C. F.; A. D. om. from पाणिनिस्तु [*gaṇa* Pâṇ. ii. 2, 31, आरत्वायनिबन्धकी; id. Kâś. V. ed.; MS. I. O. 2440 आद्यायनबंधकी; MS. Beng. As. Soc. आरधापनिवंधुकी].

१० उसीरवीजश्च° उसीर° D.

Digitized by Google

विषयेन्द्रियाधरौष्ठाः स्थलपूलासं च दारजारौ च ।
भार्यापती उलूखलमुसलाक्ष्मिभुवगजाश्वशूद्रार्यौः[1] ॥ ८४ ॥

विषयाश्चेन्द्रियाणि च । विषयेन्द्रियाणि । अजाद्यद्दारेण ॥ * ॥ अधरश्चौष्ठश्च । अधरौष्ठम्[2] । अल्याज्दारेण ॥ * ॥ स्थलं च पूलाशश्च[3] । स्थलपूलाशम् ॥ * ॥ दारयति हृदयमिति दारः । जरयतीति[4] जारः । दारश्च जारश्च । दारजारौ । अचानियमप्रसङ्गे दारशब्द एकवचनान्तोऽपि दृश्यते । यथा । धर्मप्रजासंपन्ने दारे नान्यं कुर्वीत ॥ * ॥ भार्या च पतिश्च । भार्यापती । असखियुद्द्वारेण ॥ * ॥ उलूयन्त इत्युल्वो धान्यानि । आप्ये क्विप् । उल्वः[5] खल्यन्ते संचीयन्ते प्रक्षिप्यन्त इति । उलूखलम् । तच्च मुसलं च । उलूखलमुसलम्[6] ॥ * ॥ अक्षिणी च भ्रुवौ च । अक्षिभ्रुवम् । अत एव पाठात्समाहारान्तः ॥ अनयोरल्याज्दारेण ॥ * ॥ गजश्चाश्वश्च । गजाश्वौ ॥ * ॥ शूद्रश्चार्यश्च । शूद्रार्यौ ॥ अनयोरजाद्यद्दारेण ॥ ८४ ॥

काकमयूरौ मेधातपसौ दारार्थपाण्डुधृतराष्ट्राः ।
नरनारायणदीक्षातपसौ चिरण्यबाल्हीकौ ॥ ८५ ॥

काकश्च मयूरश्च । काकमयूरौ ॥ * ॥ मेधा च तपश्च । मेधातपसौ । अनयोरर्थलघुद्वारेण[7] ॥ * ॥ दाराश्चार्थश्च । दारार्थम् । अजाद्यद्दा-

---

१ °उदूखल° A. B. D.; मुग्रला° A. B. C. F.

२ अधरश्च ओष्ठ च °D.; अधरोष्ठ B. C. F.

३ पूलाशं च C.; °शू° D.

४ जारयतीति A. D.; thus also MS. Kshîr. on A. K. 2, 6, 1, 35.

५ उलूयंत इति° D.; इति उल्वा° उल्वः C.; इति उल्वो° उल्वः F.

६ °उदूखल° A. B. D. F.; °मुग्रल° A. B. C. F. throughout.

७ अनयोरर्थलघु° A. perhaps right; °अनयोरपालघुद्वारेण D.; cf. P. ii. 2, 34 Vs. 3 and 4.

Digitized by Google

रेण ॥ * ॥ पाण्डुश्च धृतराष्ट्रश्च । पाण्डुधृतराष्ट्रौ । वर्णभ्रातृणामनुपूर्वमित्यनेन ॥ * ॥ नरश्च नारायणश्च । नरनारायणौ ॥ * ॥ दीक्षा च तपश्च । दीक्षातपसी ॥ अनयोरर्थलघुदारेण[1] ॥ * ॥ चिरत्थश्च बाल्हीकश्च । चिरत्थबाल्हीकौ राजानौ । अल्पाज्दारेण । पाणिनिवामनमतेन ॥ शाकटायनस्तु बल्होऽस्यास्तीति बल्ही । बल्हीव बल्हिकः[2] । संज्ञाप्रतिषत्योरित्यनेन[3] के । चिरत्थबल्हिकम्[4] ॥ भोजस्तु चिरत्थबाल्हिकावस्त्रिमग्गे[5] पपाठ । उणादिमध्ये तु मृद्वीका तिन्तिडीक बाल्हीक वल्लीक कल्लीक किङ्किणीका पुष्करीक चञ्चरीक समीक प्रतीक पूतीक पर्फरीकादय[6] इत्यस्मिन् बाल्हीकमिति प्रादर्शयत्[7] ॥ एतेषामेतैः सूत्रैः प्राङ्निपाते प्राप्ते परनिपातः क्रियते ॥ ८५ ॥

पूर्वोऽप्यर्थो धर्मतः शब्दकामाद्
इन्द्रार्कान्तेभ्योऽग्निचन्द्रादयोऽपि ।
भीष्मादित्यं द्रोणचन्द्राच्च राहोश्[8]
चन्द्रो भीष्मो वा वसन्ताद्विभाष्यः ॥ ८६ ॥

पूर्वोऽप्यर्थ इति न केवलं धर्मशब्दकामेभ्यः पूर्वोऽर्थशब्दः परोऽपि द्रष्टव्यो गणपाठसामर्थ्यात् । अर्थश्च धर्मश्च । अर्थधर्मौ । धर्मार्थौ ॥

---

१ अर्थाल्लघु° D.

२ ?Thus A.(व°); बाल्हो° बाल्ही। बाल्हीव बाल्हिकः B. C. D.; बाल्हो °बाल्ही। स एव बाल्हीकः F.

३ संज्ञाप्रश्नयोर् A.; cf. Pāṇ. v. 3, 96-7.

४ Thus A. D. F.; चिरत्थबाल्हिकं B. C.

५ चिरत्थबाल्हीकाव° F.

६ तृद्वीका D.; तिन्तिडीक A. D.; बाल्हिक C.; B. C. F. om. वल्लीक; B. om. चञ्चरीक; वरीक C.; C. om. प्रतीक; A. om. पूतीक; cf. Uṇ. S. 4, 16-25.

७ प्रदर्शयति C.; प्रदर्शयत B.; प्रादर्शयत D.; प्रदर्शयंत F.

८ भीष्मादित्यौ° E.; भीष्मादित्यद्रोण° C. F.; °द्रोणचंद्रान्वरोहोश् A.

Digitized by Google

अर्थशब्दौ । शब्दार्थौ ॥ अर्थकामौ । कामार्थौ ॥ * ॥ न केवलम् अग्नि-चन्द्रादयः पूर्वं भवन्ति परतोऽपि । अग्निश्चेन्द्रश्च । अग्नीन्द्रौ । इन्द्राग्नी ॥ * ॥ चन्द्रार्कौ । अर्कचन्द्रौ ॥ * ॥ आद्यन्तौ । अन्तादी ॥ * ॥ भीमद्रोणौ । द्रोणभीमौ ॥ * ॥ चन्द्रादित्यौ । आदित्यचन्द्रौ ॥ * ॥ राहुचन्द्रौ । चन्द्रराहू ॥ * ॥ ग्रीष्मवसन्तौ । वसन्तग्रीष्मौ ॥ ८६ ॥

शुक्रशुचिकरभरासभगुणवृद्धिसमीरणाग्निकुशकाशाः ।
सर्पिर्मधुदीर्घलघू सतपःश्रुतपाणिनीयरौढीयाः ॥ ८७ ॥

शुक्रशुच्यादयः शब्दाः शब्दसूचशब्दपर्यन्ता विपर्ययेणापि भवन्ति ॥ शुक्रश्च शुचिश्च । शुक्रशुची । शुचिशुक्रौ ॥ * ॥ करभरासभौ । रासभकरभौ ॥ * ॥ गुणवृद्धी । वृद्धिगुणौ ॥ * ॥ समीरणाग्नी । अग्निसमीरणौ ॥ * ॥ कुशकाशम् । काशकुशम् ॥ * ॥ सर्पिर्मधुनी । मधुसर्पिषी ॥ * ॥ दीर्घलघू । लघुदीर्घौ ॥ * ॥ सतपःश्रुतेति । सह तपःश्रुताभ्यां वर्तन्ते । सतपःश्रुताः । सतपःश्रुताश्च ते पाणिनीयरौढीयाश्च ॥ तपःश्रुते । श्रुततपसी ॥ * ॥ पाणिनीयरौढीयाः । रौढीयपाणिनीयाः[1] ॥ ८७ ॥

भीमसेनार्जुनावेतौ कपित्थाश्वत्थसंयुतौ ।
शकृन्मूत्रं कृतद्वन्द्वा[2] व्यत्यासेन सतां मताः ॥ ८८ ॥

भीमसेनार्जुनौ । अर्जुनभीमसेनौ ॥ * ॥ कपित्थाश्वत्थौ । अश्वत्थकपित्थौ ॥ * ॥ शकृन्मूत्रम् । मूत्रशकृत् ॥ * ॥ एतेषां स्वीयस्वीयसूत्रेण नियमे प्राप्ते गणपाठादिकल्पः ॥ सतां मता इति साभिप्रायम्[3] । तेन

---

१ C. has throughout रौठीय.
२ सशब्दसूत्र° A.; शब्दसूत्रपर्यंता F.
३ सतां मतः । मतांसतः । सतां मतां सत्व इति साभिप्रायं C.; F. adds वचनं.

जित्याविपूयविनीयाः । विपूयविनीयजित्याः ॥ देवापिग्रन्तनू । ग्रन्तनु-देवापी इत्यादयोऽपि भवन्ति ॥ ८८ ॥ इति राजदन्तादिः ॥

कडारः पिङ्गलो गौरो भिक्षुकः खलतिस्तनुः ।
शोणः कुणटो वृकः खञ्जो बठरो गडुलस्तथा[1] ॥ ८९ ॥

कडारादयः शब्दाः कडाराः कर्मधारये वेत्यनेन पूर्वं वा निपतन्ति । कडारजैमिनिः । जैमिनिकडारः[2] ॥ * ॥ पिङ्गलमाण्डव्यः । माण्डव्यपिङ्गलः[3] ॥ * ॥ गौरगोतमः । गोतमगौरः[4] ॥ * ॥ भिक्षुकदाक्षिः । दाक्षिभिक्षुकः ॥ * ॥ खलतिखारपायणः । खारपायणखलतिः ॥ * ॥ तनुव्रणबिन्दुः । व्रणबिन्दुतनुः । तनुशब्दः क्षुद्रवाची[5] ॥ * ॥ ग्रौष्ठखिगुः । खिगुग्रौष्ठः[6] ॥ * ॥ कुष्ठमाष्टिः । माष्टिकुष्ठः[7] ॥ * ॥ वृकग्राष्टिक्षः । ग्राष्टिक्षवृकः ॥ * ॥ खञ्जवात्यः । वात्यखञ्जः[8] ॥ * ॥ बठरच्छान्दसः । छान्दसबठरः[9] ॥ * ॥ गडुलगालवः । गालवगडुलः ॥ ८९ ॥

वृद्धखोडाविमौ काणः कूटखेलौ च कीर्तितौ ।
आहिताग्निगतार्थौढभार्यापीतघृतप्रियाः ॥ ९० ॥

वृद्धमनुः । मनुवृद्धः ॥ * ॥ खोडकहोडः । कहोडखोडः ॥ * ॥ काणद्रोणः । द्रोणकाणः ॥ * ॥ कूटदाक्षिः । दाक्षिकूटः ॥ * ॥ खेल-

---

१ खंडो बठरो° C.; बठरोदुलश्च-था A.; बंठरो° F.

२ कडारजैमलिः । जैमलिकडारः (जैमलिः क° A.) A. B. D.

३ पिंगलमाडव्यः । माडव्यपिंगलः F.

४ गौरगौतमः । गौतमगौरः D. F.

५ क्षुद्राऽर्थवाची F.

६ खिगुग्रौंडः D.; ग्रौंडखिगुः । खिगुग्रौंडः F.

७ कुंडमांडिः । मांठिकुंटः A.

८ खंडवात्यः । °खंडः । C.

९ वठरः च्छांदसः° A.; बंठर° बंठरः F.; ववर° । °ववट । D.

Digitized by Google

ग्राक्षिक्षः । ग्राक्षिक्षखेलः ॥ * ॥ एतेषां गुणवचनत्वात्पक्षे परत्वार्थं वचनम् ॥ * ॥ इति कडारादिः ॥

एते शब्दा बहुव्रीहौ प्राग्पूर्वनिपाताः सन्तो[1] वाहिताग्न्यादावित्यनेन पूर्वपदत्वभाजो वा भवन्ति ॥ आहितोऽग्निर्येन स आहिताग्निः । अग्न्याहितः । यथा च भट्टिकाव्ये ।

अग्न्याहितजनप्रश्ने विजिगीषापराङ्मुखे ।
कस्मादा नीतितीक्ष्णस्य संरम्भस्तव तापसे[2] ॥

यथा वा । प्रतिग्रहणमशीर्णज्योतिरग्न्याहितानां
विधिविहितविरिञ्चैः[3] सामिधेनीरधीत्य ।
हुतगुरुदुरितौघध्वंसमध्वर्युवर्यैर्
हुतमयमुपलोढे साधु सांनाय्यमग्निः[4] ॥

गतोऽर्थो यस्यासौ गतार्थः । अर्थगतः ॥ * ॥ ऊढा भार्या येन । ऊढभार्यः । भार्योढः ॥ * ॥ पीतं घृतं येन । पीतघृतः । घृतपीतः ॥ * ॥ प्रियशब्दस्य केवलस्येहोपदेशादुत्तरपदमनित्यम् । तेन प्रियगुडः । गुडप्रियः ॥ प्रियविश्वः । विश्वप्रियः ॥ प्रियदिः । दिप्रियः ॥ एतेन वाहिताग्न्यादयो गणाधीता एव ज्ञाप्या नाधिकप्रयोगाः[5] । तेनाहितवसुरित्यादौ यथाप्राप्तं स्यान्न विकल्पः ॥ ९० ॥

जाताह्नतः सपुचोऽथ तैलं मद्यं च पीततः ।
गङ्गादेः सप्तमी क्तान्तं जातिकालसुखादितः ॥ ९१ ॥

---

१ सतो A. D.; संति C.; cf. P. ii. 2, 37.

२ Bhaṭṭ. 9, 111; °नीतीतिक्ष्ण° D.; नीतिनिष्णस्य ed. 1828; B. C. F. om. from भट्टिकाव्ये to यथा वा.

३ Śiśup. 4, 41; °विरञ्चैः A.; विरिञ्चैः D.

४ B. C. F. om. from हुतगुरु°.

५ एतेन वाहि° B. C.; नाधिकाप्रयोगाः C.

Digitized by Google

आता दन्ता अस्य। आतदन्तः। दन्तआतः॥*॥ पुचो आतोऽस्य। पुचआतः। आतपुचः॥*॥ तैलं पीतं येन। पीततैलः। तैलपीतः॥*॥ मद्यं पीतं येन। मद्यपीतः। पीतमद्यः॥*॥ गड्वादेः सप्तमीति गड्वादिभ्यः सप्तम्यन्तो[1] बहुव्रीहौ पूर्वं वा निपतति। गडुः कण्ठे यस्य। गडुकण्ठः। कण्ठेगडुः[2]॥ गडुशिराः। शिरसिगडुः[3]॥ गुरुमध्यः। मध्येगुरुः[4]॥ गुर्वन्तः। अन्तेगुरुः[5]॥ इन्दुर्मौलौ यस्य। इन्दुमौलिः। मौलीन्दुः। यथा च।

मौलीन्दोर्मौलिभूषा मनसिजनृपतेरान्तरः केलिकोशः
प्राचीदिङ्नायिकायाः[6] कनकविरचितप्रौढताडङ्ककान्तिः[7]।
पीयूषासारवर्षी त्रिभुवननयनानन्दसन्दोहपात्रं
देवः श्वेतभानुर्जयति कुमुदिनीबान्धवः सिन्धुजन्मा॥

भोजस्तु नेन्दादिभ्य[8] इत्यनेन निषेधान्मौलीन्दुरिति मन्यते[9]॥ समर्थाधिकाराद् बद्धेगडुरित्येव[10] भवति। तथा अग्निश्रेखरः। पद्मनाभः। ऊर्णनाभः। अङ्कुरपाणिः। पद्मपाणिरित्यादौ परनिपात एव॥*॥ क्रान्तमित्यादि। क्रान्तं च वा पूर्वं निपतति॥ आतेः। पलाण्डुभक्षिती। भक्षितपलाण्डुः॥ सारङ्गजग्धी। जग्धसारङ्गः[11]॥ पाणिगृहीती। गृहीतपाणिः॥*॥ कालात्॥ मासजाता। जातमासा॥ संवत्सरजाता। जातसंवत्सरा॥*॥ सुखादेः। सुखजाता। जातसुखा॥ जातदुःखा।

---

१ सप्तम्यंत A. D.; cf. P. ii. 2, 35 V. 3.
२ कंठगडुः A. B. C. F.
३ F. adds शिरोगडुरित्यपि.
४ मध्यगुरुः C. and om. शिरसिगडुः.
५ अंतगुरुः F.
६ दिग्नायकायाः A. F.
७ °ग्रौढताडककांतिः A.; °ताटंककांतिः F
८ नंद्वादिभ्य C.
९ इति न मन्यते F.
१० कंठेगडु° C.; cf. Kâś. V. ii. 2, 35.
११ Thus D. F.; सांगरजग्धी जग्धसांगरा। A.; शार्ङ्गजग्धी जग्धशार्ङ्गरः B. C. [सारङ्गजग्धः Kâś. V. vi. 2, 170; शार्ङ्गजग्धी ii. 2, 36, ed.; MSS. सारङ्ग°].

Digitized by Google

दुःखजाता ॥ दृष्टोत्पन्ना । उत्पन्नदृष्टा[1] ॥ न्यासक्तता सुखादयो गुणवचना इत्युक्तम् । भोजस्तु सुखादयो दश कृज्विधौ[2] निरूपिता इत्युक्तवान् जातिग्रहणमकृत्वाकृतिग्रहणात् ॥ आकृत्या संस्थानेन व्यज्यते सा जातिः । तेनेह न भवति । आकृतब्राह्मणः । सेवितसचिवः । तर्पितदाक्षिः । प्रोक्षितकट इत्येके ॥ जातिपरत्व आकृतेः पूर्वनिपातः । न व्यक्तिपरत्व इत्येके[3] ॥ ९१ ॥

ज्ञेयो जातश्मश्रुः पीतदधिच्छिन्नशीर्षपीतविषाः ।
क्तः प्रहरणवाचिभ्यः[4] सन्नम्यपि संमता विदुषाम् ॥ ९२ ॥

जातं श्मश्रु यस्य । जातश्मश्रुः । श्मश्रुजातः ॥ * ॥ पीतं दधि येन । पीतदधिः । दधिपीतः ॥ * ॥ छिन्नं शीर्षं यस्य । शीर्षच्छिन्नः । छिन्नशीर्षः ॥ * ॥ पीतं विषं येन । विषपीतः । पीतविषः ॥ * ॥ क्त इति । प्रहरणं धनुःखड्गाद्यर्थो येषां तेभ्यः क्तान्तं सन्नन्यन्तं च पूर्वं निपतति[5] । उद्यत उत्खातोऽसिर्येन स उद्यतासिः । अस्युद्यतः ॥ कलितप्रहरणः । प्रहरणकलितः ॥ दण्डः पाणौ यस्यासौ दण्डपाणिः । पाणिदण्डः । विश्रान्तन्यासक्तत्वसमर्थत्वाद्[6] दण्डपाणिरित्येव मन्यते ॥ वज्रपाणिः । पाणिवज्रः । अविशेषोक्तावप्यसमर्थत्वात्[7] । शूलपाणिः । शार्ङ्गपाणिः । धनुष्पाणिः ॥ पाशहस्त इत्यादौ परनिपात एव ॥ आकृतिगणोऽयम् ॥ ९२ ॥ इत्याहिताग्न्यादिः ॥

---

१ तृप्तोत्पन्ना। उत्पन्नतृप्ता C.D.[Kâś. V. iii. 1, 18 MSS. तृप्र; ed. तृप्त (var. l. तीव्र); but cf. vi. 2, 170, ed. तृप्र].

२ कृज्विधौ C.; कृद्विधौ D. F.; कृद्विधौ A.; कृद्विधौ B.; cf. P. iii. 1, 18.

३ °परत्वे C.; °परत्वे पीतविषे D.

४ क्तप्रहरण° A.; क्तःप्रेरण° E.

५ प्रहरणधनुः। सन्नाद्यर्थो येषां° A.; प्रहरणां धनुः षड्डाद्यर्थो येषां° B.; °खड्गादि। यथा एषां तेभ्यः क्तांतसन्न° C.

६ °न्यासक्तुरसमर्थत्वात् F.

७ अविशेषाक्तावपि असम° F.

Digitized by Google

तिष्ठद्गु प्ररथं खलेबुसमधोनाभं समंभूमि च
प्राह्णं पुण्यसमं वहद्गु विषमं प्रान्तं तथा निःषमम्।
एकान्तं च समंपदाति सुषमं तीर्थे समानात्परम्
पूतेनान्वितपूयमानखलतो लूनाद्यवं वा बुशम्[1]॥९३॥

तिष्ठद्गु। इत्येवमादयः समासास्तिष्ठद्वादिरयमित्यनेनाव्ययीभावसंज्ञा निपात्यन्ते[2]। अयमेव निपातितः समासो भवति नान्यः॥*॥ तिष्ठन्ति गावो यस्मिन्काले दोहाय स कालस्तिष्ठद्गु। प्रथमराचेरर्धघटी। प्रावृट्काल इत्यन्ये। अयमेवेति वचनात्कथमयं भट्टिकाव्ये प्रयोगः।

आतिष्ठद्गु जपस्संध्यां प्रक्रान्तामायतीगवम्।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम्[3]॥

तिष्ठद्गु यावद् आतिष्ठद्गूच्यते। भाष्योदाहरणात्तावदयं[4] विजातीयः। न च समासमात्रेण न भवितव्यमित्युक्तम्[5]। अभिधानप्रमाणस्य समासः॥*॥ प्रगतत्वं रथस्य[6]। प्रगताः प्रभूता वा रथा अस्मिन्देशे[7]। प्ररथम्॥*॥ खले बुसानि यत्र काले स कालः खलेबुसम्[8]॥*॥ नाभेरधोऽधोनाभं प्रह्वतवान्[9]। गणपाठादकारः समासान्तः॥*॥ समत्वं भूमेः। समंभूमि। निपातनान्मुगागमः॥ शाकटायनस्तु समभूमीत्यप्याह।

---

१ खलतो° A. E.; बुसं (बुसं) A. B. C. E. F.; D. has बुग्न both here and in the first pâda. Cf. note ११, p. १३३.

२ तिष्ठद्गु इत्येव समासस्ति° C.; °तिष्ठद्वादिरयमित्य° A.; °दिरेवमित्यनेन° D.

३ Bhaṭṭik. 4, 14.

४ भाष्योदाहरणाभावादयं C.

५ °माचेण भवितव्य° D.

६ प्रगतं रथं यस्य C.

७ °प्रह्वता वा रथा अस्मिन् वा देशे A. D.; C. om. प्रभूता.

८ बुग्नानि° खलेबुग्नं D.; cf. next page, note ११.

९ अधोभागं नाभं° B.; प्रह्वतवान् B. C.

Digitized by Google

अन्यार्थत्वे तु[1]। समभूमयो वीथय इत्येवं यौगिकत्वेनास्य लक्षणस्य प्रवृत्तिः। अन्यार्थत्वेऽपि समभूमीति[2] केचित् ॥ * ॥ प्रगतत्वमङ्गां प्रगतमङ्ग इति वा। प्राङ्गम्। निपातनाद् अङ्गादेशः ॥ * ॥ पुण्यत्वं समायाः पुण्या समेति वा। पुण्यसमम्। पुण्येन समं तृतीयासमासापवाद् इति केचित्[3] ॥ * ॥ वहन्ति गावो यस्मिन्काले स काल वहहु। प्ररत्काल[4] इत्यन्ये ॥ * ॥ विगतं समं विगतत्वं समस्य वा। विषमम् ॥ समादिप्रकृष्टो हीनो वा देश इति केचित् ॥ * ॥ प्रगतत्वमन्तस्य प्रगतोऽन्तोऽस्मिन्देश इति वा। प्रान्तम् ॥ * ॥ निर्गतं समं निर्गतत्वं समस्येति वा। निःसमम् ॥ समान्निष्क्रान्तो निःसममिति केचित् ॥ * ॥ एकोऽन्तो यस्य तद् एकान्तम् ॥ * ॥ समत्वं पदातेः। समंपदाति। निपातनान्मुगागमः ॥ समपदातीत्यपि[5] शाकटायनः ॥ अन्यार्थत्वे तु। समपदातयो राजान इति यौगिकत्वेनास्य लक्षणस्य प्रवृत्तिः[6] ॥ * ॥ शोभनाः समा यत्र स काल: सुषमम्। शोभनत्वं समस्येति वा ॥ * ॥ समानं तीर्थं तीर्थस्य समानत्वमिति वा। समानतीर्थम् ॥ * ॥ पूताः पूयमानास्च यवा यत्र काले स पूतयवम्। पूतयवमिति भोजः[7] ॥ पूयमानयवं कालः ॥ * ॥ खलं[8] रणाजिरं धान्यावपनस्थानं च। खलन्ति संचीयन्ते[9] यशांसि शूरैर्धान्यानि वा यत्र तत् खलम्। खले[10] यवा वुशानि च[11] यस्मिन्काले

---

१ अन्यार्थे तु A.; अन्यार्थ तु orig. D.; B. C. om. तु.

२ समभूमिरिति D.

३ B. om. समं तृतीया; C. om. पुण्येन समं.

४ सरत्काल A. D.

५ समपदाती। अपि A.; समपदात्यपि C.; समंपदातीति D.

६ B. C. F. om. लक्षणस्य.

७ F. om. from पूतयव.

८ ॥ खले यवा वुसानि च खलं F.

९ खलति° C.; संवीर्यते B.

१० A. om. from स पूतयवम्.

११ यवा धुनानि च A.; D. om. from च। खलन्ति; A. B. C. F. read वुस throughout. The distinction between वुस and वुश was probably not intended here by the author. Cf. p. १३२, n. १.

Digitized by Google

स[1] खलेयवम् । खलेबुग्रम् ॥ * ॥ लूना यवा यस्मिन्काले स लूनयवम् ॥ * ॥ वा बुग्रमिति वाग्रब्दो व्यवस्थावाची । तेन बुग्रग्रब्दः खलग्रब्दादेव द्रष्टव्यः ॥ ९२ ॥

समपक्षं पापसमं समानतीरं प्रदक्षिणं प्रमृगम् ।
अपदक्षिणं च संप्रति वासंप्रति लूयमानयवम् ॥ ९४ ॥

समत्वं पक्षस्य समः पक्षोऽस्मिन्निति वा । समपक्षं देग्रः ॥ * ॥ पापाः समा यस्मिन्युगे काले वा । पापसमम् ॥ * ॥ समानं तीरं समानत्वं तीरस्येति वा । समानतीरम् ॥ * ॥ प्रस्तुत्य दक्षिणतो भ्रमति । प्रदक्षिणम् । भोजस्तु प्रदक्षिणं वाममित्याह[2] ॥ प्रकृष्टत्वं दक्षिणाया वा । प्रदक्षिणम् ॥ * ॥ प्रगता मृगा यत्र काले यतो वाऽरण्यादेस्तत् प्रमृगम्[3] ॥ * ॥ अपगता दक्षिणा यत्र तद् अपदक्षिणम्[4] ॥ * ॥ संप्रतीति प्रादिसमुदायरूपः ग्रब्दः । स एव तग्संपर्काद् असंप्रति ॥ * ॥ लूयमाना यवा यत्र काले स लूयमानयवम् ॥ ९४ ॥

संहतसंह्रियमाणाद् बुसं यवं चायतीगवाविषमे ।
अपरायत्योश्च समं दुःषममिच्प्रत्ययोऽपि गणे ॥ ९५ ॥

संहतानि संह्रियमाणानि च बुसानि यवास्य यत्र काले स कालः संहतबुसम् । संह्रियमाणबुसम् ॥ संहतयवम्[5] । संह्रियमाणयवम् ॥ * ॥ दोहार्थं जलपानार्थं निवासार्थं[6] वायत्यो गावो यत्र काले स आय-

---

१ निवापनं यस्मिन्° D.; F. om. from खलम् । खले.

२ भोजस्त्वप्रदक्षिणवाममि° प्रकृत्वं° A.; भोजस्तु प्रदक्षिणत्वमित्याह D.

३ D. om. यतो; F. om. वा; काले याता वारण्यदेग्ये प्रमृगं C.

४ अपगता दक्षिणं अपदक्षिणं C.

५ C. D. F. om. संह्रियमाणबुसं । संहतयवं (supplying यथाक्रमं?).

६ A. om. निवासार्थं.

Digitized by Google

तीगवम्। यथा। अतिष्ठद्गु जपस्संध्यां प्रक्रान्तामायतीगवम्॥ *॥ न विषमम्। अविषमम्॥ *॥ अपरा आयत्यो वा समा यत्र काले सोऽपरसमम्। अवरसममिति भोजः[1]॥ आयतीसमम्॥ *॥ दुष्टत्वं समाया दुष्टाः समा वा यत्र तद् दुःषमम्। गणपाठसामर्थ्यात्स्त्रीत्वनिवृत्तिः[2]॥ *॥ दृक्प्रत्ययोऽपीति। दृज् युद्भ दृत्यनेन[3] य दृज् विहितस्तदन्तः शब्दोऽत्र गणे द्रष्टव्यः। तेन परमं भीमं वा केशाकेशीति समासारम्भकत्वं न भवति॥

तिष्ठद्गु वहद्गायतीगवं लूनलूयमानपूतपूयमानयवाः[4] खलेसंहतसंक्रियमाणयवसांस्य कालविशेषवाचिन एव गणे द्रष्टव्याः[5]॥ अन्ये तु देशवृत्तित्वमपि मन्यन्ते। तेनान्यत्र पूर्वेण बहुव्रीहिः स्यात्। तिष्ठन्ति गावो यत्र स तिष्ठद्गुः। तिष्ठद्गवो ग्रामाः॥ वहन्त्यो गावो यत्र सा वहद्गुर्हलपङ्क्तिः। वहद्गवः कुटुम्बिनः॥ आयत्यो गावो यत्र स आयद्गुः॥ लूनयवेषु क्षेत्रेषु वसतीत्यादि॥ लूनयवादयस्तु प्रथमैकवचनान्ता एव प्रयोक्तव्याः। तेन द्वितीयादिका विभक्तिर्न भवति॥ समं भूमिपदार्तिभ्यामन्यपदार्थे[6] प्राऽक्प्रत्यग्दक्षिणाभिरित्येताभ्यां सूत्राभ्यां[7] कालभावयोरेवान्यपदार्थ इष्यते। तेन समा भूमिरस्मिन्ग्रामे। समभूमिर्ग्रामः। प्रगता मृगा अस्मात्। प्रमृगो देशः। प्राक्। प्रत्यक्। प्रमृगः। प्रदक्षिणः॥ अन्यपदार्थ एव[8]। समा भूमिः। समभूमिरित्यादौ[9] तत्पुरुष एवेति भोजः॥ आकृतिगणोऽयम्। तेन यत्प्रभृति

---

१ अपरसमं। अपरसममिति° A.; D. om. from अवर°.

२ °स्त्रीत्वान्निवृत्तिः A. D.

३ Cf. Pâṇ. ii. 2, 37.

४ °आयतीयवलून° A. B.; आयतगवलू° C.; °लूनगवं लूयमान° D.

५ °वाचन एव° A.; F. om. गणे.

६ समंभूमिसमपदार्तिभ्याम° B.C.F.

७ A. C. D. om. सूत्राभ्यां.

८ अन्यपदार्थस्तु D.

९ °इत्यादि। A.

Digitized by Google

तत्प्रभृतीत्यादीनामपि क्रियाविशेषणवृत्तीनां व्युत्पत्तिरनेनैव द्रष्टव्या ॥ ९५ ॥ इति तिष्ठद्वादिः ॥

ऊरीभंशकलोररीगुलुगुधाधूसोस्वधाविःसजूर्-[1]
धूलीध्वंसकलोरुरीमसमसाविक्लीफलीमस्सासाः।
ताली संशकला फलू च शकला[2] स्वाहा वषट्श्रौषटौ
वेताली च पशूपलीगुलुगुलातालीवितालीश्रुदः[3] ॥ ९६ ॥

ऊसुक्लेत्यादिना[4] सूचेणोर्यादयः सुबन्ता भ्वादिना सह समस्यन्ते। स समासस्तत्पुरुषो भवति ॥ * ॥ ऊरीत्यङ्गीकारे विस्तारे च। ऊरीकृत्य। अङ्गीकृत्य विस्तारं कृत्वा वेत्यर्थः ॥ केचिद् अनुकरणविस्तारयोरिति पठन्ति। अपरे भृशार्थशब्दप्रशंसासु[5]। यथा।

तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते[6] ॥ * ॥

भंशकलेति हिंसायाम्। भंशकलाकृत्य। हिंसित्वेत्यर्थः ॥ * ॥ उररी। ऊरीवत् ॥ * ॥ गुलुगुधेति पीडायाम्। गुलुगुधाकृत्य[7]। पीडयित्वेत्यर्थः। क्रीडायामित्यन्ये ॥ गुलूगुधेत्यन्ये[8] ॥ * ॥ धूसीति विस्तारे। धूसीकृत्य। विस्तार्येत्यर्थः ॥ धूसी कान्ताविति शाकटायनः। अपरे धूसी काङ्क्षायाम्[9]। धूसीकृत्य। काङ्क्षां कृत्वेत्यर्थः ॥ * ॥ स्वधेति संप्रदाने। स्वधाकृत्य स्वधाशब्दोच्चारितमन्त्रादिकर्म[10] कृत्वा गत इत्यर्थः ॥

---

१ ऊरीभंस° A.; °गुलगुधा° F.

२ ताली संसकला A. B. C. E. F.; °शंसकला° D.; °सकला MSS.

३ °शावालीविताली° B.C.F.; °शातालीविवाली° A.; °श्रद्: A. D. E. F.

४ ? उस्लक्लेत्यादिना A.; दस्लक्लेत्यादिना D.; ऊर्यादिना C.

५ भृशार्थशब्द° B.; भृशाद्यशब्द° C.; भृशार्थप्रशंसासु D.

६ Sis. 2, 30; वितायते A.; विधोयते D.; D. has the whole stanza.

७ गुलगुधेति° गुलगुधाकृत्य। F.

८ ? Thus B.; गुलुगुधेत्यन्यः A.; गुलुगुधेत्यन्ये C.; om. D. F.

९ B. C. om. धूसी काङ्क्षायां.

१० स्वधादिशब्दो° A.; °शब्दादि° C.

Digitized by Google

ह्वन्निप्रीत्योरित्यन्यः ॥ * ॥ एवं स्वाहावषट्श्रौषड्वौषटामर्थो द्रष्टव्यः। वषट् पूजायामित्यन्यः। एतेषां संप्रदानार्थत्वात्करोतिनैव संबन्धः ॥ * ॥ आविस्। इति प्राकाश्ये। यथा।

तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम्[1]।

आविष्करोति। प्रकटयतीत्यर्थः। आविःशब्दस्येह पाठात्सूक्ष्मे[2] धातोः प्रागेव निपातः। एवं च योऽयं प्रयोगः[3]।

वारुणीमदविघूर्णमधाविस्चुक्षुभोऽभवदसाविव रागः ॥

इति। तथा। पृथुर्दर्विभृतस्ततः फणीन्द्रा

विषमाग्नीभिरगारतं वमन्तः।

अभवन् युगपद्विलोलजिह्वा-

युगलीढोभयसूक्ष्मभागमाविः[4] ॥

इति च सप्रमादज एव नास्त्यभ्युद्भारः[5]। आविरभवद्रागः। आविरभवन्फणीन्द्रा इति क्रियायोगस्य समीहितत्वात् ॥ * ॥ सजूरिति सहार्थे। सजूःकृत्य। सहितं साहित्येन वा कृत्वा गत इत्यर्थः। सहार्थत्वादयं कृभ्वस्तिभिर्युज्यते। आविःशब्दस्य[6] प्राकाश्यार्थत्वात् ॥ * ॥ धूलीति विदूरव्याकुलीभावे[7]। धूलीकृत्य। विदूराकुलतां[7] कृत्वेत्यर्थः ॥ * ॥ ध्वंसकला। भ्रंशकलावत् ॥ * ॥ उरुरी। ऊरीवत्[8] ॥ * ॥ मसमसेति ध्वंसकलावत् ॥ * ॥ विक्षी फली। इति विकारे। हिंसायामिति वामनः। विकारार्थत्वात् कृभ्वस्तिभिर्युज्यते। विक्षीकृत्य ॥ अपर आक्षी विक्षीति विचारे। विक्षीकृत्य विचार्येत्यर्थः[9] ॥ फलीकृत्य ॥ * ॥ मस्मसेति मसमसावत्। अपरे तु मस्मसा मसमसेति द्वौ संचूर्णने संवरणे

---

1 Kum. S. 2, 2.
2 सङ्कले B.; सत्वं C.; सूचले corr. D.
3 एवंविधो यं० D.; Śiśup. 10, 19.
4 Śiś. 20, 42; A. C. D. om. the first half.
5 इति च प्रमाद० D.; नास्त्युद्भारः C.
6 आविःशब्दस्य B. C. F.
7 विदूर० A. B.; विज्वर० C.
8 उररीवत् B. C. F.
9 D. om. from अपरे.

Digitized by Google

चेत्याङ्गः[1] ॥ * ॥ ताली विदूराकुलीभावे[2]। तालीकृत्य ॥ ताली आताली वर्णे शाकटायनः ॥ अपरे त्वुत्तमार्थे। तालीकृत्य। उत्तमं कृत्वेत्यर्थः ॥ विस्तारे तु भोजः ॥ * ॥ संशकलेति मसमसावत्[3]। अ-सङ्कलेति[4] भोजः ॥ * ॥ फलू[5] विक्लीवत्। फलू फलीति[6] क्रियासंपत्तौ। फलूकृत्य। फलीकृत्य। क्रियां संपाद्येत्यर्थः ॥ * ॥ शकला। मसमसा-वत्[7] ॥ अपरे शकला संशकला[8] ध्वंसकला भ्रंशकलेति चत्वारः परि-भवे। शकलाकृत्य[8]। परिभूय गत इत्यर्थः ॥ * ॥ वेतालीति तालीवत्। विस्तारे तु भोजः ॥ * ॥ पसू। इति हिंसायाम्। पसूकृत्य गतः। हत्वा गत इत्यर्थः ॥ * ॥ पलीति विक्लीवत् ॥ * ॥ गुलुगुला। गुलुगुधावत् ॥ * ॥ आताली वितालीति[9] तालीवत् ॥ * ॥ अदिति शीघ्रार्थे। अदित्य[10] गतः। शीघ्रं हत्वा गत इत्यर्थः ॥ अन्यस्तु अदिति श्रद्धाने। श्रद्धाय। श्रद्धां कृत्वेत्यर्थः[11]। अयं दधातिना युक्तः प्रयुज्यत इत्याह ॥ ९६ ॥

प्रादुः पाम्पालबीपाम्पालीसङ्कलाश[12] केवाली।
आलोष्ठी केवासी सेवाल्याङ्की च वार्दाली[13] ॥ ९७ ॥

---

१ मसमसमसा इति° F.; मसमसेति मसमसाव यस्येदं स वृत्रिगात्। अन्ये मसमसा मसमसेति° A.; D. om. from अपरे तु; see note ७.

२ विदूर° A. B.; विज्वर° C.

३ संसकलेति A. B. C. F.; शंसक-लेति मसावत् D.; समसावत् A.

४ ? Thus A.; अशंकलेति B.; असं-कलेति C.; संसकलेति (corr. शं°?) D.; शंसकलेति F.

५ फलु A.

६ विक्लीति B. C.

७ सकला° A. D. F.; D. adds here अपरे तु मसमसमसासा इति संपूर्वने संवरणे चेत्याङ्गः; see note १.

८ सकला° D. F.; संसकला° सक-लाकृत्य D.

९ आवाली वितालीति B. C. F.; आवाली विवालीति A.

१० ? Thus B. C. F.; अदिति° अत्कृत्य D.; अदिति° अत्कृत्य A.

११ अन्यस्तु अदिति श्रद्धायां। श्रद्धा° D.

१२ प्रादुः पांपालबी° E.; °सकलाश D.

१३ शेवाल्याङ्की° A.; C. om. this śl. with comment.

Digitized by Google

प्रादुः प्राकाश्ये। यथा ममैव।

निःसीमास्वर्यधाम त्रिभुवनविदितं[1] पत्तनं यत्त्वदीयं
तन्मध्ये वृद्धिमीयुः फलभरनमिताः शाखिनस्सूतमुख्याः।
नैतच्चित्रं विचित्रादिहितकृतयुग त्वत्प्रभावात् क्षितीश[2]
प्रादुःषन्ति प्रभूता यदि सुरतरवश्चित्रमेतद्बुधानाम्॥

भ्वादिनेति सामान्योक्तावपि कृभ्वस्तिभिरेव योग एतेषां समासः॥*॥ पाग्नी विस्तारविध्वंसमाधुर्येषु करणविलापे च। पाग्नीकृत्य। विस्तारं विध्वंसं माधुर्यं च कृत्वेत्यर्थः॥ पाग्नीकृत्य। करणं विलप्येत्यर्थः॥*॥ आलम्नीति प्राकाश्ये हिंसायां च। आलम्नीकृत्य॥*॥ पाग्नाली। सङ्कला[3]। केवाली। आलोष्टी। केवासी। सेवाली। आक्षी[4] हिंसायाम्॥ पाग्नालीकृत्य। हिंसित्वेत्यर्थ[5] इत्यादि॥ आक्षीशब्दो विकारेऽपि। आक्षीकृत्य॥*॥ वार्दालीति प्राकाश्ये हिंसायां च। वार्दालीकृत्य॥ पार्दालीति[6] कश्चित्॥ ९७। इत्यूर्यादिः॥

साक्षाद्बीजरुहानमःप्रसहनेचिन्ताविसो रोचना[7]
बीजर्या लवणं सह प्रतपने भद्रार्थयप्रावमाः।
अद्धा प्राजरुहोदकं विसहने मिथ्यार्द्रमास्थोऽष्टमः[8]
प्राजर्या च विकम्पने विहसने शीतंवशेप्रादुसः॥ ९८॥

साचादित्यादयः शब्दाश्चार्थविषयाः करोतिना सह साचादा-

---

१ निःसीमास्वर्यधानस्त्रिभु° A.
२ त्वत्प्रभाव क्षितीश। A.; D. om. from निःसीमास्वर्य°.
३ संकली B.
४ शेवाक्षाक्षी A.
५ °हिंसायां विस्तारे च वेताक्षीति कश्चित्। पाक्षीकृत्य। हिंसिकार्थ D.
६ वार्दालीति A.; पार्दालीति D.
७ °प्रहसने° E.
८ °क्षो क्षमः C. F.; °क्षोत्क्रमः E.

Digitized by Google

साच्चिरित्यनेन[1] वा समस्यन्ते। स च तत्पुरुषसंज्ञो भवति। साचात्कृत्य। साचात् कृत्वा। असाचाद्भूतं साचात् कृत्वेत्यर्थः॥ * ॥ बीजरुहेति रुहिक्रियार्थः। बीजरुहाकरोति सेवकः॥ ग्रोभायामित्यन्ये॥ * ॥ नमस्कृत्य॥ * ॥ प्रसहने। दृत्युत्साहे सामर्थ्ये[2] च। प्रसहनेकृत्य॥ * ॥ चिन्ता। दृति मानसे व्यापारे। चिन्ताकृत्य॥ चित्तेति कश्चित्। स चाचित्ता चित्ता कृत्वा। चित्ताकृत्य[3]। अव्ययत्वादसमासेऽपि विभक्त्यश्रवणमव्ययत्वं च खरादेराकृतिगणत्वादित्याह। एवमन्येष्वपि॥ * ॥ आविष्कृत्य॥ * ॥ रोचना। दृति[4] अद्भुतोत्पादने प्रशंसायां च। रोचनाकृत्य॥ रोचनेति दीक्षी कश्चिदाह॥ * ॥ बीजर्या। दृति जरणक्रियार्थः। बीजर्याकृत्य धनस्य[5] गतः॥ ग्रोभार्थ दृत्यन्ये॥ * ॥ स्रवणमिति रुच्यर्थे। स्रवणंकृत्य॥ * ॥ सह। दृति संबद्धार्थः। सहकृत्य॥ * ॥ प्रतपने। दृति तापार्थः। मिथ्याकृतां प्रतपनेकृदय चितोग्रः[6]॥ वितपन दृत्यपि वामनः[7]॥ * ॥ भद्रा दृत्याशोचनाप्रशंसासमृद्धिषु। अभद्राभद्राकरणं पूर्वम्। भद्राकृत्य॥ केचिद् अभद्रां भद्रां कृत्वेति विग्रहे विभक्तिमुच्चारयन्ति॥ * ॥ अर्थेकृत्य श्लोकं पठति। सार्थकं कृत्वेत्यर्थः। यदा। अर्थेकृत्य वदति। सप्रयोजनं कृत्वा वदतीत्यर्थः। यथा क्षिप्तपक्ष[8]।

साचाकृतेऽथ स्रवणंकृति दिक्षुखानाम्[9]
उष्णंकृतोऽर्चिषि वशेकृदमाकृदास्ते[10]।

---

१ ? साचादाचोच्चिरित्य° A.; साचादाचो च्चिरित्य° B.; साचादाचोरित्य° C. F.; साचादाचोः च्चिरित्य° D.; cf. P. I. 4, 74 V.

२ सामर्थे A.; साहित्यार्थे D.

३ स चाचित्ता कृत्वा चित्य। A.; स वा चित्ता कृत्वा° C.; चित्ता कृत्वा चित्ताकृत्य D.

४ रोचते तु A.

५ वनस्य A.; वतस्य D.

६ मिथ्याकृता° A. D.; मिथ्याकृतं° B. F.; मिथ्याकृतप्र° C.; °करर्थं corr. D.

७ दृति वामनः D.

८ क्षिप्तपक्ष B.; cf. p. ८०, note ६.

९ साचात्कृत्वाच° D.

१० उष्णकृतोर्च्चिषि वतीकृद्° D.; °विविविग्रेकृदमा° F.

Digitized by Google

आख्याङ्कृता: कृतनमस्कृतयोऽर्थमर्थै-[1]
कृत्य व्रती च नृपती च नृपस्य जग्मु: ॥

अग्नीकृत्य । अग्नी कृत्वा ।

अग्नीकृतामथ ऋतैरुदकंकृदंशाव्
आर्द्रीकृते विहसनेकृति पद्मिनीनाम्[2] ॥

अग्नाविति तैरुक्ते शाकटायन: ॥ * ॥ असा । इति रह:समवायसंयोग-सामर्थ्येषु । असात्कृत्य ॥ * ॥ अङ्गात्कृत्य । यथा ।

शीतंकृदर्चिषि तटीमपराम्बुधे: सं-
सर्यात्किकीर्षति रवावुदयाद्रिशृङ्गम्[3] ।
प्रादुष्कृता मिलितकोकयुगे मुहूर्तम्
अङ्गात्कृतेव वियता सरसि स्खलच्छ्रीम्[4] ॥

प्राजरत्हा । इति रुद्विक्रियार्थ: । प्राजरुद्हात्कृत्य पर्जन्यो निवृत्त:[5] ॥ शोभार्थे इत्यन्ये ॥ * ॥ उदकंकृत्य ॥ * ॥ विसहने । प्रसहनेवत् ॥ * ॥ मिथ्यात्कृत्य[6] ॥ * ॥ आर्द्रीकृत्य ॥ आर्द्रे । इत्येकारान्तमपि कश्चित् । आर्द्रेकृत्य ॥ * ॥ आख्या । इत्यादरे प्रतिज्ञायां च । आख्यात्कृत्य ॥ * ॥ प्राजर्या । इति बीजर्यावत्[7] ॥ प्राजुरा । इत्यपि शाकटायन:[8] ॥ * ॥ चिन्तात्कृताश्रितहितोरिविकम्पनेकृत् ॥ शाकटायनस्तु विकपने[9] प्रकपने

---

१ आख्यात्कृता कृत० A.; आवि:कृता: कृत० D.

२ उदकैकृदंशाचार्द्रीकृते A.; उदकंकृदंशावर्द्रीकृते० C.; °कृदंशावार्द्रीकृते विहवने० D.; अर्द्रीकृते वि० B.; कृदंशावर्द्रीकृते० F.

३ तटीमपरांबुधि: ससर्य्या विकर्षति० C.

४ मुहूर्त्तमद्यार्त्तमङ्गात्कृतेव० C.; मुहूर्त्तेमद्यात्कृतेव० A.; °कोकयुगेर्मुहूर्त्तमर्द्यात्कृतेव वियता सरति स्व० F.

५ पर्यन्यो० B.; पर्यान्या० C.; °कृत्य निवृत्त D.

६ उदकंकृत्वा उत्साहनेवृत्व मिथ्यात्कृत्व D.

७ आजर्यैति० C.

८ प्राजरा० C.; D. om. अपि.

९ ? विकंपने A. C. F.; C. F. om. प्रकपने.

Digitized by Google

वैरूप्ये । विकपने हिंसायाम् । प्रकपने[1] संताप इत्यन्ये । इत्याह ॥ * ॥ विहसनेऽत्य ॥ * ॥ शीतंऽत्य ॥ शीतमनादर इति शाकटायनः ॥ * ॥ वश । इत्यखातस्थे । वशेऽत्य ॥ * ॥ प्रादुष्कृत्य ॥ * ॥

विकम्पनेप्रभृतीनामेजन्तत्वं[2] लवणंप्रभृतीनां मान्तत्वं च गणपाठसामर्थ्यादेव । अथवा । एते सप्तमीप्रतिरूपका द्वितीयाप्रतिरूपकाश्च निपाताः ॥ चादित्वाभावे । आस्यां कृत्वा । अग्नौ कृत्वा अस्यं तापयतीत्यादि स्यात् ॥ आकृतिगणोऽयम् । तेन पर्यटनंवृत्तिसंसर्याप्रभृतयो द्रष्टव्याः ॥ ९८ ॥ इति याचादादिः ॥

स्युर्याजकोद्वर्तककर्तृकारकाः
प्रयोजकोत्सादकभर्तृवर्तकाः ।
अध्यापकस्तापकगोभृपूजकास्
तुर्यैः परेश्वारकवेषकाविमौ[3] ॥ ९९ ॥

याजकादिभिः शब्दैः सुबन्तं पदम् अकथाजकादिभिरित्यनेन समस्यते । स समासस्तत्पुरुषसंज्ञो भवति ॥ * ॥ ब्राह्मणानां याजकः । ब्राह्मणयाजकः । याजयिता ॥ * ॥ शरीरस्योद्वर्तकः । शरीरोद्वर्तकः ॥ * ॥ प्रणम्य सर्वकर्तारम्[4] ॥ * ॥ धर्मस्य कारकः । धर्मकारकः ॥ * ॥ तत्प्रयोजककर्तृत्वमुपैति मम अच्युतः[5] ॥ * ॥ रिपूणामुत्सादकः । रिपूत्सादकः ॥ कृद् अपवारणे उत्पूर्वः । चर्चियस्योच्छादकः । चर्चियोच्छादक इति शाकटायनः ॥ * ॥ भुवो भर्ता । भूभर्ता ॥ * ॥ वर्तयतीति वर्तकः । भाव्यस्य वर्तकः । भाव्यवर्तकः ॥ * ॥ पुचाणामध्यापकः । पुचा-

---

१ विकंपने हिंसायां प्रकंपने F.
२ विकंपनेप्र० A. B. C.
३ D. corr. गोपपूज०; परीवारकवेषकावसौ C.
४ Beginning of Trilochanadâsa's Kâtantravṛittipañjikâ; cf. Kât. p. 466.
५ Śiśup. 2, 71.

Digitized by Google

ध्यापकः ॥ * ॥ स्नापयतीति स्नापकः । राज्ञः स्नापकः । राजस्नापकः ॥ * ॥ धात्र्या गोपकः । धात्रीगोपकः ॥ * ॥ साधूनां पूजकः । साधुपूजकः ॥ * ॥ ब्राह्मणानां तुर्यः । ब्राह्मणतुर्यः ॥ * ॥ परिचरतीति परिचारकः । गुरोः परिचारकः । गुरुपरिचारकः ॥ * ॥ परिवेवेष्टि । परिवेषकः । राज्ञः परिवेषकः । राजपरिवेषकः ॥ यद्वा । घृतस्य परिवेषकः । घृतपरिवेषकः ॥ ९९ ॥

गणको रथपत्तिभ्यां चतुर्थोन्मादकौ तथा ।
होता द्वि चि च तीयान्तं तुरीयोऽपि[1] सतां मतः ॥ १०० ॥

रथानां गणकः । रथगणकः ॥ पत्तीनां गणकः । पत्तिगणकः ॥ * ॥ आत्मनश्चतुर्थः । आत्मचतुर्थः ॥ * ॥ चित्तस्योन्मादकः । चित्तोन्मादकः ॥ * ॥ चीरस्य होता । चीरहोता ॥ * ॥ राज्ञां द्वितीयः । राजद्वितीयः ॥ राज्ञां तृतीयः । राजतृतीयः ॥ राज्ञां तुरीयः । राजतुरीयः । तुरीयोऽपि सतां मत इति साभिप्रायम् । तेन द्वितीयतृतीयेत्यादि[2] सूत्रं दृष्टत्तन्त्रे व्यर्थम् । गणसमाश्रयणमेव श्रेयः ।

क्रियानुगतिमाख्याय लोके ख्यातिमुपागताः ।
ये कान्ताः पावकाद्यास्ते द्रष्टव्या याजकादिषु ॥

तेन गोमयानां पावकः । गोमयपावकः ॥ गृहस्य दीपकः । गृहदीपकः ॥ पिष्टस्य मोदकः । पिष्टमोदक इत्यादि ॥ न कर्तरीति प्रतिषेधे[3] प्राप्ते पाठः ॥ १०० ॥ इति याजकादिः ॥

शौण्डव्याडौ निपुणचपलौ पण्डितान्तःप्रवीणाः[4]
स्यात् संवीतः कुशलकितवाधीनधूर्तप्रधानम् ।

---

१ चतुर्थोऽपि F.
२ PAp. ii. 2, 3.
३ निषेधे C. D.
४ पंडितांतप्रवीणाः F.; °प्रवीणः C.

Digitized by Google

सव्यध्यानप्रवणविदिताः[1] सारगुर्वायसाः स्युः[2]
सिद्धो बन्धः कटकविरसौ शेखरः शुष्कपक्वौ[3] ॥ १०१ ॥

सप्तम्यन्तं शौण्डादिभिः सह सप्तमी शौण्डैरित्यनेन वा समस्यते। स समासस्तत्पुरुषसंज्ञो भवति ॥ अक्षेषु प्रसक्तः[4] शौण्डः। अक्षशौण्डः॥ वृत्तौ प्रसक्तक्रियाया[4] अन्तर्भावः शौण्डः प्रवीणः। यथा पण्डितश्रीसागरचन्द्रस्य[5]।

द्रव्याश्रयाः श्रीजयसिंहदेव[6] गुणाः कणादेन महर्षिणोक्ताः।
त्वया पुनः पण्डितदानशौण्ड गुणाश्रयं द्रव्यमपि व्यधायि[7] ॥

यद्यपि शौण्डशब्दो मद्यपे रूढस्तथापि लक्षणया प्रवीणोऽपि भण्यते। दुर्व्यसनी वा ॥

पानशौण्डः श्रियं नेता नात्यन्तीनत्वमुन्मनाः[8] ॥

इति मुख्यार्थोऽपि[9] समासभाक् ॥ * ॥ अस्त्रव्याडः ॥ * ॥ आचारनिपुणः ॥ * ॥ वाक्पटवः ॥ * ॥ रणपण्डितः ॥ * ॥ ते नालिकेरान्तरंपः पिबन्तः[10]। न चैतत् षष्ठीसमासेन सिध्यतीति शक्यं प्रतिपत्तुमर्थभेदात्। न ह्यर्णवेऽन्तर् अर्णवस्यान्तरिति चैकोऽर्थः। किं त्वाव्ययत्वात्षष्ठीसमासप्रतिषेधः॥ श्रीभोजस्यान्तरशब्दं पपाठ ॥ * ॥ शास्त्रप्रवीणः। शाकटायनस्तु। अर्थप्रवीणः[11]। अर्थविषये निपुण इत्याह ॥ * ॥ श्लोक-

---

१ भव्यध्यान° E.; भव्याधान° F.; मध्यध्यान° C.; सुध्यध्यान° D.; °प्रणवविदिताः (!) MSS.

२ गुर्वायसाश्च E.; °यशास्त्र। D.

३ शुष्कपक्वौ B.

४ प्रशक्त° A. D.

५ Thus B. F.; पंडितं। सागरचंद्रस्य A.; पंडितस्य सागर° C.; पंडितरामचंद्रस्य (corr. from °सामचंद्रस्य) D.

६ श्रीयुतसिंहदेव F.

७ °शौंडो गुणाश्रयद्रव्यमसि व्यधायि D. and om. the first half śloka.

८ Bhaṭṭik. 5, 10; °शौंडश्रियं° MSS.; ? नात्यंतीनां त्वमु° A. B. D. F.; वेताब्यंतीनां त्वमु° C.

९ मुख्योपि A.

१० Śiśup. 3, 81; [नारिकेला° eds.].

११ ? अर्थसवीयः A. B.

Digitized by Google

संवीतः ॥ * ॥ सेवाकुशलः ॥ * ॥ अक्षकितवः ॥ * ॥ जिनवचनाधीनः[1]। अधीनशब्दोऽस्मादेव गणपाठात् तस्याधीन इति ज्ञापकाद्वा खप्रत्ययान्तो बोद्धव्यः ॥ अथवा। अधिगतं दूनम्[2]। अधिगतं दूनोऽनेनेति वा। अधीनः। यथा लोकाधीनः[3] ॥ * ॥ अक्षधूर्तः ॥ * ॥ विबुधप्रधानम् ॥ * ॥ कार्यसव्यः[4]। कार्यविषयेऽनिपुण[5] इत्यर्थः ॥ * ॥ कर्मध्यानः। कर्मसु युक्त इत्यर्थः[6] ॥ * ॥ पृथिवीप्रणवः[7] ॥ * ॥ पृथिवीविदितः ॥ * ॥ लक्षिसारः ॥ * ॥ मध्येगुरुः ॥ * ॥ कायायसः। कायविषय[8] औदरिक इत्यर्थः ॥ * ॥ काम्यिक्षसिद्धः ॥ * ॥ चक्रबन्धः ॥ * ॥ हस्तकटकः ॥ * ॥ अवसानविरसः ॥ * ॥ शिरःशेखरः ॥ * ॥ छायाशुष्कः ॥ * ॥ कुक्षीपक्वः ॥

आकृतिगणोऽयम्। तेन व्यवहारपटुः। अतिपरमणीय[9] इत्यादयो द्रष्टव्याः ॥ १०१ ॥ इति औण्डादिः ॥

ङ्यन्तात्पाचात्समितबहुलौ[10] गेहगोष्ठात्प्रगल्भ-
क्लेडिन्नर्दिन्विजितिपटवः पण्डितव्याडशूराः।
गर्भाशूरः सुहितसहितस्तृप्रहप्नौ च धीरः
पिण्डीशूरो व्रणकृमिरथो कूपमण्डूकयुक्तः ॥ १०२ ॥

पाचेसमितादयः सप्तमीतत्पुरुषा निपात्यन्ते। चेपे गम्यमाने पा-

---

१ जितनवच° A.; जन° B.F.; गच° C.

२ दून इति C.; अधिगतमिनो D.

३ यतो लो° A.; om. C.

४ ? कार्यसव्यं A.; कार्य मध्यः B.; कार्यमध्यः C.; कार्यभव्यः D.; °नव्यः F.

५ अनिपुण A., orig. D.; °चेनिपुण B. C. F.

६ ? कर्मव्यानः।° A.; °कर्मयुक्तः C.; कर्मसु शक्तः D.; कर्मसु व्यक्त° F.

७ Thus B. C. D. F.; पृथिवीप्रवीणः A.—Correct प्रणव for the conjectured प्रवण in śl. 101. [? Prof. Roth says: 'Might be a drum in the ground (cf. पणव) *i.e.* a hole covered over with boards to be beaten upon, cf. उपरव;' Prof. Weber: 'As it were a drum standing on the ground (& hence not sounding), cf. Hâla Sapt. 256 in Zeitsch. D. M. Ges. 28, p. 412, l. 1.']

८ कार्यायसः° A.F.,om.D.; कार्यविषयेA.D.F.;°उदरिक°C.;औदारिक°B.

९ व्यवहारपटुतरातिपरमणीय F.

१० Kâś.V. ii. 1, 48 ed. पाचेसमितादि; MSS. both readings; here ag. metre.

Digitized by Google

चेषमिताद्योऽषमित्यनेनाषमेव निपातितः समासो भवति नान्यः। क्षन्नादिति यथासंभवं सर्वत्र संबध्यते ॥ * ॥ पाचेषमिता। अपचित-क्षीरा धेनुर्या सा पाचसंगतिमाचपर्यवसितव्यापारा सत्येवमुच्यते। तद्वदन्योऽपि यः फलविकलव्यापाराडम्बरः स तदुपमानात्तथा वाच्यो यथा चक्षा खरकुटी चैव इति ॥ * ॥ पाचे षाडक्षेन संघटनात्[1] क्षीरादिफलविकला। पाचेषडक्षा। शेषार्थः पूर्ववत् ॥ अथवा। पाच एव समिता मिश्रिताः[2]। पाच एव षडक्षाः प्रचुराः। नान्यच कार्ये पाचशब्देन साहचर्याद्भोजनं लक्ष्यते ॥ * ॥ गेह एव प्रगल्भः। गेहेप्रगल्भः ॥ एवं गोष्ठेप्रगल्भः ॥ * ॥ गेह एव क्षेडति विक्रमं दर्शयति। अन्यच भीरुः। गेहेक्षेडी ॥ गोष्ठेक्षेडी[3] ॥ * ॥ गेह एव शौर्याडम्बरं[4] प्रकाशयन्। गेहेनर्दी। तन्तुक्षत्तिरन्योऽप्येवमुच्यते ॥ गोष्ठेनर्दी ॥ * ॥ विजितमनेन। विजिती। यदा। विजितमस्यास्तीति विजिती ॥ गेह एव विजयते न प्रचुमध्ये। गेहेविजिती ॥ एवं गोष्ठेविजिती[5] ॥ * ॥ एवं गेहेपटुः। गोष्ठेपटुः ॥ * ॥ गेहेपण्डितः। गोष्ठेपण्डितः ॥ * ॥ गेहेव्याडः। गोष्ठेव्याडः ॥ * ॥ गेहेशूरः। गोष्ठेशूरः ॥ * ॥ गर्भ एव शूरः। गर्भान्निःसृत्य भीरुः। गर्भेशूरः ॥ * ॥ गर्भ एव सुहितो न तु बहिर्निःसृतः। गर्भेसुहितः ॥ * ॥ गर्भ एव क्षुन्नः स्वमाचाहृतेनाहारेण ततो निःसृत्य न कदाचिदुदरपूरं कृतवानिति[6]। गर्भेक्षुन्नो दरिद्रः ॥ * ॥ गर्भ एव दुग्नो मातुरेष्टया मातुरायासनेन वा ततोऽन्यच निरुद्योगः। गर्भे-

---

१ संघटनात् F.

२ A. om. मिश्रिताः.

३ गेह एव क्रीडति° गेहेक्रीडी। गोष्ठेक्रीडी corr. D.; om. F.

४ सौर्याडंबरं A.; शौर्यडिंबरं C.; सामर्थ्याडंबरं corr. D.

५ गेहेविजिता° A.; B. C. om. from गेह एव विजयते.

६ स्वभाषाहृतेना° and lacuna for कदाचिदुद् B.; स्वमाषाहृद्तेनाहा° उदरपूरं कृतवानिति A.; °उदरं भृतवानिति F.

Digitized by Google

दृप्तः ॥ अथवा गर्भेसुप्तितादीनामयमर्थः । योऽलीकाभिमानित्वाद्-सुप्तिचेष्टः स एवमुच्यते ॥ * ॥ गर्भ एव धीरो गर्भाग्निःस्तनपः । गर्भेधीरः ॥ * ॥ पिण्ड्यां खादितव्ये वस्तुनि पूरः । कलहवर्धनादिकं छला खादितव्यं खादत्यन्यच[1] कार्यान्तरे निर्विक्रमः स पिण्डीपूरः ॥ * ॥ व्रणमध्य एव कृमिः[2] । व्रणकृमिः । अल्पदृश्या ॥ कृमिशब्दः संयोगादिः संयोगविकलोऽप्यस्ति । उदुम्बरे कृमिरिव । उदुम्बरकृमिः[3] । तस्माद्रसादिशिष्टं रसमन्यं न वेत्ति स एवमुच्यत इति कश्चिदाह ॥ * ॥ कूपे मण्डूक इव । कूपमण्डूकः । ततोऽन्यज्जलस्थानं सरः समुद्रं वाऽधिकं न पश्यति । तद्वदन्यः पुरुषो ग्रामे नगरे वा ग्राम्ये वा प्रतिबद्धः ।[4] ततोऽन्यत्र पश्यति विशिष्टं स एवमुच्यते ॥ १०२ ॥

गेहेनन्दी गृहकलविङ्को गेहेमेह्याखनिकबकौ च[5] ।
गेहेवादी ननु नगरम्या ज्ञेयः कर्णेटिरिटिरियासी[6] ॥ १०३ ॥

गेह एव नन्दति । गेहेनन्दी ॥ गेहेनर्तीत्यपि कश्चित्[7] ॥ * ॥ गृहे कलविङ्क इव । गृहकलविङ्कः ॥ * ॥ गेह एव मेही । गेहेमेही । य आवश्यकार्थमपि बहिर्न निर्गच्छति भोजन एव च संरभते स एवमुच्यते[8] ॥ * ॥ आखनिको जलस्रोतः खातं[9] तस्मिन् बक इव । आख-

---

१ वादत्यन्यच A.; खादितव्यं । खादितव्यं खादत्य° C.; खादना[द् suppl.] न्यच D.

२ F. throughout क्रिमि; C. कृमि; A. B. D. now क्रिमि now कृमि.

३ संयोगादि संयोग° A.; C. om. उदुम्बरे कृमिरिव; संयोगादि°च्छदो भंगभयाच दर्शितः अथ च बहुषु पसत्रेषु (lacuna of 3 syll.) ष्वो (lac. of 11 s.) दुंबरकृमिः । D.

४ पुरुषो न ग्रामे° B.; ग्राम्ये वा प्रसिद्धनिर्वस्त्रतोऽन्यतोऽन्यत्र पश्यति° D.

५ गेहेमेह्याखनिकबाकौ च A.

६ टिरटिरियासी E.

७ गेहेनर्तीत्यपि° B. C.; गेहेनर्तीं आवृत्त्या द्रष्टव्यं । D.

८ बहिर्निर्गच्छति° A.; C. om. संरभते.

९ खातं A.; पूरोखात D.

निकबकः । यत्किंचिदात्मीय आखनिके खनते तद्गचयति नान्यच गच्छति तद्वदन्योऽपि[1]। य आत्मीये गृहे यत्किंचिदस्ति तद्गचयति[2] नान्यच गच्छति स एवमुच्यते ॥ अपर आह । आखनिरेव । आखनिकः । कुत्साद्यर्थे कः । खन्यखातनिम्नप्रदेशो[3] जलाधार उच्यते तस्मिन् बकः । आखनिकबकः[4]। स हि जलाश्रयक्षुद्रजन्तुभक्षणानुसंधानेन संकुचितात्मा[5] बद्धलक्ष्यस्तद्वदन्योऽयेवमुच्यते ॥ * ॥ गेह एव दहनशीलो नान्यच । गेहेदाही ॥ * ॥ नगरे श्वेव । नगरश्वा धृष्ट उच्यते ॥ * ॥ टिरिटिरा चापलेनानुचितचेष्टोच्यते ॥

मत्ता छन्दः । श्रेया मत्ता मभसगयुक्ता ॥ १०३ ॥

कर्णेचुरचुरा[6] कूपकच्छपावटकच्छपाः ।
गेहेमेली गृहात्सर्पो नगराकाकवायसौ ॥ १०४ ॥

कर्णेचुरचुरा[7] चापलेनानुचितचेष्टोच्यते । टिरिटिरीति गत्यनुकरणम् । चुरचुरिति वाक्यानुकरणम्[8]। तत्करोतीति ण्यन्ताद्प्रत्ययो निपातनसामर्थ्यादाऽनो न भवति[9]॥ ग्राकटायनस्तु कर्णेटिरिटिरिः[10] कर्णेचुरचुरेत्याह । अनयोस्त्र व्याख्या । कर्णे किमपि अक्षिप्ता जी-

---

१ यद्वदन्यो पि A.; D. om. ऽपि.

२ B. om. य; D. om. अस्ति; F. om. नान्यच गच्छति.

३ खन्यघातनिम्न° A.; खन्यखातनियतप्र° D.; खन्यखातः नि° F.

४ C. om. from यत्किंचिदात्मीय°.

५ जलाश्रयः क्षुद्र° A.; °संतुलक्षणानुसंधानेनासंकु° C.; °भक्षणा [या suppl.] कुंचितपक्षः तद्वद° D.

६ Thus B. C. E. F. & Kâś. V. ii. 1, 48 ed. & MSS.; cf. Marâṭhi चुरचुरणें "to smart, tingle;" कर्णेचुरचुरा D.; कर्णेचुरचुरा A.

७ कर्णेचुरचुरा B. C. F.

८ गुर्विति C.; वाक्यानुकरणं D.

९ °ण्यप्रत्ययो° D.; ऽतो न° A.; सामर्थ्यादातोर्ग भवति F.

१० कर्णेरिटिरिः A.; कर्णटिरि २ D.

Digitized by Google

वति। नास्य विक्रम इति क्षेपः[1]। टिरिटिरि चुरुचुर्वित्यनुकरणशब्दौ[2] तदाकारिणि व्यवह्रियेते ॥ * ॥ कूपकच्छपावटकच्छपौ कूपमण्डूकवत् ॥ * ॥ गेह एव मिलनशीलो नान्यत्र। गेहेमेली ॥ * ॥ गृह एव सर्पः। गृहसर्पः[3]। दुष्ट इत्यर्थः ॥ * ॥ नगरे काक इव। नगरकाकः ॥ नगरे वायस इव। नगरवायसः ॥ स्वार्थनिष्ठः परवञ्चनानिपुण[4] उच्यते ॥ अथवा। नगरकाको न क्वचित्तिष्ठति सर्वमेव नगरं परिभ्रमति तद्वत्तत्रान्यत्र वाऽनवस्थितः पुरुष उच्यते ॥ १०४ ॥

मातरिपुरुषोदुम्बरमशकौ गेहेविचित्यपि प्रोक्तः।
श्रमणा प्रव्रजिताथो कुलटा पटुना च मृदुनापि ॥ १०५ ॥

मातरिपुरुषः। यः सदाचारं भिनत्ति स एवमुच्यते। यद्वा। मातरि पौरुषमवलम्बमानो मातरिपुरुषः। तन्तुवृत्तिरन्योऽप्येवमुच्यते ॥ पितरिभूर इत्यपि भोजः ॥ * ॥ उदुम्बरे मशक इव। उदुम्बरमशकः। अल्पदृश्या[5] ॥ अथवा। उदुम्बरमशकोऽल्पप्राणः सुकुमारश्च। तादृशो यः स उदुम्बरमशकः[6] ॥ * ॥ विचितमनेन। विचिती। गेह एव विचिती। गेहेविचिती। अयमर्थः। गेहे स्थित्वेदं युक्तमिदमयुक्तमिति विचिनोति निरूपयति बुद्धिमत्तां[7] प्रकाशयति न सभामध्ये कार्ये वा स एवमुच्यते ॥ * ॥ एतेषां यथासंभवं गणपाठसामर्थ्यात् सन्न-

---

१ अनयोश्चाव्याख्या० जीवितनाथ० A.; इति शेषः D.; C. om. from टिरिटिरिः कर्णेचुरु०.

२ चुरुर्वित्य० A.

३ गृहेसर्पः A.

४ परवचना० C.; परवंचनान्निपुणपुण A.; D. corrupt.

५ अनल्पदृश्य D. (and श्रीभोजः as usual for भोजः); C. om. अल्पदृश्या.

६ तादृशो यः० D.; B. C. om. from अथवा; A. om. अथवा.

७ बुद्धिमतां B. C., and omit इदमयुक्तं.

म्या अलुक् ॥ आकृतिगणोऽयम् । तेन । उदपानमण्डूक इत्यादयो ऽनुवर्तव्याः ॥ * ॥ इति पाचेयमितादिः ॥ * ॥

कुमारशब्दः श्रमणादिभिर्विशेषैः[1] सह समस्यते । समासस्तु कर्मधारयः ॥ श्राम्यतीति श्रमणा । कुमारी चासौ श्रमणा च । कुमारश्रमणा[2] ॥ * ॥ कुमारप्रव्रजिता ॥ * ॥ कुमारकुलटा ॥ * ॥ कुमारश्वासौ पटुश्च । कुमारपटुः ॥ * ॥ कुमारमृदुः ॥ १०५ ॥

तापसीनिपुणादासीगर्भिण्यध्यापकाः स्मृताः ।
कुशलः पण्डितश्चाथ चपलश्चाभिरूपकः ॥ १०६ ॥

कुमारतापसी ॥ * ॥ कुमारनिपुणा ॥ * ॥ कुमारदासी ॥ * ॥ कुमारगर्भिणी ॥ * ॥ कुमाराध्यापकः ॥ * ॥ कुमारकुशलः ॥ * ॥ कुमारपण्डितः ॥ * ॥ कुमारचपलः ॥ * ॥ कुमाराभिरूपकः ॥ * ॥

स्त्रिलिङ्गपदेन स्त्रिलिङ्गविशिष्टस्यापि ग्रहणमिति न्यायात् कुमारशब्दः श्रमणादिभिः[3] स्त्रीलिङ्गैः स्त्रीलिङ्ग एव समस्यते । पुंवादिभिस्त्वभिधेयलिङ्गैस्त्रिलिङ्गः । तेन कुमारपट्वी । कुमारमृद्वी । इत्यादि सिद्धं भवति ॥ १०६ ॥ इति श्रमणादिः ॥

किंशुकः किंवदन्ती स्यात् किंकिरातश्च[4] किंनरः ।
किंपुरुषोऽथ किंदासः[5] किंजल्काद्या बुधैर्मताः ॥ १०७ ॥

किंशुकादयस्तत्पुरुषसंज्ञायां विषये साधवो भवन्ति ॥ * ॥ किंशुकः । पलाशः ॥ * ॥ किंवदन्ती । अनश्रुतिः ॥ * ॥ किंकिरातः[6] ।

---

१ श्रवणादिभिर्° A. D.; विशेषैः F.
२ श्रवणा च° A.; °कुमारश्रवणा B.
३ श्रवणादिभिः A.
४ किंकरातश्च A. B. C.
५ किंपुरुषो च दासश्च D. E.
६ किंकरात A. B. C.

Digitized by Google

कुरण्टकः ॥ * ॥ किंनरः । मधुः ॥ * ॥ किंपुरुषः । स एव ॥ * ॥ किंदासः । राजर्षिः ॥ * ॥ किंजल्कः । पुष्परेणुः ॥

आद्यशब्दादन्येऽपि द्रष्टव्याः । अयं च गणः श्रीभोजदेवाभिप्रायेण ॥ १०७ ॥ इति किंशुकादिः ॥

व्याघ्रः कुञ्जामहिषरुरवः[२] कुञ्जरेन्दू वराहः
सिंहो वज्रं वृषभकलशौ चन्दनं पुण्डरीकः[३] ।
चन्द्रः कुम्भर्षभकिसलयं पल्लवस्तृक्षपद्मौ[४]
हस्तिश्वानावृषितरुवृका बिल्वमप्यत्र लक्ष्यम् ॥ १०८ ॥

सुबन्तं पदं केनचिद्गुणेन परार्थे प्रयुक्तैर्व्याघ्रादिभिः सह गौणैर्व्याघ्रैरित्यनेन समस्यते । समासः कर्मधारयसंज्ञो भवति ॥ * ॥ व्याघ्र इव । व्याघ्रः । पुरुषश्चासौ व्याघ्रश्च । पुरुषव्याघ्रः ॥ * ॥ स्त्रीकुञ्जा[५] ॥ * ॥ पुरुषमहिषः ॥ * ॥ पुरुषरुरुः[६] ॥ * ॥ पुरुषकुञ्जरः ॥ * ॥ वदनेन्दुः[७] ॥ * ॥ पुरुषवराहः ॥ * ॥ पुरुषसिंहः ॥ * ॥ वाग्वज्रः ॥ * ॥ पुरुषवृषभः ॥ * ॥ कुचकलशौ ॥ * ॥ मुनिचन्दनः ॥ * ॥ मुखपुण्डरीकम्[८] ॥ * ॥ मुखचन्द्रः ॥ * ॥ स्तनकुम्भौ ॥ * ॥ पुरुषर्षभः[९] ॥ * ॥ करकिसलयम् ॥ * ॥ पाणिपल्लवः ॥ * ॥ पुरुषर्क्षः[१०] ॥ * ॥ पाणिपद्मम् ॥ * ॥ पुरुषहस्ती ॥ * ॥

---

१ आदिशब्दाद्° A. B. C. F.

२ व्याघ्रकुंभा° A.; कुंचा° B. C. D.; कुंवा° E.

३ कलसौ° A. E.; कलभौ° B.; चंदनः° F.

४ ? पल्लवस्तुञ्जपद्मौ A. B. C. E. (!); पल्लवः कुंभपद्मौ F.; पल्लाक्षुंजपद्मौ D. (? °तुष or तुच्छ).

५ स्त्रीकुंचा B. C.; स्त्रीकुचां A.

६ पुरुषभीरुः A.; पुरुषरुभः B.; अत्पभीरुः D.

७ F. adds पुरुषेंदुरित्यपि.

८ °पुंडरीकः B. C. F.

९ भरतर्षभः A.; पुरुषऋषभ B. C. F.

१० ? पुरुषतुंजः C.; पुरुषदंजः (*i.e.* °दच = ऋच?) D.; पुरुषमुंजः A.; पुरुषजंडः B.; om. F.; see note ४.

Digitized by Google

वानरस्था ॥ * ॥ राजान ऋषय इव । राजर्षयः ॥ * ॥ वैरं तरुरिव समूलत्वात् । वैरतरुः ।

बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः[1] ॥

पुरुषवृकः ॥ * ॥ ओष्ठो लौहित्यादिम्बमिव ।

ओष्ठेन रामो रामौष्ठबिम्बचुम्बनचुञ्चुना[2] ॥

आकृतिगणोऽयम् । तेन पुरुषवृष इत्यादयोऽपि भवन्ति[3] ॥ १०८ ॥

इति व्याघ्रादिः ॥

श्रेणिः पूगो निधननिपुणब्राह्मणाः पण्डितोऽथो[4]
मन्त्रो मुण्डो निचयचपलक्षचियाध्यापकाश्च ।
इन्द्रो देवः कृपणविशिपौ निर्धनोकौ पटुर्वा
राशिर्भूतश्रमणकुशलाः[5] कुन्दुमः स्याद्वदान्यः ॥ १०९ ॥

श्रेणीत्यादयः शब्दा अच्यन्ताः कृतादिभिः सह वा समस्यन्ते । समासः कर्मधारयो भवति ॥ * ॥ अश्रेणयः श्रेणयः कृताः । श्रेणिकृताः पुरुषाः ॥

वणिक्पथे पूगकृतानि यत्र भ्रमागतैरम्बुभिरम्बुराशिः[6] ॥

अनिधनरूपा निधनरूपाः कृताः । निधनकृताः[7] शुचयः ॥ * ॥ निपुणोदाहृताः ॥ * ॥ ब्राह्मणमताः ॥ पण्डितज्ञाताः ॥ * ॥ मन्त्रमिताः ॥ * ॥ मुण्डसंभावितः ॥ * ॥ निचयोच्चारिताः ॥ * ॥ चपलापाकृताः ॥ * ॥ चचियमताः[8] ॥ * ॥ अध्यापकोदिताः । अधीतेऽध्यापक इति शकटा-

---

१ Śiś. 2, 38; A. C. D. om. the first pâda.

२ Śiśup. 2, 14; रामोष्ठ° B. C. F.; °चुंबनचुंबना A. B. D.; °चंचुना F.; °चुंब्रजचुंबजा C.

३ A. om. ऽपि; इत्यादावपि भवति D.

४ पंडितोर्थो D. E.; पंडितोधी F.

५ °श्रवणकुशलाः A.

६ Śiśup. 3, 38.

७ अनिधनरूपा निधनकृताः A.C.D.

८ चचियमिताः A.; om. D.

Digitized by Google

कृजः ॥ * ॥ दृष्टावधारिताः ॥ * ॥ देवाज्ञाताः । वेदेति रत्नमतिः ॥ * ॥ कृपणाख्याताः ॥ * ॥ विग्रिपं गृहम् । अविग्रिपं विग्रिपं कृतम् । विग्रिपकृतम् ॥ भोजस्तु विग्रिष्ट इत्याह । वामनो गण इत्यपि ॥ * ॥ निर्धनोपकृताः ॥ * ॥ ऊको राग्रिस्थानम् । किलिञ्चा इत्यपरे[1] । ऊकावकल्पिताः ॥ * ॥ पटूक्ताः ॥ * ॥ राग्रिकल्पिताः ॥ * ॥ भूतनिराकृताः[2] ॥ * ॥ श्रमणविश्रुताः ॥ * ॥ कुग्रलाख्याताः ॥ * ॥ कुं भूमिं दुनोति । कुन्दुः । उन्दुरः ।[3] तं मीनाति हिनस्ति । कुन्दुमो मार्जारः । कुन्दुभावकल्पिताः ॥ अपरे तु कन्दुमेति पठन्ति । कन्दुः पाकस्थानम् । तस्मिन्मिनोतीति[4] कन्दुमः । अकन्दुमाः कन्दुमाः कृताः[5] । कन्दुमकृताः ग्रालयः ॥ कुकुमेति रत्नमतिः ॥ * ॥ वदान्योदीरिताः ॥

कृताद्यस्तु सर्वैरपि व्याघ्रादिभिः संबन्धमनुभवन्ति । अश्रेण्यः श्रेण्यो विहिताः । श्रेणिविहिताः । श्रेणिनिरूपिताः । श्रेण्यासीना इत्याद्यो भवन्ति । यच्च सामर्थ्यं नास्ति तच्चेति ग्रब्दाध्याहारो द्रष्टव्यः । अनिर्धना निर्धना इत्युपकृताः । अचपलाश्चपला इत्यपाकृताः । अभूता भूता इति निराकृता इति ॥ आकृतिगणोऽयम् । तेन तूलकृता इत्याद्योऽपि द्रष्टव्याः[6] ॥ १०९ ॥ इति श्रेण्यादिः ॥

कृताद्यस्तु यथायोगं व्याख्याताः । ते च

कृतमितभूतोदाहृतविश्रुतकलितावधारितोपकृताः ।
आस्थितनिराकृतोक्ताः संभावितमतविकल्पितासीनाः[7]
॥ ११० ॥

---

१ कलिंगा इत्यपरे B. C.; ओको० कलिंग इत्यपरे । ओकावकल्पिताः F.

२ भूतनिराकृताः C.; om. A.

३ कुंदुरुंदुरुः F.; तं मिनोति० D.; तं सीना हिनस्ति० A.

४ कंदु पा० D.; कंदू पा० A.; तस्मिनोतीति A. D.

५ °कंदूम० thrice A.

६ तेन कृता इत्याद्यो० A.; तूलकृताः गणकृता इत्याद्यो पि भवन्ति । अभूता भूता इति निराकृता इः ॥ D.

७ E. om. मत; C. om. the second half stanza; D. om. from कृताद्यस्तु.

Digitized by Google

अवकल्पितो निरूपितविहितोपाकृतसमाज्ञाताः[१] ।
आज्ञातोदितदृष्टावज्ञातोदीरिताख्याताः[२] ॥ १११ ॥

इति ज्ञतादिः ॥

वृन्दारको वराहश्च नागकुञ्जरपुङ्गवाः ।
वृषभव्याघ्रशार्दूलहंससिंहर्षभादयः ॥ ११२ ॥

गोश्चासौ वृन्दारकश्च । गोवृन्दारकः ॥ * ॥ नृवराहः ॥ * ॥ पुंनागः ॥ * ॥ अश्वकुञ्जरः ॥ * ॥ मुनिपुङ्गवः ॥ * ॥ रघुवृषभः ॥ * ॥ नरव्याघ्रः ॥ * ॥ राजशार्दूलः ॥ * ॥ राजहंसः ॥ * ॥ पुरुषसिंहः ॥ * ॥ भरतर्षभः[३] ॥

आदियहणात् । नवतमाम्रनिभश्च नभस्तरोरित्यादयो[४] ऽपि भवन्ति ॥ ११२ ॥ इति वृन्दारकादिः ॥

मतल्लिकोद्गमिश्राः स्युः प्रकाण्डस्थलभित्तयः[५] ।
हस्तपाशतटाः पादः पालीमचर्चिकादयः[६] ॥ ११३ ॥

अश्वमतल्लिका । गोमतल्लिका । यथा ।

अभ्याजतोऽभ्यागतदूर्णतर्णकां[७]
निर्याणहस्तश्च पुरो दुधुक्षतः ।
वर्गाद्ववां उंछतिचारु निर्यतीम्
अरिर्मधोरैक्षत गोमतल्लिकाम् ॥

---

१ विहितोपज्ञताः स० E.; विहितोन्नपाज्ञताः स० B.; °ज्ञताः समा० A. F. against metre.

२ अज्ञातोदित० E.; आत्मगोदितः वृष्टौ वृष्टावन्नागोदीरि० A.; °दीरिताः ख्याताः B. E. F.; C. D. om. the *gaṇa* kṛitâdi.—[ज्ञात, उच्चारित, उपाज्ञात, and ख्यित, though instanced in the comment on the śreṇyâdi, are not included in these stanzas.]

३ भरतऋषभः B. C. D.

४ Śiśup. 6, 28.

५ मतल्लिकोद्ग० A. B. C. D.; °विस्तयः A.

६ °पाग्रतराः E.; हस्तपादतटाः°A.

७ Śiś. 12, 41; °तूर्णतर्षिका A.; °तूर्णतीर्षिका D.; B. C. F. omit the whole stanza.

Digitized by Google

साध्वीं गामपश्यदित्यर्थः ॥ * ॥ पुरुषोद्वः[1] ॥ * ॥ आर्यमिश्राः ॥ * ॥ गोप्रकाण्डम् ॥ * ॥ वत्सःखलम् ॥ * ॥ अंसभित्तिः[2] ॥ * ॥ केशग्रहाः ॥ * ॥ केशपाशः ॥ * ॥ स्तनतटम् ॥ * ॥ तातपादाः ॥ * ॥ कपोलपाली ॥ * ॥ गोमचर्चिका ॥

एत आविष्टलिङ्गत्वान्मतल्लिकादयोऽन्यलिङ्गेऽपि जातिशब्दे स्वलिङ्गोपादानात्[3] एव समानाधिकरणा भवन्ति । प्रशंसावचनत्वं चैषां समास एवेति वाक्यं न भवति[4] ॥ आदिग्रहणात् तमस्काण्डः । उरःकवाटः । कुमारीतल्लजकादयो भवन्ति[5] ॥ ११२ ॥ इति मतल्लिकादिः ॥

खसूचिखेटौ कितवोऽथ चौर-
मूर्खध्रुवास्तस्करदुर्दुरूटौ[6] ।
धूर्तो विटः स्याद्धतकश्च भीरुश्
चेलश्च जाल्मापसदौ च धृष्टः[7] ॥ ११३ ॥

कुत्सितवाचिपदमेतैः[8] खसूच्यादिभिः सह समस्यते । तत्पुरुषस्य समासः ॥ * ॥ वैयाकरणस्वासौ खसूची च । वैयाकरणखसूची । यः पदपदार्थनिर्णयं कर्तुमुचितं पृष्टः सन् निष्प्रतिभत्वात्[9] खम् आकाशं सूचयति स एवमुच्यते ॥ शाकटायनस्तु पृषोदरादित्वात् षत्वे खषू-

---

१ पुरुषोद्वः A. B. C. D.

२ अंशभित्तिः A. D.

३ शब्देस्त्रिलिंगो° C.; D. corr. अविस्त्रिलिंगत्वात्° शब्दबलान्नोपादानात्; A. cf. note ५.

४ प्रशंसावचनत्वे चैषां° F.; C. om. from प्रशंसा°.

५ कुकुमारी । मतल्लिकादयो° C.; A. om. from केशपाशः.

६ खसूचीखेटौ B. C. F. against metre; °खेडौ कितवो च° C.; मूर्खौ ध्रुवस्तस्कर° D.; दुर्दुरूढौ D. F.

७ पूर्खौ विटः °च वृष्णः । D.; °अपशब्दौ° B. C.; °वृष्टः B. C.; °वृष्णः D.; A. om. this śloka and the comment.

८ कुत्सितपदभेदैः D. (orig. °भेतैः).

९ निष्प्रतिपन्नत्वात् C.; D. corr. °निर्गतभुत्सर्य पृष्टो निःप्रतिभः सन्.

Digitized by Google

च्यादि[1]। वामनप्रभृतयस्तु खसूचिरित्याहुः[2] ॥ * ॥ मुनिखेटः ॥ * ॥ याज्ञिककितवः ॥ * ॥ कविचौरः ॥ * ॥ पाठकमूर्खः ॥ * ॥ ब्राह्मणध्रुवः। जातिमात्रोपजीवी[3] ॥ * ॥ रज्जुकतस्करः ॥ * ॥ मीमांसकदुर्दुरूटः[4]। मीमांसाध्ययनेन शौचाचारादिलक्षणं फलमनवाप्य[5] वेदविज्ञावनमद्यपानाद्यनुष्ठाननिरतो नास्तिको जात इत्यर्थः ॥ * ॥ मुनिधूर्तः ॥ * ॥ मुनिविटः। शिरस्तुण्डमुण्डनदण्डादिमुनिवेषधारणादेश्चागमनमद्यपानाद्यनाचारप्रवृत्त एवमुच्यते[6] ॥ * ॥ राजसूदकः ॥ * ॥ चचियभोक्तः ॥ * ॥ ब्राह्मणचेलः ॥ * ॥ ब्राह्मणजाल्मः ॥ * ॥ तापसापसदः ॥ * ॥ ग्राम्यधूर्तः[7] ॥

आकृतिगणोऽयम्। तेन काण्डीरकाण्डखण्डच्छान्दसवठर[8] इत्यादयो द्रष्टव्याः ॥ एतच्च गणत्रयं श्रीभोजदेवाभिप्रायेण द्रष्टव्यम्। अन्यवैयाकरणमतेन सूचाण्येतानि ॥ ११४ ॥ इति खसूच्यादिः ॥

मयूराच्छत्रतश्छात्राध्वंसकः प्रेहिवाणिजा[9]।
कम्बोजाद्भवनान्मुण्डोऽथ प्रेहिस्वागता तथा[10] ॥ ११५ ॥

मयूरध्वंसकादयः समासा मयूरध्वंसकादयोऽयमित्यनेन[11] कर्म-

---

१ D. om. from ग्राम्यटायन°; F. om. यत्ते.

२ °तु सूचिरित्याहुः C.; खसूचिरित्याहुः D.; cf. Kâś. V. on Pân. ii. 1, 53.

३ ब्राह्मणध्रुवः° D.; °जातिमात्रोपजातिर्वा। C.

४ °दुर्दुरूटः C.; दुर्दुरूढः F.; D. corr. दुर्दुरूढः श्रुतः वैमिनीयनिधातोपि तत् फलमनवाप्य वेदविरुद्धमद्यपाना°.

५ फलमवाप्य° B. C.

६ शिरस्तुंडनदंडादिमुनिधारणात° B.; °मद्यपानाद्यनाचारप्रवृत्त° D.

७ ग्रामधृष्टः B. C. D.

८ °छांदसः वठर B.; छांदसं वठर C.; कांडीरकां खण्डछांदसवठर D.

९ मयूराच्छत्रतश्छा° B.; मयूरच्छत्रवछा° E.; °ध्वंसका° D.; प्रहिवा° C.

१० कंबोजाद्भववान्° C.; A. om. this śloka and the comment to प्रेहि आदरेणागच्छे[त्यर्थः].

११ °ध्वंसकादयश्चेत्यनेन D.; C. om. from समासा to ऽयम्.

Digitized by Google

धारयसंज्ञा भवन्ति ॥ * ॥ विगता अंसा यस्य । व्यंसकः । रमणीयाकारदेहवेषोपेतत्वाद्[1] मयूरवन्मयूरः पुमान् । स चासौ व्यंसकश्च बाह्यसाध्यव्यापारपुरुषकारविकलः[2] कश्चिदेवं प्रतिपद्यते ॥ यदा । व्यंसयति च्छलयतीति[3] व्यंसकः । स चासौ स च यो लुब्धकानां मयूरो गृहीतग्रिवो[4] ऽन्यान्मयूरांश्छलयति वञ्चयति स विप्रलम्भक उच्यते[5] ॥ * ॥ छत्रवद्व्यंसकः । छत्रव्यंसकः । छत्रं हि प्रसारितं सत् सुन्दराकारमाभाति स्वयं तु स्थातुमशक्तमन्येन प्रयत्नवता धार्यते । एवमन्योऽपि यः सदा परावष्टम्भबलस्थितिः सुन्दराकारोऽपि स एवमुच्यते ॥ * ॥ छात्रवद्व्यंसकः[6] । छात्रव्यंसकः । छात्रो हि यथा लब्धभिक्षामाचवृत्तिकृतसंतोषो निर्व्यापारतया कार्यतो व्यंसकस्तद्वदन्योऽप्येवमुच्यते[7] ॥ छात्ररूपेण वञ्चको वा लोकस्य । छात्रव्यंसकः ॥ * ॥ कम्बोज इव मुण्डः । कम्बोजमुण्डः ॥ यवन इव मुण्डः । यवनमुण्डः ॥ दीक्षितेन मुण्डितव्यम् । कम्बोजा यवनाश्च मुण्डा भवन्ति । एवमिमौ वृथा मुण्डावित्येकोऽर्थः ॥ * ॥ प्रेहि स्त्रियस्व वाणिजेति[8] यस्यां सा प्रेहिवाणिजा । प्रपूर्व इण् मरणे । यथा प्रेतः ॥ अन्ये त्वाहुः । प्रेहि । आदरेणागच्छेत्यर्थः[9] । स्त्रीलिङ्गत्वादाङ् निपातनादेवाकार इति केचित् ॥ * ॥ प्रेहि स्वागतमस्याम् । प्रेहिस्वागता ॥ ११५ ॥

---

१ °देहवेष[नैपुण्योपलंभात् corr.]D.

२ बाह्यसाध्य° C. F.

३ बलयतीति B.; व्यंसयतीति बलयति C.

४ D. corr. thus for orig. गृहीतग्रिघो (? *i.e.* °ग्रिखो).

५ विप्रलंभ उच्यते D.

६ C. om. from छत्रं हि.

७ °माचवृत्तिः कृतसंतोषो निर्व्यापारतयार्यतो° D.

८ प्रेहियस्व वा° C.; प्रेहियस्व वाणियेति B.; प्रेहि मृग्यस्व° D.

९ आदारणागच्छेत्यर्थः D.; आदरेण गच्छे° F.; A. see p. १५६, note १०.

Digitized by Google

एह्यपेहि क्रियापूर्वा वाणिजा स्वागतापि च ।
द्वितीया विघसा चापि प्रघसा प्रकसा तथा[1] ॥ ११६ ॥

एहि वाणिजेति यस्यां तिथौ क्रियायां वा सा[2] । एहिवाणिजा ॥ केचिद् आयान्ति गच्छन्ति[3] वाणिजा यस्यामिति विगृह्य निपातनादेहिभावः ॥ * ॥ अपेहि । अपसर वाणिजेति यस्यां सा[4] । अपेहिवाणिजा ॥ * ॥ एवम् एहिस्वागता ॥ अपेहिस्वागता ॥ * ॥ एहिद्वितीया ॥ अपेहिद्वितीया ॥ * ॥ एहिविघसा ॥ अपेहिविघसा ॥ * ॥ एहिप्रघसा ॥ अपेहिप्रघसा[5] ॥ * ॥ एहिप्रकसा ॥ अपेहिप्रकसा ॥ अपेहिप्रकसं दूरमिति यस्याम् । अपेहिप्रकसा । इति तु प्राकटायनः[6] ॥ ११६ ॥

स्नात्वाकालकपीत्वास्थिरकाकिंचननिपत्यरोहिण्यः ।
आहरपूर्वाश्चेलावसनावनितास्तथा विवता[7] ॥ ११७ ॥

स्नात्वा काक्षीभूतः क्षपीभूतः । स्नात्वाकालकः ॥ * ॥ पीत्वा स्थिरीभूतः । पीत्वास्थिरकः ॥ * ॥ न भवति किंचन क्वचित् किंचिदुपयुज्यत इत्यकिंचनं निष्प्रयोजनम्[8] । निपातनान्मुगागमः[9] । नास्य वा किंचनास्तीति । अकिंचनम् । अकिंचनः[10] ।

अकिंचनः सन् प्रभवः स संपदामकिंचना[11] ॥

---

१ विघसा चापि प्रकसा विकसा तथा । C.; °विघसो वापि° F.

२ एहि वाणिजेति यस्यां सा ॥ C.

३ आयाति गच्छति° B.

४ C. om. from एहिवाणिजा.

५ C. om. from एहिप्रघसा.

६ अपेहिप्रकसा ॥ दूरमिति यस्यां अपेहिविकसा इति° C.; D. F. om. तु.

७ पूर्वा चेला° A.; आहरवेलापूर्वा वेला° C.; °पूर्वा चेला वसना वनिता तथा° E.

८ °अकिंचननिष्प्र° F.

९ निपातनात्पुगागमः D. (? B.).

१० Thus A.; B. C. D. om. अकिंचनः; F. om. अकिंचनम्.

११ ? अकिंचनमकिंचनः° B. C.; see next note.

Digitized by Google

न किंचनं नास्त्र वा किंचनमस्तीति[1] विग्रहेण किंचनशब्दोऽनव्ययोऽव्ययीति चन्द्रदुर्गाभिप्रायो लक्ष्यते ॥ * ॥ निपत्य भूमौ पतिता रोहिणी लोहिनी रक्ता भवति या सा निपत्यरोहिणी ॥ * ॥ आहर चेलमिति यस्यां सा । आहरचेला[2] ॥ * ॥ एवम् आहरवसना ॥ * ॥ आहर वनितामिति यस्यां क्रियायां सा । आहरवनिता[3] ॥ * ॥ आहर वितनं विस्तीर्णमिति यस्यां सा । आहरविततां[4] ॥ विततं जालमानाय इत्येके ॥ ११७ ॥

एहीडं पचलवणा प्रोहकपर्दा निकुच्यकर्णिश्च[5] ।
उद्यमचूडैहियवं भुक्तामुहितोडरावमृजे ॥ ११८ ॥

दृडा स्त्री । यथा । महती दृडा । महेडा ॥ एहि । आगच्छ । इडे स्त्रीति यस्मिन्कर्मणि तद् एहीडं विवाहादि कर्म । आस्ताध्यायादिको वा अन्यप्रविभागः ॥ अन्यपदार्थत्वेऽपि शब्दशब्देनपुंसकत्वमेव ॥ * ॥ पच लवणमिति यस्यां क्रियायां सा पचलवणा ॥ * ॥ प्रोहापनय कपर्दं केशकलापं वराटकं वेति यस्यां सा प्रोहकपर्दा[6] ॥ * ॥ निकुच्य कर्णौ धावति । निकुच्यकर्णिः[7] ॥ * ॥ उद्यमोत्क्षिप चूडामिति यस्यां सा ।

---

१ समंपदा अकिंचना । न किंचनं नास्त्र वा किंचनास्तीति D.; सखम्पदा। अकिंचना । न° A.; अकिंचना अकिंचनं नास्त्र वा° B.; संपदा । अकिंचनं न किंचनं° F.; C. om. from किंचन क्वचित् to न किंचनं नास्त्र वा.

२ आहार चेलमिति° आहारचेला A.; व for च C.

३ एवं आहरवसन्या आहर वनिचमिति °आहारवनिता A.

४ आहार विततं° आहारवनिता A.

५ एहिडं° E.; प्रोहिकप° A. B. C.; मोहि° D.; °कर्णिश्च A.; निकुच्यर्णिश्च C.; कर्णिश्च E.

६ प्रोह्मपनय° B. C.; मोहापनय° D.; कपर्दं° A. C.; कपर्दं: D.; केसकलापं A.; केशकलापे D.; °प्रोहिकपर्दा B. C.; मोहकपर्दा D.

७ निकुच्यवर्णी° A.; निकुच्यकर्णी धावर्णी धावति° C.

Digitized by Google

उद्दमचूडा। अभिभवनं निर्भयता वा वर्तत इत्यर्थः॥ * ॥ एहि यवेति यस्मिन्कर्मणि तद् एहियवम्॥ अन्यस्तु। एहि यवैरिति यस्मिन्कर्मणीत्याह॥ * ॥ भुक्तासुहितः। यो यत्किंचिदग्निला दृप्तो भवति स एवमुच्यते॥ * ॥ उद्धर कोष्ठाद्धान्यमन्यदा[1]। अवसृज देहीति यस्यां सा। उद्धरावसृजा॥ ११८॥

उच्चावचप्रोहकटोच्चनीच-
निश्चप्रचाः कृन्त्रिविचक्षणा च[2]।
विचप्रचा चाचपराचयुक्ता-
ऽकुतोभयाचोपचकांदिशीकाः॥ ११९॥

उच्चं च तदवचं च। उदक् चावाक् चेति वा। उच्चावचम्। यथा।

भिन्नेषु रत्नकिरणैः किरणेष्विवेन्दोर्[3]
उच्चावचरूपगतेषु सहस्रसंख्याम्॥

उच्चितं चावचितं च। उच्चावचमित्यन्ये[4]॥ * ॥ प्रोह कटमिति यस्यां सा प्रोहकटा। प्रोहणं वीरणादेः कटादिभावाय विरचना[5]॥ * ॥ उच्चैश्च नीचैश्च यत्तद् उच्चनीचम्। उच्चं च नीचं चेति वा॥ * ॥ निश्चितं च प्रचितं च। निश्चप्रचम्[6]। निश्चितं च प्रचितं च यस्यां क्रियायां सा निश्चप्रचा॥ निष्कुषितं च निस्त्वचं च। निश्चत्वचमिति केचित्[7]॥ * ॥

---

१ उद्धकोष्ठाद्धा। B.; उद्धर कोष्ठान्। corr. D.; कोष्ठाद्धान्यद्धा C.

२ विचप्रचाचाच° F.; उच्चावच° A.; °कटोच्चनीच° B.; छत्रिवि° C.

३ Śiś. 4, 46; इहेन्दोर् eds.

४ उचितं च अव° B. C. D.; उच्चावचमि° A.

५ प्रोहणं वारणादिः° C.; प्रोहश्चर्मं च पादेः कटादि° D.

६ B. om. from निश्चितं.

७ निस्तुचं च।° A.; °निश्चत्वचमिति B.; °च स्वचं च।° C.; निष्कुषितं निश्चं सूचमिति D.

Digitized by Google

छती वेष्टने । छन्द्धि विशिष्टं चचणमिति यस्यां सा छन्द्धिविचचणा ॥ आकटायनस्तु । छन्द्धि विचिणीहीति यस्यां सा छन्द्धिविचिणा[1] । कर्मा-सविषया क्रिया । निपातनाद्धिलोपो विकरणस्य दुरवत्वं चेत्याह ॥ * ॥ विछतं च प्रछतं च यस्यां क्रियायां सा विचप्रचा ॥ * ॥ आचितं च परा-चितं च । आचपराचम् ॥ अवाक् च परस्ताच्च । आचपराचम्[2] ॥ * ॥ नास्ति कुतोऽपि कस्मादपि भयं यच । अकुतोभयम् ।

अकुतोभयसंचाराः षट् कर्माणि प्रकुर्वते[3] ॥

आचितं चोपचितं च । आचोपचम् ॥ आगच्छ चोपगच्छ च यस्मिन्क-र्मणि तद् आचोपचमित्यन्ये ॥ * ॥ कां दिशं व्रजामीति । कांदिशीकः । गणपाठसामर्थ्यादीकण्प्रत्ययः[4] ॥ ११६ ॥

उद्यपनिवपाथोद्यमविधमाहोपुरुषिकेहपञ्चम्यः ।
अहमहमिकायदृच्छोत्पचनिपचाः प्रोष्यपापीयान्[5] ॥१२०॥

उद्यप निवपेति यस्यां सा । उद्यपनिवपा ॥ * ॥ उद्यम विधमेति यस्यां सा । उद्यमविधमा ॥ * ॥ अहो पुरुषोऽहमित्यस्य भावः । आहोपुरुषि-का[6] । मनोज्ञादित्वादकञि[7] ॥ * ॥ इह पञ्चमीति यस्यां क्रियायां सा । इहपञ्चमी ॥ इहपञ्चमीशब्दसंपर्कात्प्रकरणमधिकारो वा । इहपञ्चमी-त्यन्ये ॥ * ॥ अहं शक्तोऽहं शक्त इत्यस्ति यस्यां सा । अहमहमिका । स्वार्थि-

---

१ विचिणीहीति° छन्द्विविचणा A.; विछणीहीति° कन्द्विविछणा D.; छन्द्वि विचिचिणीहि° छन्द्विविचचणा F.—Bö. and Gaṇaratnâv. have छन्तविचचणा; also Kâś. V. ed.; but MSS. I. O. 2440, Beng. As. Soc. छन्धिविचचणा. [छंत छिंत्ति हे विचचणेति यस्यामभिधीयते सा छंतविचचणा । Gaṇaratnâv.]

२ Gaṇaratnâv. explains both ways.

३ अकुतोभयं । सं° C.; कुर्वते A. D.

४ °सामर्थ्यादीकक् D.; कांदिशाकः। °आकण्प्र° C.; °र्थात् ठीकप्रत्ययः F.

५ °निपचा प्रोष्यपापीयान् A.; प्रो-ष्यपापीन् C.

६ अहोपुरुषिका° A. B.; ऽहमित्य-स्यां क्रियायां corr. D.

७ मनोज्ञादिस्वादिति कश्चित् D.; not mentioned in the *manojñâdi* 409-10.

Digitized by Google

को मत्वर्थीयो वा काट्[1]॥ अहं पूर्वम् अहं पूर्वं प्रवर्त इति विगृह्य तद्भावो[2]ऽहमहमिका। पृषोदरादित्वाद्ध्रस्वाभावादिरिति सुधाकरः[3]॥ *॥ या यदृच्छाऽभिप्रायः[4]। यदृच्छा। स्वभावाद् यथेच्छमित्यर्थे वृत्तिः[5]। यथा। यदृच्छयासूयति यत्तपस्यते[6]॥ *॥ उत्यच निपचेति यस्यां क्रियायां सा। उत्यचनिपचा॥ आख्यातमाख्यातेन सातत्य इति सातत्ये समासः। असातत्यार्थ एव पाठः[7]॥ अन्ये तु। उत्यच। आख्यातोपसर्गसमुदायो नाख्यातग्रहणेन गृह्यते॥ *॥ पापं विद्यते यस्य स पापी।[8] बहूनां पापिनां मध्येऽतिशयेन पापी। पापीयान्॥ प्रोष्य विदुषो भूत्वा पापीयान् विरूपकः। यथा।

राघवः प्रोष्यपापीयाञ्जहीहि तमकिंचनम्[9]॥ १२०॥

आख्यातेनाख्यातं सातत्येऽन्यक्रियापदस्यार्थे।
कर्तारं च ब्रूते हि कर्मणा बहुलमाभीक्ष्ण्ये॥ १२१॥

आख्यातं तिङन्तमाख्यातेन तिङन्तेन सह समस्यते। अन्यस्य क्रियापदस्यार्थे। अश्नीत पिबतेति सततं वाचो भवन्ति यस्यां भृत्यजनाश्नादानक्रियायां सा। अश्नीतपिबता। अत्रैषामाख्यातप्रतिरूप-

---

१ स्वार्थे को म० B. C.; मत्वर्थीयो पाठः A.; स्वार्थको मत्वर्थीयो (corr. ये) पाठः D.; वा पाठाभावपाठः B.; वा पाठः C. F. [काट् (क + आट्) = काप् Vop. 4, 6]; cf. next page, n. ८.

२ °पूर्वप्रवर्त्तेति इति° तद्भावे A.; °अहं पूर्वत्वं इति° B.

३ Thus corr. D.; सुखाकरः MSS.; cf. p. ४१, note १७.

४ यावच्छा अभिप्रायः° A.; यादृच्छा अभि° C.; या अच्छा अभिप्रायः यदृच्छा अभिप्रायः।° D.; यादृग्भी इच्छा ऽभिप्रायः F.

५ °इत्यर्थवृत्तिः A.; इत्यर्थे वृत्तिः C.

६ Kirât. 14, 21.

७ C. om. सातत्य इति; D. corr. इति सातत्ये सिद्धे असातत्यार्थं इह पाठः।

८ यस्या सा पापी A.; यस्य सा पापी। °पापीना C.

९ Bhaṭṭik. 5, 91.

Digitized by Google

काणामव्ययानामन्यपदार्थे स्त्रीलिङ्गता । अर्धर्चादित्वाद्दाऽदन्तता[1] ॥ एवं खादतमोदता । गणपाठसामर्थ्यादतङ्[2] ॥ खादाचामायां को नाम कस्य न सहायः[3] ॥ पचतभ्रज्जतेत्यादि ॥ * ॥ भ्रन्तं क्रियापदं कर्मणा भ्रन्तस्यैवाप्येन बहुलं समस्यत आभीक्ष्ण्ये गम्यमाने । स च समासः कर्तारमाचष्टे ॥ जहि जोडं देवदत्त[4] यो वक्ताभीक्ष्ण्यं सातत्येन ब्रवीति स वक्ता जहिजोडः[5] । एवम् उज्जहिजोडमित्यादि[6] ॥ पचौदनमिति बहुलवचनान्न भवति ॥ १२१ ॥

एहिरेयाहिराभिन्धिलवणोत्पत्यपाकलाः ।
स्यादहंपूर्विका प्रोहकर्दमाधोड्डरोत्सृजा ॥ १२२ ॥

एहि आगच्छ रे । याहि गच्छ रे । इति यस्यां क्रियायां सा । एहिरेयाहिरा । गणपाठादात्वम् ॥ * ॥ भिन्धि लवणमिति यस्यां सा भिन्धिलवणा ॥ * ॥ उत्पत्य । आकाशे भूत्वा । या पाकला पाण्डुर्भवति सा । उत्पत्यपाकला । अत्र परकालक्रियाया अभावे क्त्वाप्रत्ययोऽपि । अनेनैव सूत्रेणैवं पूर्वेष्वपि ॥ * ॥ अहं पूर्वम् अहं पूर्वमिति यस्यां सा[7] । अहंपूर्विका । काटौ[8] पूर्ववत् ।

माहंपूर्विकया हि मे विदधतां सिंहासनाध्यासनम्[9] ॥

प्रोहापनय कर्दममिति यस्यां सा प्रोहकर्दमा ॥ * ॥ उद्धर किमपि द्रव्यमुत्सृजेति यस्यां सा । उद्धरोत्सृजा ॥ १२२ ॥

---

१ अर्धर्चादि° A.; अर्धादिवद्वा° D.

२ °अतट् C.; अनङ् F.

३ खोदां वामायां° C.; खादावामायां वा नाम° B.

४ जहि जोडं B. and orig. D.; देवदत्तं । F. (? right); D. corr. देवदत्त इति.

५ जहिजोडः A. B. and orig. D.

६ उज्जहिजोड° A. B. and orig. D.

७ B. C. F. only once अहं पूर्वं.

८ काठौ A. D. F.; काटौ B. C.; cf. page १६२, note १.

९ विदधतां A.; सिंहासनाध्यासिनं D.

Digitized by Google

उत्पतनिपता श्यामा निषण्णपूर्वोन्मृजावमृजा[1]।
ज्ञेया त्वहंप्रथमिका प्रोक्षपदीहद्वितीये च ॥ १२३ ॥

उत्पत निपतेति यस्यां सा। उत्पतनिपता ॥ * ॥ निषण्णा सती श्यामा जाता। निषण्णश्यामा ॥ निषद्यश्यामेति[2] श्रीभोजः। अत्र विशेषणसमासे पूर्वपदानियमः स्यात्[3] ॥ * ॥ उन्मृज्ञि अवस्कर्त्तीति यस्यां क्रियायां सा। उन्मृजावस्कृजा। अत एव निपातनादनयोरिहैव[4] साधुत्वम् ॥ * ॥ अहं प्रथमो यस्यां सा। अहंप्रथमिका ॥ * ॥ प्रोक्ष पादौ धावति। प्रोक्षपदि[5] ॥ * ॥ दृह द्वितीयेति यस्यां क्रियायां सा। दृहद्वितीया ॥ शाकटायनस्तु। अद्यपञ्चमी। अद्यद्वितीयेत्याह ॥ वामनप्रभृतिभिरयमिति वचनात्परमो मयूरव्यंसकः समासान्तरं[6] न भवतीत्युक्तम् ॥ भोजस्तु[7] न चानेन समास इति वचनादयमन्येन सह समस्यत एवेत्याह। मयूरव्यंसकप्रिय इति ॥

आकृतिगणोऽयम्। तेन शाकपार्थिवघण्टामाघच्छत्रभारविप्रभृतयो[8] वेदितव्याः ॥ १२३ ॥ इति मयूरव्यंसकादिः ॥

दधिपयसी मधुसर्पिःसर्पिर्मधुरामलक्षणा ज्ञेयाः।
आद्यवसाने श्रद्धामेधे ऋक्साम वाङ्मनसे ॥ १२४ ॥

न दधिपयआदीत्यादिना योगेन समाहारे प्राप्ते प्रतिषेधादितरेतरयोग एव भवति ॥ * ॥ दधिपयसी ॥ * ॥ मधुसर्पिषी ॥ * ॥ सर्पिर्म-

---

१ °पूर्वोत्सुवावसृजा C.
२ श्यामामिति C.
३ विशेषणसपूर्वपदानियम स्यात् A.; °पदो नि° C.
४ अनयोरिवेह C.; °एतयोरिहैव F.
५ प्रोक्षपदी D.
६ समासानंतरं A.
७ श्रीभोजस्तु D.
८ °घंटामाघ° A. (? B.); °घंटाघच्छ° D.; °विप्रतयो B.; °भृतयो पि A.

Digitized by Google

धुनी ॥ * ॥ रामलक्ष्मणौ ॥ * ॥ आद्यवसाने ॥ * ॥ अङ्गामेधे ॥ * ॥ चक्षामे ॥ * ॥ वाङ्मनसे । यथा ।

अतीतः पन्थानं तव च महिमा वाङ्मनसयोर्
अतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि[1] ॥

अस्मादेव गणपाठादेतयोः समासान्तः ॥ १२४ ॥

मेधादीक्षाश्रुतश्रद्धाध्ययनेभ्यस्तपः[2] परम् ।
प्रवर्ग्योपसदौ स्कन्दविशाखौ हरिवासवौ ॥ १२५ ॥

मेधातपसी ॥ * ॥ दीक्षातपसी ॥ * ॥ श्रुततपसी ॥ * ॥ श्रद्धातपसी ॥ * ॥ अध्ययनतपसी ॥ * ॥ ग्रेषं स्पष्टम् ॥ १२५ ॥

सूर्याचन्द्रमसौ सोमरुद्रौ नारदपर्वतौ ।
शुक्लकृष्णौ पितापुत्रौ ज्ञेयौ भीमार्जुनौ तथा ॥ १२६ ॥

मित्रावरुणौ मातापितरावथ कम्बलाश्वतरौ ।
सोलूखलमुसलाविह सपरिव्याकौशिकौ च गणे[3] ॥ १२७ ॥

सहोलूखलमुसलाभ्यां वर्तेते सह परिव्याकौशिकाभ्यां च[4] । उलूखलमुसले ॥ परिव्याकौशिकौ ॥ १२७ ॥

नरनारायणशिववैश्रवणा ब्रह्मप्रजापती चापि ।
अग्नीषोमाविध्माबर्हिर्याज्यानुवाक्याद्याः[5] ॥ १२८ ॥

---

१ See the whole stanza, p. 4.

२ Thus F.; °श्रुताश्रद्धाध्ययनाभ्यां तपः B. D. E.; °श्रुतश्रद्धाध्ययनाभ्यां° A.; °श्रुतश्रद्धा° यनाभ्यां तपः C.

३ श्रोलूखलमुशला° A.; °सपरिव्याकौ° E.; सपरव्या° B. C. F.; गणौ B.; कौशिकाभ्यां च । C.

४ परव्या° B. F.; सपरिव्या° A.; C. om. from सहोलूखल.

५ अग्नीषोमा° C.; इध्मबर्हि° गुवाक्याद्याः F.

Digitized by Google

एषोऽपि स्पष्टः[1]। आद्यशब्दः प्रकारे। तेन येषां श्लोक इतरेतरयोग[2] एव द्वन्दो दृश्यते तेषामिह ग्रहणं भवति। यथा चन्द्रार्कावितिं ॥ १२८ ॥ इति दधिपयआदिः ॥

गवाश्वाजाविकं कुञ्जवामनं तु गवाविकम्।
दर्भशरं श्वचण्डालं स्त्रीकुमारं तृणोलपम्[3] ॥ १२९ ॥

पूर्वपदेत्यादिना सूत्रेण गवाश्वादीनां समाहार एव द्वन्दो भवति ॥ * ॥ गौश्च। अश्वश्च। गवाश्वम् ॥ * ॥ अजा च। अविकश्च। अजाविकम् ॥ अजश्च। अविका चेति वा[4] ॥ * ॥ कुब्जश्च वामनश्च[5]। कुब्जवामनम् ॥ अन्ये तु कुब्जाश्च स्त्रियो वामनाश्च स्त्रियः। अत एव वचनात्पुंभावे[6] कुब्जवामनमित्याहुः ॥ * ॥ गौश्च। अविकश्च। गवाविकम् ॥ * ॥ दर्भश्च शरश्च। दर्भशरम् ॥ * ॥ श्वा च चण्डालश्च। श्वचण्डालम्[7]। श्वाश्वतिकवैराभावे समाहारः। चण्डालपरिगृहीतानामेव शुना सहैकावस्थानम्[8] ॥ * ॥ स्त्रियश्च कुमाराश्च। स्त्रीकुमारम् ॥ अन्ये तु स्त्रियश्च कुमार्यश्च। उत्तरपदस्थात एव निपातनाद् ईकारनिवृत्तौ स्त्रीकुमारमित्याहुः ॥ * ॥ तृणानि च। उलपाश्च। तृणोलपम् ॥ १२९ ॥

---

१ एषो विस्पष्टः B. C.

२ A. om. from इतरयोग to śloka 130; but (probably from a confusion of leaves) inserts here a passage from *kachchhâdi*: आंतरीपः। आवपादः(!)। इत्यं० cf. śl. 328 com.

३ दर्भशर श्वच० C.; °श्वचांडालं० तृणोलुपं F.; A. om. this śloka and comment.

४ अजाश्वाविकाश्चेति वा D.

५ वामनं च D.

६ °पुंवद्भावे D. F.

७ चांडालश्च श्वचांडालं F.; ॥ श्वा च चंडालं C.—Gaṇaratnâv. has श्वचांडालं; Bö., Kâs. V. श्वचण्डालं.

८ चांडालपरि० F.; शुना सहै० B.; शूना० C.

Digitized by Google

दासीदासाजैडकदासीमाणवकपुचंपौचाणि ।
कुञ्जकिरातोष्ट्रखरे मूचपुरीषं यकृन्मेदः[1] ॥ १३० ॥

दासी च दासश्च । दासीदासम् ॥ * ॥ अजश्च । अजा च वा । एडकश्च । अजैडकम् ॥ * ॥ दासश्च माणवकश्च । दासीमाणवकम् ।

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः[2] ॥

स्वार्थिकश्च कः ॥ अन्ये दासीमाणवमित्येव पठन्ति[3] ॥ * ॥ पुचश्च पौचश्च । पुचपौचम् ॥ * ॥ कुञ्जश्च किरातश्च । कुञ्जकिरातम् ॥ कुञ्जाश्च कैरातकाश्च । कुञ्जकैरातकम् । किराता जनपदः । तत्र भवाः कैरातका इति शाकटायनः ॥ विश्रान्तन्यासस्तु किरात एव कैरातो म्लेच्छ इत्याह ॥ * ॥ उष्ट्रश्च खरश्च । उष्ट्रखरम् ॥ * ॥ मूचं च पुरीषं च । मूचपुरीषम् ॥ * ॥ यकच्च मेदश्च । यकन्मेदः ॥ १३० ॥

अर्जुनपुरुषं शाटीपट्टिकम्[4] उष्ट्रशशमूचशकृती च ।
भागवतीभागवतं तृणकाष्ठकुटीकुटे चापि ॥ १३१ ॥

अर्जुनश्च पुरुषश्च । अर्जुनपुरुषम् ॥ अर्जुनपुरुष इति[5] शाकटायनः ॥ * ॥ शाटी च पट्टिका च । शाटीपट्टिकम्[6] ॥ शाटीप्रच्छद-

---

१ A. om. this śloka and comment.

२ Kârikâ to Pâṇ. iv. 1, 161.

३ दासीमाणवकमित्येव° D.

४ Thus D. E. (D. orig. °पच्छिकं); °पिच्छिक° B.; पच्छिक° C.; पत्यिक° F.; A. om. text and comm. to मूचं च शकच्च.

५ ? अर्जुन B. C. F.; अर्जनपुरुषमिति D.; अर्जुनगिरीषं Kâś. V. ii. 4, 11; °गिरीषं । °पुरुषं Bö.; अर्जुनश्च गिरीषं चार्जुनगिरीषम् । द्वावपि वृक्षविशेषवाचिनौ ॥ अर्जुनः प्रार्थः पुरुषो वासुदेवः अर्जुनपुरुषम् । यद्वा अर्जुनः सप्तच्छदः पुरुषः पुन्नागः । Gaṇaratnâv.

६ Thus D. corr. from orig. पच्छिका° पच्छिकं; पच्छिका च शाटीपच्छिकं B. and (छ) C.; पत्यिका च शाटीपत्यिकं F.; शाटीपिच्छकं Kâś. V. ii. 4, 11 ed. (°पट्टिकं MS. I. O. 2440; °प्रापच्छंद (!) MS. Beng. As. Soc.); शाटीपटीरं । शाटीप्रच्छदं । शाटीपट्टिकं Bö.; Gaṇaratnâv. has शाटीपट्टिकं & °प्रच्छदं.

Digitized by Google

मिति भोजः[1] ॥ * ॥ उष्ट्रस्य ग्रस्य । उष्ट्रग्रम् ॥ * ॥ मूचं च ग्रस्य । मूचग्रस्य । मूचग्रस्त् ॥ * ॥ भगवान्देवताऽस्याः । भगवत इयं वा । भागवती ॥ भागवती च भागवतस्य । भागवतीभागवतम् ॥ * ॥ दृणं च काष्ठं च । दृणकाष्ठम् ॥ * ॥ कुटी च कुटस्य । कुटीकुटम्[2] ॥ कश्चित् कुडी वाला । कुडो बालः । कुडी च कुडस्य । कुडीकुडमित्याह[3] ॥ १३१ ॥

मांसशोणितशब्दोऽपि दर्भपूतीकसंयुतः ।
बालवृद्धं बुद्धैर्ज्ञेयमुपाध्यायश्च याजकात्[4] ॥ १३२ ॥

मांसं च शोणितं च । मांसशोणितम् ॥ * ॥ दर्भस्य पूतीकस्य । दर्भपूतीकम् ॥ वामनस्तु दर्भपूतिकमित्याह[5] ॥ * ॥ बालस्य वृद्धस्य । बालवृद्धम् ॥ * ॥ याजकस्य । उपाध्यायस्य । याजकोपाध्यायम् ॥ * ॥

गवाश्वप्रभृतिषु यथोच्चारितरूपग्रहणादिह न भवति । गोऽश्वौ[6] । गोऽश्वम्[6] ॥ नियतस्त्वायं गणः ॥ १३२ ॥ इति गवाश्वादिः ॥

हस्ती महेला गणिका कुसूलं
कटोलगण्डोलकटोलकाश्च[7] ।
गण्डोलकाजौ च कपोतगण्डौ
कण्डोलकण्डोलकजालयुक्तौ[8] ॥ १३३ ॥

पादस्याहस्त्यादेर्लुगित्यनेन हस्त्यादेर्वर्जितत्वाच्चुक् समासान्तो न

---

१ श्रीभोजः D.

२ कुटीकुटी A. — कुटी कुंभदासी कुटः कुंभः । यद्वा कुटी पर्णशाला कुटो गृहम् । Gaṇaratnâv.

३ कुडो बालः । कुडा च कुडस्य कुडमित्याह । C.

४ बालवृद्धं तु वै ज्ञेयमु° A.

५ दर्भस्य पूतीकं च दर्भपूतीकम् । वामनस्तु दर्भपूतीकमित्याह । D. F.— °पूतिकं (पूतिका वनौषधिविशेषो या सोमवल्ली प्रतिनिधित्वेनोपादीयते) Gaṇaratnâv.

६ गौश्चाश्वश्च गोश्वं C.; गोश्वौ F.

७ कुशूलं° A. B. C.; कुशूलकटो° F.; कटोलकंडोलकटो° A.

८ च for च° कंडोलकंडयुक्तौ C.; कन्दोलकण्डोलक° D.

Digitized by Google

भवति ॥ * ॥ हस्तिन इव पादावस्य । अस्तौ हस्तिपादः ॥ * ॥ मल्लेला-
पादः ॥ * ॥ गणिकापादः ॥ * ॥ कुसूलपादः[1] ॥ * ॥ कटोलपादः ॥ * ॥
गण्डोलपादः ॥ * ॥ कटोलकपादः ॥ * ॥ गण्डोलकपादः ॥ * ॥ अज-
पादः ॥ * ॥ कपोतपादः ॥ * ॥ गण्डस्येव पादावस्य । गण्डपादः ॥ * ॥
कण्डोलमिव पादावस्य । कण्डोलपादः ॥ * ॥ कण्डोलक इव पादा-
वस्य । कण्डोलकपादः[2] ॥ गण्डोलगण्डोलकशब्दावपि वामनः[3] ॥ * ॥
जालपादः ॥ १३३ ॥ इति हस्त्यादिः ॥

कुम्भस्थूणाशतविकलशीविष्णुगोधैकदासी-[4]
द्रोणीसूचीमुनिशुचिशकृत्कृष्णजालार्द्रनञ्जेः[5] ।
सूचाष्टभ्यां कुणिगुणनिरः सूकरघ्नेः षषश्च[6]
ज्ञप्तं पादं सुविहितपदादेशमेनं विदन्तु ॥ १३४ ॥

कुम्भाविव पादावस्याः । कुम्भपदी ॥ * ॥ स्थूणापदी ॥ * ॥ शतं
पादा यस्याः । शतपदी । खर्जूरकजन्तुः[7] ॥ * ॥ विगतौ पादौ यस्याः ।
विपदी ॥ * ॥ कलशीव[8] पादावस्याः । कलशीपदी[9] ॥ * ॥ विष्णोरिव
पादावस्याः । विष्णुपदी ॥ * ॥ एवं गोधापदी ॥ * ॥ एकः पादो यस्याः ।
एकपदी ॥ केचित्त्र पठन्ति ।[10] एकपादित्यपि हि स्त्रियां दृश्यते ॥ अन्ये

---

१ कुशूलपादः A. B. C. F.

२ कंडोलकमिव° F.; om. D.

३ गंडोलगडोलकः । शब्दाव° A.; गंडोलगंडोलशब्दाव° B.— ? एव for अपि; Kâś. V. ed. has गण्डोल। गण्डो-लक। [and कटोल for which MS. I. O. 2440 कुहाल (as Gaṇaratnâv.), MS. Beng. As. Soc. पटोल]. Besides the above three couples of words (also Bö.), Gaṇaratnâv. has कंटोल, कंटोलक.

४ कलसी° A. B. C.

५ सक्थत् for शक्थत् A. C. F.

६ शूकर° A. B. C.; शूकराद्रेः° F.

७ ? °तनुः or तन्तुः A.; °तद्: B. C.; कर्जुरकतनुः F.; खरकतनुः D.—शत-पदी ओषधिविशेषो जंतुविशेषो वा। Gaṇaratnâv.

८ कलसीव MSS.

९ कलसी twice B. C. D.; once A. F.

१० D. corr. केचित्तु पठन्ति एकपदा इत्यपीह° D.

Digitized by Google

तु व्यवस्थितवानुवृत्तेरिहैकस्मिञ्छब्दे[1] विकल्पं वर्णयन्ति ॥ * ॥ दासी-पदी ॥ * ॥ द्रोणीपदी ॥ * ॥ सूचीपदी[2] ॥ * ॥ मुनिपदी ॥ * ॥ शुची पवित्रौ पादौ यस्याः। शुचिपदी[3] ॥ * ॥ शक्तत्पादौ यस्याः। शक्तत्प-दी[4] ॥ * ॥ कृष्णौ पादौ यस्याः। कृष्णपदी ॥ * ॥ जालमिव पादौ यस्याः। जालपदी ॥ * ॥ आर्द्रौ पादौ यस्याः। आर्द्रपदी ॥ * ॥ अवि-द्यमानौ पादौ यस्याः। अपदी ॥ * ॥ चिपदी। यथा। चिपदीच्छेदि-नामपि[5] ॥ * ॥ सूचिमिव पादावस्याः। सूचिपदी ॥ * ॥ अष्टौ पादा अस्याः। अष्टापदी[6]। संज्ञायामष्टन इत्यात्वे[7] ॥ * ॥ कुणी[8] पादा-वस्याः। कुणिपदी ॥ * ॥ गुणस्तन्तुः। तदत्पादावस्याः। गुणपदी ॥ * ॥ निर्गतौ पादावस्याः। निष्पदी ॥ * ॥ सूकरस्येव पादावस्याः। सूकर-पदी[9] ॥ * ॥ द्वौ पादावस्याः। द्विपदी। छन्दोविशेषजातिः ॥ * ॥ षट् पादा यस्याः। षट्पदी ॥ * ॥ अन्त इति पाद इत्यनेन ङीप्रत्ययान्तं सुविहितपदादेशमिति कुम्भपद्यादिरित्यनेन पदादेशे कृते[10] ग्यसुट्-मिणिक्षे[11] ऽपदस्य पादः पदित्यनेन सुविहितः पदादेशो यस्य तमि-ति[12]। उपमानसंख्यापूर्वपदस्येह पाठो नित्यस्त्रार्थः[13] ॥ कुम्भपद्यादि-शब्दानां प्रवृत्तिनिमित्ताभावेऽपि रूढितः व्रतपुष्पादिशब्दवत्साभि-

---

१ व्यवस्थितवानु° A.; व्यवस्थितवि-भाषानुवृत्तेरिह C.; व्यवस्थितस्यानु° D.

२ शूचीपदी A. D.; B. C. om. मु-निपदी.

३ शुचिः (word obliterated) पादौ° D.; शुचीपदी A.

४ ? Thus also Bö. and Kâś. V. ed.; सक्तत्पादौ° B. C. F.; सक्तत्पदी A. B. C. F., Gaṇaratnâv., MSS. Kâś. V.

५ Raghuv. 4, 48.

६ अष्टपदी अष्टापदी° F.

७ संज्ञायामष्टनः B. F.; अष्ट इत्व° D.; °अष्टनः संज्ञायां C. as P. vi. 3, 125.

८ कुणीव C. D.

९ शूकर° twice A. F.; अकर° D.

१० सुविहितं पदा° C.; पादादेशे कृते A. D.

११ ? यसुट्° F.; °सिणिक्षे° A.; D. corrupt.

१२ पादादेशो° A.; यस्येतमिति C.

१३ नित्यं स्त्रार्थः C.; नित्यस्त्रार्थः D.

Digitized by Google

धेये प्रवृत्तिर्द्रष्टव्या[1]। यथा। त्रिपादः काष्ठमयोपकरणविशेषः। न हि तस्यापि त्रय एव पादाः किंतु पादचतुष्टयसद्भावेऽपि तादृग्व्यपदेशो यादृक्पादत्रये सति॥ आकृतिगणश्चायम्। तेन त्रितिपदी। अष्टीतिपदी। आक्षपदी[2]। इत्यादयो द्रष्टव्याः॥ १३४॥ इति कुम्भपद्यादिः॥

शरद्विपाशौ हिमवत्क्रियत्सदो
यद्दृग्विदो द्यौर्विडनोमनस्त्यदः।
दिक्पथ्युपानच्चतुरस्तदाऽनडुज्
जरा जरोऽक्षि प्रतिसंपरानुतः[3]॥ १३५॥

शरदादिभ्योऽव्ययीभावादित्यनेन शरदादिभ्यष्टच्[4] समासान्तो भवति॥ * ॥ शरदः समीपम्। उपशरदम्॥ * ॥ विपाशो नद्याः समीपम्। उपविपाशम्[5]॥ * ॥ हिमवत आ। आहिमवतम्॥ * ॥ कियन्तं कियन्तं प्रति। प्रतिकियतम्[6]॥ * ॥ सदः सदः प्रति। प्रतिसदम्[7]॥ * ॥ यं यं प्रति। प्रतियदम्॥ * ॥ दृशं दृशं प्रति। प्रतिदृशम्॥ * ॥ विदं विदं प्रति। प्रतिविदम्॥ * ॥ द्यौरित्यनेन दिव्शब्दो द्योशब्दश्च संगृहीतः। दिवं दिवं प्रति। प्रतिदिवम्॥ द्यां द्यां प्रति। प्रतिद्यवम्॥ * ॥ विशं विशं प्रति। प्रतिविशम्॥ * ॥ अनसः समीपम्। उपानसम्॥ * ॥ मनो मनः प्रति। प्रतिमनसम्॥ * ॥ त्यं त्यं प्रति। प्रतित्य-

---

१ प्रवृत्तिनिवृत्ताभिवे° शब्दवत् त्वभि° D.; शतपुष्पा हि° C.

२ ? सति आदिशब्दात् त्रितिपदी। आशीतिपदी आशाकपदी D.; सितिपदी B. C. F.; शाक्षदी।° F.

३ A. om. from तिसंपरानुतः to विनीलबन्धना on śl. 136, but has a passage from śl. 334-5 (q.v.); cf. p. १६६, n. २.

४ शरदादिभ्यष्ट° B.; °भ्यश्च D.

५ सामीप्यं° C.; अपविपाशं D.

६ प्रतिकियंतं B. C. D.

७ ? प्रतिशरदं D.—सद् Bö., KÅṣ. V. MS. I. O. 2440 (om. ed., MS. Beng. As. Soc.); सदस् (सदसीत्यधिसदसम्) Gaṇaratnâv.

Digitized by Google

दम् ॥ * ॥ दिग्गं दिग्गं प्रति । प्रतिदिग्गम् । यथा । प्रतिदिग्गं क्रियते कलभैरवः[1] ॥ * ॥ पन्थानं पन्थानं प्रति । प्रतिपथम् । अनुपथम् ॥ ऋक्पूरब्धूःपथामित्यनेनैव[2] समासान्तस्य सिद्धत्वादस्य पाठो न संगतः प्रतिभाति परं वृद्धवैयाकरणमतानुरोधेन पठितः[3] ॥ * ॥ उपानहः समीपम् । उपोपानहम् ॥ * ॥ चतुर्णां समीपम् । उपचतुरम् ॥ * ॥ उपतदम् ॥ * ॥ अनड्वाहमनड्वाहं प्रति । प्रत्यनड्वहम्[4] ॥ * ॥ जरा जर इति[5] जराग्रब्दोऽच पठते । तस्य च स्थाने जरसादेग्रः । जरायाः समीपम् । उपजरसम् ॥ * ॥ अक्ष्यचि प्रति । प्रत्यचम् ॥ एवं समीपमक्ष्णः । समचम् ॥ परोचम् । भोजस्तु[6] परसमानार्थः परःग्रब्दोऽव्ययम् । अक्ष्णोः परम् । परोचम् । अव्ययेऽव्ययीभावः[7] । कथं प्रत्यचोऽर्थः[8] परोचः काल इत्यादेरव्ययीभावस्य सत्त्ववचनताऽर्ग्रआदित्वादतो भविष्यतीत्याह ॥[9] अग्वचम् ॥

आकृतिगणोऽयम् । तेन हिरक्[10] । इत्यस्यानतिक्रमो यथाहिरकमित्यादयो वेदितव्याः ॥ १२५ ॥ ग्ररदादिः ॥

उरः सर्पिर्मधूपानहधि शालिः पयः पुमान्[11] ।
अनड्वान्नौस्तथा लक्ष्मीर्नेम्पूर्वान्नित्यमर्थतः[12] ॥ १३६ ॥

---

१ Śiśup. 4, 60.

२ °पथामित्यनेनाच् समा° C.; cf. Pâṇ. v. 4, 74.

३ °मतानुरोधात् समासांतस्य सिद्धत्वादस्य पाठे न पठितः C.

४ प्रत्यनड्वाहं C.; प्रत्यनुडहं B.

५ जरा जरमिति D.

६ श्रीभोजस्तु D.

७ अक्ष्णः परं परोचं। अव्ययेऽव्य° F.

८ परोक्षोर्थः D.

९ अर्ग्रआदित्वादच् भविष्यतीत्याह F.; °त्वादचा (orig. °दता°) भविष्य°। अनूचं° corr. D.

१० हिरगित्यनतिक्रम्य यथाहिरकम् Gaṇaratnâv.

११ ग्राक्षि पयः° C. D. E.

१२ अनड्वा नौ° C.; A. om. this śloka and the comm. to विनीतवन्धना.

Digitized by Google

क्षत्रियाडुरआदिभ्य[1] इत्यनेनोरःप्रभृतिभ्यः शब्देभ्यः कप् भवति ॥ * ॥ व्यूढोरस्कः ॥ * ॥ बद्धसर्पिष्कः ॥ * ॥ प्रियमधुकः । भारवेषु ।

प्रियमधुरसनानि षट्पदाली
मलिनयति स्म विनीलबन्धनानि[2] ॥

इति चिन्त्यम् । प्रथमं लीढमधवः पिबन्ति कटुभेषजम् ॥ इत्यादि च ॥ * ॥ अवमुक्तोपानत्कः ॥ * ॥ प्रियदधिकः ।

रचतु वः चिन्नकरः चोभितदधिभाण्डगलितदधिकस्य[3] ।

वामनवृत्तौ[4] प्रियदध्य इति चिन्त्यम् ॥ * ॥ संपन्नाः शालयो यस्य । संपन्नशालिकः ॥ * ॥ प्रियं पयो यस्य । प्रियपयस्कः ॥ प्रियपुंस्कः[5] ॥ प्रियानडुत्कः ॥ प्रियनौकः ॥ प्रियलक्ष्मीकः ॥ पयआदीनामेकवचनान्तानां पाठादचनान्तरे विकल्पः । द्वे बह्वनि वा पयांसि यस्य स द्विपयाः । द्विपयस्कः । बहुपयाः । बहुपयस्क इत्यादि । यथा ।

क्षीणपयस्युपेयुषि भिदां जलधरपटले[6] ॥
समुद्रमध्ये गतनौः स्रवमाना इवाम्भसि[7] ।

नात्र नावो विपत्तिमात्रविवक्षा किं तर्हि छत्त्रानां नावां निवृत्तिः ।

अलघ्रमलघ्रलक्ष्मीस्वेतसा शंसितं सः[8] ।

अत्र बह्वो लक्ष्म्यः शोभा विवक्षिताः । केचिल्लक्ष्मीदरीशब्दौ प्रातिपदिकौ पठन्ति नित्याङ इत्येव सिद्धे तुल्ययोगेऽपि कवर्थम्[9] । सल-

---

1 Cf. P. v. 4, 153 (आत्-नित्याङ्); क्षत्रियाडुरआदिभ्यः C.; क्षत्रियाडुर° F.; क्षात्रियाद्देरआदिभ्य D.

2 Kirât. 10, 26.

3 चिन्नकरचोभित° B. C. F.

4 °वृत्तेः F.; °वृत्तिः B. C.; °दधिकस्य वृत्तौ D.

5 वरपुंस्को ग्रामः F.

6 Kirât. 5, 43; °पयस्केपेयुषि° D.; पयस्कपेयु° C.

7 °गता नौः° C.; गतनौस्र° A.; गतजौस्र° D.

8 Kirât. 5, 52.

9 कमर्थं A. C.; कर्थं । D.

Digitized by Google

क्षीको विनाशितः। सदरीकः खातः। अत्र खल्या सह पुरुषो विनाशितः[1]। दर्या सह पर्वतः खात इति तुल्ययोगः। खल्लीपाठ अस्तित्याडोऽयं विधिर्न भवति[2] ॥ बडतन्त्री। बडतन्त्रीक इत्येके[3] ॥ * ॥ नञ्पूर्वादिति। न विद्यतेऽर्थो यस्य सोऽनर्थको। नीचव्यापारः श्लोको वा ॥ नञ्पूर्वादिति किम्। व्यर्थो व्यर्थकः ॥ समनञ्पूर्वात्क्षणादुदीचामिति[4] गणसूत्रमत्र वामनो मन्यते। सह क्षणेन वर्तते। सक्षणकः[5]। अविद्यमानः क्षणो यस्य सोऽक्षणकः[6]। प्राचां सक्षणः। अक्षणः[7] ॥१२६॥ इत्युरआदिः ॥

ज्ञेयौ दिदण्डिसंहतपुच्छौ दिमुसलिनिकुच्यकर्णौ[8] च।
आद्यपदिप्रोक्षपदौ अन्तेवास्येकपदिसपदी[9] ॥ १३७ ॥

दिदण्डीत्यादयः समुदाया दृत्समासाख्या[10] निपात्यन्ते ॥ * ॥ दौ दण्डावस्मिन्प्रहरणे। दिदण्डि प्रहरति ॥ * ॥ संहतानि पुच्छान्यस्मिन्प्रहरणे[11]। संहतपुच्छि धावति ॥ * ॥ द्वे मुसले यत्र प्रहरणे। दिमुसलि प्रहरति[12] ॥ * ॥ निकुब्ज कर्णौ धावति। निकुब्जकर्णि ॥ * ॥ आद्य

---

१ F. om. खातः; अपक्षीसहपुरुषा (orig. षो) C.

२ छन्नित्यादिः। अयं० विधिर्न० D.; अन्नित्याडोर्यविधेर्न० A.; cf. p. १७३, n. १.

३ B. D. om. बडतन्त्री; बडतंत्रीबदुत्तरमिलेके D.

४ सह नञ्पूर्वा० F.; not K.V.v.4,151.

५ सहक्षणिकः D.; सहक्षणकः B.; सक्षणिकः D.

६ अक्षणिकः A. D.

७ प्राचां सक्षणकः। प्राचां सक्षणः। अक्षणः A.; प्राचां सक्षणकः। अक्षणकः D.; प्रोचां सक्षणः। अक्ष C.; प्रवा सक्षणकः। अक्षणः। F.

८ दिदण्डिसहित० D.; दिमुसल० B.; दिमुग्रल० C.; विकुब्ज० E.

९ आद्यपदप्रो० B. C.; °समानपदी C.—Gaṇaratnâv. has the same śl.

१० दृत्समा० A. D. F.; दृग्समा० B. C.; cf. P. v. 4, 127.

११ अस्मिन्प्रहरणे गोपुच्छादेः D.

१२ मुग्रले० दिमुग्रलि० C. D.; F. om. प्रहरति.

Digitized by Google

पादौ ग्रेते। आच्चपदि ग्रेते॥ अन्ये तु। आच्चौ पादावस्मिञ्छयने। अत एव वचनाद् अस्तेर्घ्यणि नलोपं प्रतिपन्नाः॥ * ॥ ग्रोच्च ग्रेर्थं पादौ। ग्रोच्चपदि हस्तिनं वाहयति॥ मतान्तरं प्राग्वदेदितव्यम्[1]॥ * ॥ अन्ते वासोऽस्मिन्निति। अन्तेवासि तिष्ठति॥ अन्तेवासी गुरोरित्यन्य एव शब्दः। अन्ते वसति तच्छील इति णिनन्तः[2]॥ * ॥ एकः पादोऽस्मिन्गमने। एकपदि॥ * ॥ समानौ पादावस्मिन्। सपदि गच्छति॥ १३७॥

अञ्जलिदन्तात्पाणेः कर्णाद्बाहोश्च हस्ततश्चापि[3]।
उभयोभध्वनिपूर्वादिज्ञेयः परो गणतः[4]॥ १३८॥

उभयोभशब्दपूर्वेभ्योऽञ्जल्यादिशब्देभ्य इच् परो वेदितव्यः[5]॥ * ॥ उभावञ्जली[6] यत्र पाने। उभयाञ्जलि। उभाञ्जलि पिबति॥ * ॥ उभौ दन्तावस्मिन्खादने। उभयादन्ति। उभादन्ति खादति॥ * ॥ उभयापाणि। उभापाणि॥ * ॥ उभयाकर्णि। उभाकर्णि शृणोति॥ * ॥ उभयाबाहु। उभाबाहु प्रहरन्ति। अत्र निपातनादिच्लोपः। प्रत्ययलोपलक्षणेनाव्ययीभावसंज्ञा। यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम्॥ * ॥ उभयाहस्ति। उभाहस्ति[7]॥ उभौ हस्तिनौ यत्रसंग्रामादिविधाने तदुभयाहस्तीत्यजितदेवाचार्यः॥ * ॥ क्रियाविशेषणत्वाच्चान्यत्र न भवति। दौ दन्तावस्यां शालायाम्। दिदन्ता।

---

१ मतांतरे॰ C.; प्राग्वेदितव्यं D.; प्राग्वेतिदितव्यं A.

२ एव। स शब्दो॰ B. C.; णिनंतः C.; cf. P. iii. 2, 78; iv. 3, 104 (णिनि).

३ हस्तिनश्चापि F.; cf. n. ७.

४ D. om. this śloka.

५ इच् वेदि॰ C.; शब्देभ्यः दभ्व[प]दो वेदि॰ D.

६ उभयोञ्जली A.

७ All MSS. om. उभयाहस्ति। उभाहस्ति।; probably accidentally omitted in the cod. archet.; for the way in which F. reconciles his text and comment, see note ३.—Gaṇaratnâv. reads हस्तिन् [उभौ हस्तिनौ यत्र संग्रामविधाने उभाहस्ति उभयाहस्ति वा संग्रामं विधत्ते].

Digitized by Google

द्विमुखला ॥ केचिद् द्वौ दण्डौ यस्मिन्संग्रामे । उभौ कर्णावस्य प्रासादस्य । उभाकर्णीत्यादौ क्रियाया अन्यत्राप्यन्यपदार्थे प्रतिपन्नाः । स्वद्विवचनं विनाप्युभशब्दस्य वृत्तौ प्रयोगो गणपाठात्[१] ॥ १३८ ॥ इति द्विदण्ड्यादिः ॥

प्रियाकान्तामनोज्ञास्वाकल्याणीभक्तिदुर्भगाः[२] ।
सचिवावामनाक्षान्ताचपलानिचितासमाः[३] ॥ १३९ ॥

सुभगा दुहिता बाल्या वामाथ तनया तथा[४] ।
कुक्कुटाण्डमृगक्षीरकाकशावादयो मताः[५] ॥ १४० ॥

पुंस्यनूङित्यादिना प्रियादिषूत्तरपदेषु पुंस्त्री[६] न भवति ॥ * ॥ कल्याणी प्रिया यस्य । कल्याणीप्रियः ॥ * ॥ दर्शनीयाकान्तः ॥ * ॥ भव्यामनोज्ञः ॥ * ॥ कल्याणीस्वः[७] ॥ * ॥ प्रियाकल्याणीकः ॥ * ॥ वाग्देवताभक्तिः ॥ कथं दृढभक्तिः । दृढं भक्तिरस्येति[८] नपुंसकमत्र पूर्वपदम् । भोजस्तु भक्तौ च कर्मसाधनायामित्यनेन सूत्रेण भवानीभक्तिरित्यादि भवति भावसाधनायां तु स्थिरभक्तिर्दृष्टभक्तिर्भवान्येत्यादि भवतीत्याह[९] ॥ * ॥ कल्याणीदुर्भगः ॥ * ॥ प्रियासचिवः ॥ * ॥ प्रिया-

---

१ । सुसिद्विवचनं विना० F.; विनार्थेप उभ० A.; D. om. from स्वद्विवचनं.

२ मनोज्ञाला क० A.

३ सचव० B.; कांता for चान्ता B.C.; गिचिताः समाः A.; विचिता० C.

४ वाल्यावामच० A.; वाल्याधामनातनयात्सया E.; वाल्यावामना[तनया suppl.]त्सया D.; वाल्यावामाच्च तनया० F.

५ कुंकुडाटांड० B.; काकसाद्यादयो० A.; काकाद्या० C.

६ स्त्री B. C.; cf. P. vi. 3, 34.

७ कल्याणीमनोस्वः A.

८ दृढभक्तिरस्येति B.; कथं दृढभक्तिरस्येति D.

९ स्थिरभक्तिभवान्या इत्यादिना भ० A.; D. om. from भोजस्तु.—स्थिरभक्ति occurs Vikramorv. v. 1; दृष्टभक्तिर्भवान्या Megh. v. 36.

Digitized by Google

वामनः ॥ * ॥ प्रियाक्षान्तः ॥ प्रियारक्षान्त इत्यपि कश्चित्[1] ॥ * ॥ प्रियाचपलः ॥ * ॥ प्रियानिचितः ॥ * ॥ दर्शनीयासमः ॥ १३९ ॥

कल्याणीसुभगः ॥ * ॥ कल्याणीदुहितृकः ॥ * ॥ कल्याणी वाक्या यस्य। कल्याणीवाक्यः ॥ भोजस्तु[2] कल्याणीवाल इत्याह ॥ * ॥ प्रियावामः ॥ * ॥ कल्याणीतनयः ॥

अस्यार्थे[3] इत्येव। कल्याणप्रिया। कल्याणमनोज्ञा। इत्यादि ॥ भट्टेश्वराचार्यस्तु।

किंच स्वा दुर्भगा काम्या रक्षान्ता निचिता समा।
सचिवा चपला भक्तिर्वाक्येति स्वादयो दश ॥

इति स्वादौ वेत्यनेन[4] विकल्पेन पुंवद्भावं मन्यते ॥ * ॥ इति प्रियादिः ॥

कुक्कुट्यादयोऽण्डादिषु वेत्यनेन कुक्कुट्यादयः शब्दाः स्त्रीलिङ्गा अण्डादिषूत्तरपदेषु[5] पुंवद्वा भवन्ति ॥ * ॥ कुक्कुट्या अण्डम्। कुक्कुटाण्डम्। कुक्कुट्यण्डम् ॥ * ॥ मृगचीरम्। मृगीचीरम् ॥ * ॥ काकशावः। काकीशावः ॥ * ॥ आदिशब्दस्य व्यवस्थावाचित्वात् ॥ मयूराण्डम्। मयूर्यण्डम् ॥ काकाण्डम्। काक्यण्डम् ॥ मृगपदम्। मृगीपदम् ॥ मृगीव चपला। मृगचपला। मृगीचपला ॥ हंसगद्गदा। हंसीगद्गदा। इत्यादयो भवन्ति ॥ * ॥ अयं विकल्पो भोजदेवाभिप्रायेण[6]। शाकटायनस्तु नित्यमिच्छति ॥ १४० ॥ इति कुक्कुटाण्डादिः ॥

कोटरमिश्रकसिध्रकसारिकपुरगा गणे समाख्याताः[7]।
अञ्जनभञ्जनकिंशुकलोहितखञ्जा नलः शाल्वः॥ १४१ ॥

---

१ प्रियारक्षान्त° A.; क्वचित् B.C.F.
२ श्रीभोजस्तु D.
३ अन्वार्थे F.; अस्यार्थे C.
४ चेत्यनेन A. D.
५ °पदशेषु F.
६ D. om. from काकाण्डं to भोजदे.
७ गणे ख्याताः A.

Digitized by Google

संज्ञायां गिरिवनेऽञ्जनकोटरादेरित्यनेनेतेषां[1] शब्दानामरदीर्घो भवति[2] ॥ * ॥ कोटराणां वनम् । कोटरावणम् ॥ * ॥ मिश्रकावणम् ॥ * ॥ सिम्रकावणम्[3] ॥ * ॥ सारिकावणम् ॥ * ॥ पुरगावणम् ॥ * ॥ इति कोटरादिः पञ्चको गणः ॥

अञ्जनेनोपलक्षितो गिरिः । अञ्जनागिरिः ॥ * ॥ भञ्जनस्य राज्ञो गिरिः । भञ्जनागिरिः ॥ शाकटायनस्तु भाञ्जनागिरिरित्याह[4] ॥ * ॥ किंशुकागिरिः[5] ॥ * ॥ लोहितवर्णो गिरिः । लोहितागिरिः ॥ * ॥ खञ्जस्य गिरिः । खञ्जागिरिः ॥ * ॥ नलस्य[6] गिरिः । नलागिरिः ॥ * ॥ शाल्वा नाम जनपदो राजानश्च[7] । तेषां गिरिः । शाल्वागिरिः[8] ॥ १४१ ॥

किंशुलकशल्वपिङ्गलकुक्कुटयुक्तः[9] शराहिवंशकुशाः ।
ऋषिकपिहनुमुनिधूमा वादेः पद्मं शुचिर्मृगो वेटः[10] ॥ १४२ ॥

किंशुलको[11] राजा । तस्य गिरिः । किंशुलकागिरिः ॥ किंशुलकः शिखापुष्पमिति केचित् ॥ * ॥ शल्वानां गिरिः । शल्वागिरिः ॥ * ॥ पिङ्गलागिरिः ॥ * ॥ कुगिति[12] शब्दं कुर्वन्नोऽटन्नीति कुक्कुटाः[13] । तेषां गिरिः । कुक्कुटागिरिः ॥ * ॥ इत्यञ्जनादिः[14] ॥

---

१ अनेनेषां B. C. F.

२ शब्दानामं दीर्घो न भ० A.; शब्दानां मरदी० C.; D. corr. शब्दानामंत्यस्य दी०; cf. P. vi. 3, 117.

३ मिश्रिकावणं । सिम्रिकावणं A.

४ भाजनागिरिरि० A.

५ किंसुकागिरिः B. C.

६ नड Yajñeśvara (Gaṇaratnâvali) and (*var. l.* नल) Bö.; om. Kâś. V.

७ राजा च C.; राज्ञा वा Yajñeśv.—Kâś. V. ed. MSS. साल्वक for शाल्व.

८ शाल्वागिरिक: D.

९ किंसुलक० E.; °शुलव० C. (also com.).

१० पद्मस्य० C.; शुचि मृगो० B. C. E.

११ किंशुलुक Bö., Yajñ.; किंशुलक Kâś. V. ed. (°लु० MS. *a.*; °सुलु० MS. *β.*)

१२ कुगिरिः । कुगिति C.; कुत्कुगिति F.

१३ शब्दंश्चोटंतीति० A.; शब्दकुर्वन्नटतीति कुक्कूटः D.

१४ = Pâṇ. किंशुलुकादि (किंशुल०).

Digitized by Google

अराद्यजिरादिबह्वचो मतावित्यनेन[1] अरादीनामजिरादिवर्जितस्य बह्वचो मतौ संज्ञायां विषयेऽदीर्घो भवति ॥ * ॥ अरावती नाम नदी ॥ * ॥ अहीवती ॥ * ॥ वंशावती ॥ * ॥ कुशावती ॥ * ॥ ऋषीवती ॥ * ॥ कपीवती ॥ * ॥ हनूमान् ॥ वसन्तकालो हनुमानिवागतः । इत्यादौ दीर्घत्वं विनापि संज्ञा प्रतीयते शब्दशक्तिस्वाभाव्यात् ॥ हनुहनूशब्दावित्यन्ये[2] ॥ * ॥ मुनीवती[3] ॥ * ॥ धूमावती ॥ * ॥ वार्दावान्नाम पर्वतः[4] ॥ * ॥ पद्मावती ॥ * ॥ मृचीवती ॥ * ॥ मृगावती ॥ * ॥ वेटावान् पर्वतः ॥ * ॥ आकृतिगणोऽयम् । तेन भोगावती । वातावतीत्यादि ॥ १४२ ॥ इति अरादिः ॥

अजिरस्थविरौ खदिरो मलयालंकारचक्रवाकाश्च ।
खपुरः शशाङ्कपुलिने हिरण्यकारण्डवकरीराः ॥ १४३ ॥

अजिरवती ॥ * ॥ स्थविरवती ॥ * ॥ खदिरवती ॥ * ॥ मलयवती ॥ * ॥ अलंकारवती ॥ * ॥ चक्रवाकवती ॥ * ॥ खानि पृणन्ति । खपुराः पूगाः सन्त्यस्यामिति । खपुरवती ॥ * ॥ शशाङ्कवती ॥ * ॥ पुलिनवती ॥ * ॥ हिरण्यवती ॥ * ॥ कारण्डववती[5] ॥ * ॥ करीरवान् पर्वतः[6] ॥ * ॥

चातुरर्थिको मतुः[7] ॥ चत्वारोऽपि गणाः संज्ञायां वेदितव्याः । कोटराणां वनं कोटरवनम् । अञ्जनस्य गिरिरञ्जनगिरिः । अरवती तृणः ॥ १४३ ॥ इत्यजिरादिः ॥

---

1 Cf. Pâṇ. vi. 3, 119.

2 हनु हनू इति द्विरूपं शब्दद्वयमेकार्थमित्यन्ये Yajñ.; D. om. fr. वसन्तकालो.

3 The other works give also मणि.

4 F. adds वार्ह्णावती.

5 Bö., Yajñ. have हंस & कारण्डव; Kâś. V. ed., MSS. हंसकारण्डववती.

6 अजिरवती खदिरवती कारंडववती हंसवती पुलिनवती चक्रवाकवती एता अपि पुरीविशेषस्य नदीविशेषस्य वा संज्ञा एव । वर्त्तमानस्तु आजरस्थविरौ० इति पठित्वा etc. स्थविरवती etc. प्रत्युदाहरन् काशिकायपेक्षयाऽधिकं सप्तकमुरीचकार ॥ Yajñ.

7 चातुर्थिको० A. D.

Digitized by Google

पृषोदराश्वत्थनखाः पलाश-
कपित्थदूणाशपिशाचदूढ्याः[१]।
विडौजसोलूकमृगौ[२] गभस्ति-
बृहस्पतिद्वापरकांदिशीकाः ॥ १४४ ॥

पृषोदरादीनि यथोपदिष्टमित्यनेन[३] पृषोदरादयः शब्दा अविहितलोपागमवर्णविकाराः[४] शिष्टैः प्रयुज्यमानाः साधवो भवन्ति ॥ * ॥ पृषत[५] उदरम्। पृषोदरम् ॥ पृषद् उदरे यस्य स पृषोदरो देवताविशेषः। पृषच्छब्दो घृतबिन्दावादिहविष्यवृत्तिः। यद्वा। ह्रस्यमानपृषदिधानसहचरितो बन्धोऽप्यभेदोपचारात् पृषच्छब्दवाच्यः ॥ * ॥ अश्व इव तिष्ठति। अश्वत्थः। पिप्पलः ॥ * ॥ न खनतीति नखः ॥ * ॥ पलमश्नातीति[६] पलाशः ॥ * ॥ कपिरिव तिष्ठतीति कपित्थः। कपयस्तिष्ठन्त्यस्मिन्निति वा। कपित्थः। कपिरिव खम्बतेऽधस्[७] पततीति कपित्थः ॥ * ॥ कृच्छ्रेण नाश्यते। निन्दितो वा नाश्य इति[८] दूणाशः। दुर उत्तम् उत्तरपदे टुलं च[९] ॥ * ॥ पिशितमशित्वा चन्दतीति पिशाचः ॥ * ॥ दुष्टु ध्यायतीति दूढ्यः ॥ * ॥ वेवेष्टीति विड् व्यापकम् ओजो यस्य। विडौजाः। पाकशासनः[१०] ॥ * ॥ ऊर्ध्वौ कर्णावस्येति। उलूकः[११] ॥ * ॥

---

१ पलास° E.

२ °सौलूखलकमृगौ° C.; दिवौकसोलूखलुको गभस्ति° D.

३ P. vi. 3, 109.

४ अविहितवर्णागमलोपविकाराः B. C. F.

५ पृषत् D.—पृषत् उदरं यस्य eds. Pāṇ., Kāś. v.; पृषतो हरिणस्योदरं पृषोदरम्। पृषत उदरमिवोदरं यस्येति वा विग्रहः। पृषच्छब्दो घृतमिश्रदध्यादिहविष्यवाची तदुदरे यस्य स पृषोदरो देवविशेष इति वर्धमानः। Yajñ. 5l. 148.

६ मलयमश्नातीति A.

७ खपते यस्य A.; खंपतेयस्य B.; खंपते यस्य C. F.; खंपतेऽध च न यतती° D.

८ वा नाशयति B. C. F.; वा इति D.

९ उत्तरपदादेर्टुलं च F. (P. vi. 3, 109, v. 6); D. corr. उत्तरपदेषु खलं च.

१० पाकशासनः प्रयोगः D.

११ A. B. C. D. add खं खातीति उलूखलं (अदूरवासं D.); for उलूखल see 5l. 148.

Digitized by Google

मृदूकुर्वन्ति गच्छन्तो मृगास्तेन प्रकीर्तिताः ॥
गां बभस्ति.दीपयतीति गभस्तिः ॥ * ॥ दृहतां पतिः । दृहस्पतिः । तकारस्य सकारे ॥ * ॥ द्वाभ्यां कृतचेताभ्यां परम् । द्वौ परौ मुख्यावचेत्युभयकोटिस्पृक्कात्[1]। द्वापरं युगं संश्रयस्व ॥ * ॥ कां दिशं व्रजामीति कांदिशीकः[2] ॥ १४४ ॥

पृषोद्यानबलीवर्ददूडाभवानमन्तराः[3]।
परःसहस्रदूडाशषोढातस्करषोडशाः ॥ १४५ ॥

पृषत उद्यानं[4] प्रशस्यम् । पृषोद्यानम् ॥ उत्पूर्वाद्यातेर्युनप्रत्यये[5]। उद्यानमिति[6] शाकटायनः ॥ * ॥ बलं वर्धयतीति बलीवर्दः[7] ॥ * ॥ कृच्छ्रेण दभ्यते निन्दितो वा दाभः । दूडाभः । उलं टुलमनुनासिकलोपश्च ॥ पाणिनिभोजौ तु दूडभ इत्याहतुः[8] ॥ * ॥ वनानामन्तराणि । वनान्तराणि । वनान्तरेषु भवाः । वानमन्तरा देवाः ॥ * ॥ सहस्रात्परे । परःसहस्राः ॥ * ॥ कृच्छ्रेण दाश्यते । निन्दितो वा दाश इति दूडाशः[9] ॥ * ॥ षड्भिः प्रकारैः । षोढा । उले टुले च[10] ॥ * ॥ तत्करोतीति तस्करः ॥ * ॥ षट् च दश च । षोडश । षष उले दस्य टुले[11] ॥ १४५ ॥

---

१ °स्पृक्का A. B. C. D.; °मुख्यौ वा ऽचेत्यु° स्पृक् । वा द्वापर° F.—From Kshirasvâmin on A. K. 3, 4, 164.

२ कां दिशं यातीति कांदिशीको भयद्रुतः Yajñ.

३ पृषोनव° वातमंतरा: C.; पृषोद्यानधवली° A.; पृषोद्यान° F.

४ Thus A. B. C. D.; पृषत उद्यानं F.—पृषत् उद्यानं (or पृषदु°) पृषोद्यानं Kâś. V. ed. MSS.; पृषोत्थान Bö. and (= हरिणस्योत्थानं) Yajñ.

५ D. corr. यातेर्यतुप्रत्यये.

६ उद्यानमिति B.; उद्यातं F.

७ वर्धयतीति° F.; बलीवर्दः C.

८ P. vi. 3, 109, V. 6; thus also Bö., Kâś..V., Yajñeśv.

९ दाश्यते° दास° A. D. F.; दाश्यते° दस° B.; दूडासः B. F.; C. om. from उलं टुल°.

१० डले च B. D.; उले च । C.

११ उले B. C. D.

Digitized by Google

अवटकुलटे प्रायश्चित्तं परःशतधूर्जटी
पुरुषमहिषावश्वत्थामा बिडालवलाहकौ
भ्रमरवडवासीमन्ताश्च श्मशानमनीषिते
मुसलकितवौ प्रायश्चित्तिः सृगालवनस्पती[1] ॥ १४६ ॥

अवागटन्यस्मिन्निति । अवटः ॥ * ॥ कुत्सान्यटतीति कुलटा ॥ * ॥ प्रायस्य पापस्य चित्तम् । प्रायश्चित्तम् । अतिचारशोधनम् आलोचनादि ॥ * ॥ शतात्परे । परःशताः ॥ भोजस्तु परशब्दसमानार्थं परःशब्दमाह ॥ * ॥ धूर्गङ्गा जटास्यस्य[2] । धूर्जटिः । महेश्वरः ॥ * ॥ पूः शरीरम् । तच्च शेते । पुरुषः[3] ॥ * ॥ मह्यां शेते । महिषः ॥ * ॥ अश्व इव तिष्ठति । अश्वत्थामा द्रोणपुत्रः । यथा ।

अश्वत्थामा हत इति किल व्याहृतं सत्यवाचा[4] ॥

बिलं दारयतीति बिडालः । लस्योपो टुत्वं रस्य लत्वं च । यथा । विभुर्बिडालेक्षणभीषणाभ्यः[5] ॥ * ॥ वारिणो वाहकः । वलाहको मेघः । यथा ममैव ।

मतिमतां मधुरं कवितामृतं
दहति मल्लिसलाम वलाहके[6] ।
विदधती निखिलार्थविवेचनं[7]
जयति कल्पलता चिरदीधितिः ॥

भ्रमन् रौतीति भ्रमरः ॥ * ॥ अश्वस्यामा[8] । वडवा । अश्लोपे डक्य-

---

१ भ्रमरवडवा° A. C.; °मृग्य° A. B. C. D.; मृगाल्य A. B. C. D. E.

२ जटा यस्य C. F.—धुरिव व्यायता जटा यस्यासौ° Yajñ.

३ पुरं शरीरं° पुरुषो जीवात्मा नरो वा Yajñ.

४ Thus MSS.—अश्वत्थामा हत इत पृषासूनुना खण्डमुक्ता खीरं शेते गज इति किल व्याहृतं सत्यवाचा । Veṇis. 3, 10 (Grill. śl. 64).

५ Śiśup. 3, 45.

६ दधति मल्लि° B.

७ निखिलार्थ वि° B. C.

८ अश्वस्य अश्वा A.; अश्वस्य C.

नुनासिकलोपश्च[1] ॥ * ॥ सीम्नोऽन्तः । सीमन्तः । केशविन्यासः ॥ * ॥ अवानां अयनम्[2]। अज्ञानम् ॥ * ॥ मनस दृष्टम्। मनीषितम्। यथा। मनीषितं द्यौरपि येन दुग्धा[3] ॥ यथा वा ममैव।

दूरादपि रिपुलक्ष्म्यो मनीषितं यत्नयन्ति सावेगाः।
अग्निमिवेतरभूभृन्निरुद्धगतयोऽपि कुक्षिन्यः[4] ॥

मनस ईष्टे । मनीषी । णिनि मनसोऽन्यात्रादिलोपः । अकारस्य षकारः ॥ स्वत्यर्थदयीशौमित्यनेन[5] षष्ठी । इति आकटायनः ॥ * ॥ मुञ्जः खनं खातीति मुञ्जखम्[6] ॥ * ॥ किं तवास्तीति कितवः ॥ * ॥ प्रायस्य चित्तिः । प्रायश्चित्तिः । अतिचारशोधनम् ॥ * ॥ अस्तृज्याख्यायते । अस्तृगिखति[7]। अस्तृगाखेढीति वा । स्तृगाखः ॥ * ॥ वनस्य पतिः । वनस्पतिः । अपुष्पो वृक्षो न्यग्रोधादिः । सर्वोऽपि हरितकायो[8] वनस्पतिरिति केचित् ॥ १४६ ॥

आशीविषपुरोडाशषष्ठानिर्व्वयनीस्वराः[9]।
हेरखारण्वधावाह्यषोढवाङ्गुलिमन्मथाः[10] ॥ १४७ ॥

आस्यस्य विषमिति । आशीविषः । आशुविषयोर्बहुव्रीहाव् आशुशब्दस्य आशीभावः[11] ॥ आशिषि दंष्ट्रायां विषमस्येति वा । तथा च आम्नतकोशे । दंष्ट्राशीरनिलाशिनाम् ॥ अजयेऽपि ।

---

१ असलोपे० A. D.; आलोपे० B. C.

२ अचीनां अयनं C.—मृताः खा शेरतेऽस्मिन्निति खाशानं पितृवनम् Yajñ.

३ Raghuv. 5, 33.

४ रिपुलक्ष्म्या मनीषितं साचगाः ॥ अस्मिमिवेतरभूवृत्तिरुद्ध० नलिन्यः C.; यं अयंति सावेगाः A. (? B. F.); अयमिवेतर० A.; D. om. fr. यथा वा ममैव.

५ °दयेशामि० F.; cf. P. ii. 3, 52.

६ खानं० A. B. C. D.; मुञ्जलं C. D.

७ असृगाखाति F.

८ ? Thus MSS.; Prof. Roth suggests सर्वेऽपि हरीतक्यादयो, since with *harîtakî* begins the enumeration of the *mahâdruma*, as in the Madanavinoda.

९ °निर्व्वयनी० C.; निर्व्वूयनी B.; °षष्ठनिर्व्वेयीनीश्वराः D.

१० °वाह्यषोढवादलि० A.; वधाषषोढशवलि० C.

११ A. B. om. from आशुविष०; C. from आस्यस्य.

Digitized by Google

आशीरिष्टस्याशंसायां दंष्ट्रायामनिलाग्निनाम् ।
आशीस्थालुगता दंष्ट्रा तया विद्धो न जीवति[1] ॥

तस्यां विषमस्य[2] । आशीविषः । इत्येके ॥ * ॥ पुरो दास्यत[3] इति पुरोडाशः । पिष्टपिण्डः । यथा ।

पुरोडाशभुजामिष्टमिष्टं कर्तुमलंतराम्[4] ॥

षड्भिः प्रकारैः । षड्धा ॥ * ॥ नितरां लूयते स्वशरीराद्दृढिः क्रियते शरीरसूपैरिति[5] निर्ऋयनी । भुजङ्गमुक्ता लक् ॥ * ॥ स्वयं राजन्त इति स्वराः ॥ * ॥ प्रत्यूहे रम्भते शब्दायते[6] । हेरम्बो गणपतिः ॥ * ॥ आराद् रोगान् हन्तीति । आरम्वधः ॥ * ॥ आधायन्ति जनास्तमिति । आद्यः । घण्यर्थे कः ॥ * ॥ षड् दन्ता अस्य । षोडन् । षोडती ॥ * ॥ वाश्वा-दस्यापत्यम् । अत इञि । वाडवलिः[7] ॥ * ॥ यूनां मनो मथ्नातीति मन्मथः ॥ १४७ ॥

उलूखलोदूखलकुञ्जरा लुग्
मृणालजीमूतमयूरसिंहाः ।
शकन्धुकर्कन्धुदधित्थबृस्यो
महित्थपारापतमेखलाश्च ॥ १४८ ॥

ऊर्ध्वं खं बिलं वाखातीति । उलूखलम् । उदूखलम्[8] । यच ग्रीष्मादयः कुत्सने ॥ ऊर्ध्वं खं खातीति वा[8] । उदूखलम् ॥ * ॥ को

---

१ आशी ताछु° A. D.; ताछुगंता° C.
२ यस्यां° C.; विषस्य A.
३ दास्यत A. B. C. F.; दास्यति D.
४ Śiśup. 2, 106.
५ शरीरसूपैरिति A.; स्वर्यैरिति D.; क्रियते सर्पैरिति F.; °निर्ऋयनी C.
६ रवते B. C. F.—प्रत्यूहे रम्भते शब्दायते हेरम्ब इति नैरुक्ताः Kshîr. A. K. 1, 1, 1, 34.
७ वाग्वलिः F.—वाङ्खलि wrongly Kâś. V. ed. (not MSS.).
८ ऊर्ध्वं खं खाति आदत्ते इत्युलूखलम् । उत् ऊर्ध्वं खलति संचलतीति वा उलूखलम् । Yajñeśv. (om. उदूखल).

Digitized by Google

पृथिव्यां जीर्यतीति कुञ्जरः ॥ * ॥ लुच्यतेऽपनीयत इति लुग् नाम लोपः । यथा । प्रत्ययलुकां चानाम्[1] ॥ * ॥ मृदमालीयते । मृणालः ॥ * ॥ जीवनं जलं तस्य मूतः पुटबन्धः[2]। जीमूतः ॥ * ॥ मन्द्रां रौतीति मयूरः ॥ * ॥ हिनस्तीति सिंहः ॥ * ॥ ग्रकस्यान्धुः । ग्रकन्धुः ॥ * ॥ कर्कस्यान्धुः । कर्कन्धुः । बदरी ॥ * ॥ दध्नि तिष्ठतीति दधित्थः ॥ * ॥ मुवन्तः सीदन्त्यस्यामिति[3]। वृसी । मुनीनामासनम् ॥ * ॥ मन्द्रां तिष्ठतीति मन्दित्थः ॥ * ॥ पारे[4] पततीति पारापतः ॥ * ॥ मेहनस्य खस्य[5] माला । मेखला ॥ १४८ ॥

दिवः स्थाने दिवोऽचि स्याद् दिव् च दीर्घे पुनः परे।
उकारोकारयोरुस्य पश्चातोऽर्धादिके तलुक्[6] ॥ १४९ ॥

दिवः स्थाने दिवोऽचि स्यादिति । दिवाधीश्वरः । दिवाङ्गना ।[7] दिवौकसः ॥ * ॥ दीर्घेऽचि पुनर्न केवलं दिवः स्थाने दिवो भवति दिव् च । दिवीश्वरः । दिवेश्वरः ॥ दिवूढा । दिवोढा ॥ दिवूतिः । दिवोतिः ॥ * ॥ उकारोकारयोरुचेति । द्यूद्यानम् । दिवोद्यानम् । यथा ।

उद्यद्द्यूद्यानवाप्यां बकुलततमतमः पङ्कपूरं विदार्य[8] ॥

दिवोद्गतिः । द्यूद्गतिः ॥ द्यूढा । दिवूढा । दिवोढा । ऊकारे रूपत्रयम् ॥ * ॥ पश्चातोऽर्धादिके तलुक्[9]। पश्चाच्छब्दस्यार्धादावुत्तरपदेऽन्यतकारस्य लुग्भवति । पश्चार्धम् । पश्चिमार्धमित्यर्थः । यथा ।

---

1 Kâtantra iv. 1, 4.

2 जीवनस्य मूतः° Kâś. V.; जीवनं मुंचतीति जीवनस्य जलस्य मूक्तः पुटबंध इति वा Yajñ.

3 Thus also Kâś. V.; वृहंतोऽस्यां सीदंत्युपविशंतीति वृसी ऋषीणामासनं Yajñ.

4 पारं C.

5 °खलस्य A.; ग्रिम्नस्य F.; om. C.

6 च लुक् । A. B.; C. om. this śloka.

7 D. adds दिवेहः, A. विदेहः.

8 Mayûra's Sûryaśataka 79 ed. Vidyân.; °वकुलततमतः° ed. Haeberl.

9 च लुक् A. B. C.; लुलुक् D.

Digitized by Google

पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्[1]॥

पश्चानुपूर्वी। पश्चाभिमुखः। पश्चिमाभिमुख इत्यर्थः॥

आदिग्रहणात्। कञ्चिं विन्दति। कञ्चविन्दः॥ शतकेन शतीति शकशाः[2]॥ ऊरू अश्नुते। नारायणस्योरुप्रभवत्वात्। उर्वशी[3]।

तथा च। ऊरुद्भवा नरसखस्य मुनेः सुरस्त्री[4]।

यथा। दधत्युरोजद्वयमुर्वशीतलं

भुवो गतेव स्वयमुर्वशी तलम्।

बभौ मुखेनाप्रतिमेन काचन

श्रियाधिका तां प्रति मेनका च न[5]॥

चीत्करोति खलं च भवति। चिखलः[6]॥ द्वौ प्रवेशनिर्गमौ रातीति द्वारम्। इत्यादयो द्रष्टव्याः॥ अत्र च।

येषामुणादिशास्त्रेण व्युत्पत्तिर्न प्रकल्प्यते।

दिवादिपदसंपर्कात्ता तेषां स्वाभिरुक्तितः[7]॥ १॥

समासशेषभूतं स्वाभिरुक्तपदसाधनम्।

दिवादिपदसंपर्कान्नोपागमविकारजम्॥ २॥

उणादिशास्त्रे मधूरमहिषप्रभृतीनां व्युत्पादितानामपि पुनरत्र व्युत्पादनमनेकधापि संज्ञाशब्दानां व्युत्पत्तिर्भवतीति प्रदर्शनार्थम्॥ १४८॥

इति वृषोदरादिः[8]॥

---

१ Śâkunt. śl. 7.

२ शकातीति° D.; शसतीति° F.; शकशासः C.—शकं शिरोगीवं शासयति शकशासः। शकिशास इत्यपि पाठः। Kshîr. on A. K. 2, 5, 12. Prof. Aufrecht suggests शकेश शसति. Prof. Kielhorn has found the following note on शकशाः,—अत्र तकारलोपः शकारसकारयोस्तु विपर्ययः.

३ ऊरुमश्नुते° A.; °उर्वसी D.

४ Vikramorv. śl. 3.

५ Śiśup. 9, 86.

६ तीत्करोति° B.; खिलं च° चिरञ्च D.; खलू च° चिखलूः C.

७ प्रकल्प्यते B.C.; निरुक्तितः A.B.C.D.

८ Vardham. includes in this *gaṇa* the शकन्ध्वादि Pâṇ. vi. 1, 94 v. 2; and the vârtts. to vi. 3, 109.

Digitized by Google

पारस्करो देशविशेषवर्ती
कारस्करो[1] राजतरौ गिरौ च।
नद्यां रथस्या प्रमितौ तु किष्कुः
प्रतिष्कशः[2] प्रष्ठसहायदूते ॥ १५० ॥

पारस्करादयः शब्दाः सपाञ्चपूर्वपदाः पारस्करादयो नाद्यीत्यनेन साधवो वेदितव्याः। देशविशेषादिष्वर्थेषु ॥ * ॥ पारं करोतीति पारस्करो देशः। पारस्करं नाम आनर्तेषु जनपदे नगरमित्येके। अन्यत्र पारकरः[3] ॥ * ॥ करं करोतीति कारस्करः[4]। राजवृक्षो गिरिश्च ॥ * ॥ रथं पाति पिबतीति वा। रथस्या नाम नदी। रथपाऽन्या ॥ * ॥ किं करोतीति। करोतेर्डुप्रत्यये किमो मकारस्य षादेशे च। किष्कुः। प्रमाणं हस्तो वितस्तिर्वा[5] ॥ * ॥ प्रतिकशतीति प्रतिष्कशः[6]। अग्रेसरः सहायो दूतो वा। प्रतिगन्तव्यैऽपि कस्मिन्नन्यते।

यामनघ प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः[7] ॥

अतोऽन्यत्र। प्रतिगतः कशाम्। प्रतिकशोऽश्वः[8] ॥ १५० ॥

स्तः प्रस्कण्वहरिश्चन्द्रावृषावाश्वर्यमद्भुते।
वर्चस्केऽवस्करो ज्ञेयो रथाङ्गे स्यादपस्करः ॥ १५१ ॥

प्रस्कण्वः कण्वः। प्रस्कण्वः। ऋषिः ॥ * ॥ हरिम् चन्द्रोऽस्येति हरि-

---

१ कारस्करो A. B. C. F.

२ प्रतिस्कशः B. C.; प्रतित्वसः A.; प्रतिष्कसः D.

३ आनर्तिषु A.; जनपदेषु F.; D. om. from पारस्करं to नदी.

४ ? कार° कारस्करः B. C. F.—The other works omit कारस्कर. Yajñ. has कारस्करो राजवृक्षो गिरिश्च. Cf. gl. 152.

५ वितस्तिर्वा C.; D. om. from हस्तो.

६ प्रतिकसतीति प्रतिस्कसः MSS.

७ प्रतिस्कसः A. D.; प्रतिस्कशः B.; also quoted Kâś. V. vi. 1, 152.

८ कसां प्रतिकसे श्वः A.; प्रतिकाशाश्वः C.; कसां प्रतिकसः। D.

Digitized by Google

स्वन्द्रो नाम ऋषिः । कस्मिद् राजन्यप्याह[1] ॥ * ॥ आचर्यत इति । आश्चर्यम् अद्भुतम् ॥ अन्यच्च । आचर्यं व्रतम् ॥ * ॥ अवकीर्यत इति । अवस्करः । वर्चस्कम् अन्नमलमित्यर्थः । अन्नमलविसर्जनदेशोऽपि[2] तत्संबन्धाद् अवस्करः ॥ अन्यो यः कस्मिदवकीर्यते सोऽवकरः[3] ॥ * ॥ अपकीर्यत इति । अपस्करो रथावयवः । अपकरो[4]ऽन्यः ॥ १५१ ॥

कास्तीराजस्तुन्दास्कथानि नगरे गिरौ तु किष्किन्धः[5] ।
मस्करिमस्करकारस्करास्तु मुनिवेणुवृक्षेषु ॥ १५२ ॥

अल्पं तीरम् । कास्तीरम् ॥ अजस्य तुन्दम् । अजस्तुन्दम्[6] ॥ आहृताः कथा अस्मिन्निति । आस्कथं नाम नगरम् ॥ अन्यच्च कातीरम् । अजतुन्दम् । आकथम्[7] ॥ * ॥ किं किं दधातीति किष्किन्धः पर्वतः[8] ॥ * ॥ माकरणशीलः । मस्करी परिव्राजकः । स ह्येवमाह । मा हसत कर्माणि भ्रान्तिर्वः श्रेयसीति[9] ॥ * ॥ माक्रियते प्रतिषिध्यते ऽनेनेति मस्करो दण्डः । येन हस्तिनः भ्रमं नीयन्ते दम्यन्ते स वेणुर्मस्कर इत्यन्ये[10] ॥ * ॥ कारं करोतीति कारस्करः । वृक्षः ॥ १५२ ॥

आस्पदं स्यात्प्रतिष्ठायां क्रियाभीक्ष्ण्ये ऽपरस्पराः ।
आयुधे किष्कुरुः प्रोक्तः स्यात् कुस्तुम्बुरुरौषधे[11] ॥ १५३ ॥

---

१ राजन्यमप्याह C. D.

२ तथा अन्न° D.; अवान्नमलविसर्जनदंडो पि B. C.; °देवशो पि A.

३ F. om. from वर्चस्कं and has instead रोमशः । अन्यथाऽवकरः ।

४ अपरो A.; अवकरो B.; अपकारो C.

५ कास्तीराजस्तुंदावुत्तौ नगरे° E.; कास्तीराज[स्तुंदावुत्तौ नगरे गिरौ तु suppl. a. m.]° D.

६ अजन्यभुद्गगरि चतुं D.

७ D. om. from आहृताः cf. note 5; A. om. नगरं.

८ किष्किं दधतीति° D.

९ Kâś. V. vi. 1, 154.

१० भ्रमं नीयंते स° C.; समं नीयंते दम्यंते° A.; हस्तिना समनीयंते° मस्कर इ° D.

११ आयुकिष्कुभः° कुस्तुंबुर° A.; किष्कुरः° D. E.

Digitized by Google

पूजितं पदम् । आस्पदम् ॥ अन्यत्र । आ ईषत् पदम् । आपदम् ॥ * ॥ अपरे च परे च । अपरस्पराः सार्था व्रजन्ति । सातत्येन यान्तीत्यर्थः ॥ * ॥ कस्य कुरुः । किष्कुरुः[1] । आयुधम् ॥ * ॥ कुत्सितं तुम्बुरु[2]। कुत्सुम्बुरुः ।[3] धान्यकम् । यथा कथंचिद्ग्रहः । कुत्सुम्बुरोः फलानि कुत्सुम्बुरूणि[4] ॥ १५३ ॥

कन्दरा पूश्च किष्किन्धा कृतान्नमथ शष्कुली[5]।
गोष्पदं स्यात्प्रमाणादौ विकिरो विष्किरः खगे[6] ॥ १५४ ॥

किं किं दधातीति किष्किन्धा । गुहा नगरी च ॥ * ॥ शष्कुली । भक्ष्यविशेषः[7] ॥ * ॥ गवां पदम् । गोष्पदम् । गोष्पदपूरं वृष्टो देवः । अत्र गोपदमन्यस्येयत्तां परिच्छेत्तुमुपादीयमानं प्रमाणं भवति[8] ॥ आदिग्रहणात् सेवितासेवितपरिग्रहः । तत्र सेवितो गोष्पदो देशः[9]। यत्र गावः पद्यन्ते स गोभिः सेवितो ग्रामसमीपादिदेश उच्यते[10] ॥ असेविते । अगोष्पदेष्वरण्येषु विश्वासमुपजग्मिवान्[11] ॥ * ॥ विकिरति चञ्चा विक्षिपतीति विकिरो विष्किरश्च पक्षी । उभयोरुपादानं विकल्पितसकारप्रतिपत्त्यर्थमिति ॥ १५४ ॥ इति पारस्करादिः[12] ॥

---

१ किस्कुरु A.; D. corr. किष्कुरः.
२ तुंबुरुः B. D.; तुंबरुः C.; तुबरुः F.
३ कुसुंबरुः C.; कुसुंबुरुः D.
४ कुसुंबरूणि A.; कुसुंबरो फ० D.; कुसुंबरोः °कुसुंबराणि B.; कुसुंबरः °कुसुंबराणि C.; cf. P. vi. 1, 143.
५ कृतानमथ शष्कुली A.
६ गोःपदं B. C.; गोस्पदं° D.
७ शष्कुली° A.; लक्ष्यविशेषः C.; षष्कुली भक्षवि° D.
८ गोः पदम° B. C.; गोस्पदमित्येयत्तां परिच्छेत्तुमुपादीयते तेन प्रपार्णं° D.; cf. Mbh. on Pāṇ. iii. 4, 32.
९ गोः पदो° B. C.; गोस्पदो° D.; cf. P. vi. 1, 145.
१० °समीपादिर्देश° A. B.
११ अगोपदेष्व° A.; अपास्पदेष्व° D.; °विश्वोरमुप° C.
१२ For this *gaṇa* cf. P. vi. 1, 143-157.

Digitized by Google

नभ्राण्नागनपान्नमेरुनकुला नासत्यनक्षौ तथा
नाराचो नखनान्तरीयकयुतौ नक्षत्रनाकाविमौ ।
नारङ्गश्च नपुंसकेन कलितः स्यान्नाचिकेतस्तथा
नमो नास्तिकनापितावपि नभो ज्ञेयो नवेदा गणे ॥१५५॥

नभ्राडादिषु शब्देषु नभ्राडादिषु नञ् प्रक्लृत्येत्यनेन[1] नञ् प्रक्लृत्या तिष्ठति ॥ * ॥ न भ्राजत इति नभ्राट् । क्विबन्तः[2] ॥ * ॥ न अगः । नागः ॥ * ॥ न पातीति नपात् । अचन्तः ॥ * ॥ न मीयतेऽसाविति नमेरुः । गणा नमेरुप्रसवावतंसाः[3] ॥ * ॥ नास्य कुलमस्तीति नकुलः ॥ * ॥ सत्सु साधुः । सत्यः । न असत्यः । नासत्यः । न असत्याः । नासत्याः साधवः ॥ केचित्तु । न असतः साधून्[4] । नासत्यावश्विनीकुमारावित्याहुः ॥ * ॥ न क्रामति । नक्रः ॥ * ॥ न अरमश्नुते । नाराचः । यथा ममैव क्रियागुप्तके ।

उच्चत्तीव्रानङ्गनाराचविद्धा
स्वप्राणेभ्यो वल्लभं त्वामदृक्षा ।
वेगादेषा चक्रवाकी वराकी[5]
तीराच्छीरे प्रातरेव प्रयाति ॥

नास्य खमस्तीति नखः । नखरो गन्धद्रव्यं च ॥ * ॥ अनन्तरेण[6] भवतीति नान्तरीयकम् ॥ * ॥ न चीयते न चरति वा । नचचम् । चन्यत्वम् अन्यलोपो वा निपातनात् ॥ * ॥ नास्त्यस्मिन्नकं दुःखमिति

---

१ प्रक्लृत्य इत्य० A.; B. C. F. omit from नभ्राडादिषु नञ्.

२ न भ्राजत इति नभ्राव इति नभ्राट्० A.; क्विबंतः C.; क्विब्नंतः B. F.

३ Kumâras. 1, 55.

४ Thus (असतः MS. I. O. 2776) Kshîr. on A. K. 1, 1, 1, 47.—न असत्यः साध्वनु A.; D. om. from न असतः.

५ चक्रवाकीव वामा F.

६ न अन्तरेण A. F.

Digitized by Google

नाकः ॥ न अविद्यमानो विरिञ्चो[1] यत्र वा ॥ * ॥ न अरं गच्छति स्वयमिति[2] नारङ्गः ॥ * ॥ न स्त्री न पुमान् । नपुंसकः । अत एव निपातनात् स्त्रीपुंसयोः पुंसक आदेशः ॥ * ॥ न न चिकेत्ति । नाचिकेतो नाम राजा । अस्मादेव निपातनात् कि कित ज्ञाने[3] इत्यस्माच् च प्रत्ययो गुणश्च भवति ॥ * ॥ न विद्यन्ते ग्राः स्त्रियश्छन्दांसि[4] वा यस्य । नग्नः ॥ * ॥ नास्तीति मतिरस्य[5] । नास्तिकः ॥ * ॥ न आप्यतेऽसाविति नापितः ॥ * ॥ न बभस्ति । नभः ॥ * ॥ न वेत्ति । नवेदाः । असुनि ॥

आकृतिगणत्वात् । न विद्यते भागोऽस्य । नभागः ॥ पद्भ्यां न गच्छति । पन्नगः ॥ न नन्दति वधूमिति ननान्दा ॥ तनुं न पातयति देहधर्मत्वात् । तनूनपात् । इत्यादयो द्रष्टव्याः ॥ अयं च गणश्चन्द्रदुर्गाद्यभिप्रायेण[6] ॥ १५५ ॥ इति नञादिः ॥

पक्षज्योतिर्जनपदपत्नीकरमानबन्धुगन्धाः स्युः ।
देशो राशिः पिण्डो नाभिः कुक्षिस्तथा वेणी ॥ १५६ ॥

समानस्य पचादिष्वित्यनेन समानस्य सभावो भवति[7] ॥ * ॥ पचस्य समानः । समानः पचोऽस्येति वा । सपंचः ॥ * ॥ सज्योतिः ॥ * ॥ सजनपदः ॥ * ॥ समानः पतिरस्याः । सपत्नी ॥ * ॥ सकरः ॥ * ॥ समानं मानं यस्य । समानः ॥ * ॥ सबन्धुः ॥ * ॥

सागन्ध्यं दधदपि काममङ्गनानाम्[8] ॥ * ॥

---

१ न न विद्य° A. B. C.; विरिचो D.; विरिंतो A.; को विरंचिर् F.

२ Thus A. D.; स्त्रियमिति F.; स्त्रेयमिति B.; स्त्रेर्यासति C.

३ A. B. C. om. कि; Dhât. 25, 20.

४ न विद्यते अयाश्रियश्छंदांसि D.; न विद्यते अमाश्रियशृद्दांसि A.; श्रियश्छंदांसि B. C. F.

५ नास्तीति अस्य स C.; नास्ति परलोकमतिरस्य F.

६ गणो दुर्गचंद्राद्यभि° D.; गुणो चंद्रगुप्ताद्यभि° A.; गणश्चडदुर्गाद्याभि° C.—For *nabhrâdâdi* cf. P. vi. 3, 75.

७ For this *gaṇa* cf. P. vi. 3, 84-5.

८ Śiśup. 8, 48.

Digitized by Google

सदेशः ॥ * ॥ सराचिः ॥ * ॥ सपिण्डः ॥ * ॥ सनाभिः ।
भ्रूयुग्मस्य सनाभिमन्मथधनुर्ज्योत्त्वाक्षिताक्षाश्चसः[1] ॥ * ॥
सकुचिः ॥ * ॥ सवेणी ॥ * ॥ कस्मिन्नोदितशब्दमप्यधीते । तीर्थशब्दस्तु न पठितो मतान्तरस्याभ्युपगतत्वात्[2] ॥ १५६ ॥ इति पक्षादिः ॥

रूपं वर्णो नामस्थाने जातीयधर्मवचनानि ।
गोत्रं वयोऽपि लक्ष्यं चन्द्रादिमते तु रूपादौ ॥ १५७ ॥

रूपादिषूत्तरपदेषु रूपादौ वेत्यनेन समानस्य सभावो वा भवति ॥ * ॥ समानं रूपं सरूपम् । समानं रूपं यस्य वा । सरूपः । समानरूपः ॥ * ॥ एवं सवर्णः । समानवर्णः ॥ * ॥ सनाम । समानामा ॥ * ॥ सस्थानम् । सस्थानः ॥ * ॥ समाना जातिरस्येति जातेरीय इतीयप्रत्यये । सजातीयः । समानजातीयः ॥ * ॥ सधर्मः । सधर्मा[3] । समानधर्मः । समानधर्मा । उत्पद्यतेऽस्मि[4] मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥
सवचनम् । सवचनः ॥ * ॥ सगोत्रम् । सगोत्रः ॥ * ॥ सवयः । सवयाः ॥ * ॥ आदियहणाद् भोजादेः परियहः । शाकटायनवामनाचार्यौ तु सभावं नित्यं सामान्येनाहतुः ॥ १५७ ॥ इति रूपादिः ॥

सुषामदुःषामनिषेधदुष्टवो
दुःषंधिदुःषेधसुषेधसुष्ठवः[5] ।
नौषेचिका दुन्दुभिषेचनान्तिषन्-
निःषामनिःषन्धिसुषन्ध्यपष्ठवः[6] ॥ १५८ ॥

---

१ °चसं D.; °क्षितास्याचसः A.
२ तादर्थशब्दस्तु° °भ्युपगतत्वात् C.
३ A. C. D. om. समानजातीयः; A. D. om. सधर्मा.
४ Mâlatîm., ed. Bhand. 1, 6.—B. D. F. read तु for ऽस्मि; A. उत्पत्स्यते। तु or। स्म (these being alike in the MS.; ? copied from स्मि); C. omits the first pâda.
५ सुषामनिःषामनिषेध° B. C.
६ निषाम° A. B. C.; निषंधि° A.; °अपस्तवः D. E.; सुषंधिपष्टतः C.

Digitized by Google

सुषामादीनां प्राग्वत् ष इत्यनेन[1] सुषामादीनां सकारस्य षत्वं भवति ॥ * ॥ शोभनं साम प्रियवचनं यस्याः सा सुषाम्णी । यथा भट्टिकाव्ये[2]। सुषाम्णीं सर्वतेजःसु तन्वीं ज्योतिष्टमां शुभाम् ।

निष्टपन्तीमिवात्मानं ज्योतिःसात्कुर्वतीं वनम् ॥

शोभनं साम । सुषाम ॥ शोभनं सामास्येति वा । सुषामा । ब्राह्मणः सौम्यो वा ॥ * ॥ दुष्टं साम । दुःषाम ॥ दुष्टं सामास्येति वा । दुःषामा ॥ * ॥ नितरां सेधः । निषेधः ॥ * ॥ दुष्टु निन्दितम्[3]। सुञ्सूसास्तुस्तुभस्खासेनसेधतिसिचसञ्जस्वञ्जामित्यनेनैव[4] दुष्टुशब्दस्य[5] षत्वे सिद्धे दुष्ट पाठः षत्वस्यानित्यत्वज्ञापनार्थः । तेन सुस्थितम् । दुःस्थितमिति सिद्धम् । यदा तु दुःशब्दो[6] निन्दायामनुपसर्गस्तदा विधानार्थम् ॥ * ॥ दुष्टः संधिः । दुःसंधिः ॥ दुष्टः संधिरस्येति वा । दुःसंधिः ॥ * ॥ निन्दितः सेधः । दुष्टः सेधोऽस्येति वा । दुःषेधः ॥ * ॥ शोभनः सेधः । शोभनः सेधोऽस्येति वा । सुषेधः ॥ * ॥ सुष्ठु शोभनम् ॥ * ॥ सिञ्चतीति सेचिका । नावः सेचिका । नौषेचिका काचित्स्त्री ॥ वामनस्तु । नावं स्यति । नौषा । नौषिकेत्याह[7] ॥ अपरे तु नौषेचनमिति टनान्तं पठन्ति[8] ॥ * ॥ षिच क्षरण इत्यस्य टनप्रत्यये । सेचनम् । दुन्दुभ्याः सेचनं[9] दुन्दुभिषेचनम् ॥ षिवु तन्तुसंताने । केवृ षेवृ[10] इत्यस्य वा टनप्रत्यये । सेवनम् ।

---

१ A. C. om. from सुषामादीनां.

२ Bhaṭṭ. 9, 85 (सुषाम्णो, °म्णीं MSS.).

३ दुष्टं दुष्ट° A.

४ °सेचतिसिच° ष्वंजामि° B.; सुञ्सूसासुचस्खासेनसंध° A.; सुञ्सूसासुतस्खा° F.; °सास्तुभस्खा° संजष्वंजष्वंजामि° C.; MSS. om. सु; cf. P. viii. 3, 65.

५ यदा तु शब्दो A.

६ नौसा नौसेव (om. B. C.) नौषिके° A. B. C.; नौसीषीव नौषिके° D.; नौसा । नौषिकेत्याह B. C.—? Some confusion; Kâś. V. viii. 3, 98 has only नौषेचनं (thus MS. *a*, with Bö., Yajñ.; नौषेवनं! ed.); नावः सेचनं नौषेचनम् । वर्द्धमानस्तु नौषेचिकां पपाठ । अन्ये पुनर्नावं स्यतीति नौषिका षेपणीदंड इत्याहुः । Yajñeśv.

७ नौषचनमिति° A.; नौषेचनेति° F.; ठन प्रसेचनं । C.

८ दुंदुभ्या सेचनं F.; om. B. C.

९ Cf. Pâṇ. Dhp. 14, 30-9.

Digitized by Google

दुन्दुभेः सेवनं[1] दुन्दुभिषेवणमिति शाकटायनः ॥ * ॥ अन्तिके सीदति। अन्तिषत्।[2] कादेर्बञ्छसमित्यनेन कखोपः ॥ * ॥ सामो निर्गतः। निर्गतं सामास्येति वा। निःसामा ॥ * ॥ निर्गतः संधिः। निर्गतः संधिरस्येति वा। निःसंधिः ॥ * ॥ शोभनः संधिः। शोभनः संधिरस्येति वा। सुसंधिः। यथा चिभुवनमाणिक्यचरिते।

सुवृत्तमथुज्ज्वलवर्णरूपं[3] सुसंधिमूरुद्वयसर्गबन्धम्।
विधाय तस्याः स कविः पुराणो रुरोध वाचः प्रसरं कवीनाम् ॥

अपतिष्ठतीति। अपष्ठुरत्रुः[4] प्रतिकूलं च ॥ १५८ ॥

परमेष्ठी निःसेधः सव्येष्ठाता मतश्च सव्येष्ठा।
सुषमा सुषीमदिविषत्प्रतिष्णिकागौरिषक्थाश्च[5] ॥ १५९ ॥

परमे स्थाने तिष्ठतीति परमेष्ठी। पितामहः ॥ * ॥ निर्गतः सेधः। निर्गतः सेधोऽस्येति वा। निःसेधः ॥ * ॥ सव्ये स्थाने तिष्ठतीति सव्येष्ठाता। सारथिः ॥ * ॥ सव्ये तिष्ठतीति सव्येष्ठा। सव्यादेस्थोणादिरूढात्परेत्यनेन[6] ञप्रत्ययः। कश्चिद् अकारान्तमपि दर्शयति ॥ * ॥ सुष्ठु समा। सुषमा। प्रकृष्टा कान्तिः ॥ * ॥ शोभना सीमा यस्य। सुषीमो नागः ॥ * ॥ दिवि सीदन्ति। दिविषदो देवाः। दृशतः[7]

---

१ दुंदुभिः सेचनं C.; om. A.—Kâś. V. ed. has दुन्दुभिषेवनं (!), MS. *a* and Yajñ. °षेचनं; Bõ. °षेवणं (*var. l.* °षेचनं).

२ शीदति° A.; । षे च कादे° C.

३ °उत्पलवर्णरूपं° D.; °वर्णसुष- सुसंधिमुरुद्व° C.; A. om. from रिते। सुवृत्त° to śloka 369.

४ ? अपष्ठु रत्नुः C. F.; °रत्नः or रत्नुः B.; D. orig. अपन्नुरत्रि, corr. अपन्नुरपष्ठः; Prof. Aufrecht suggests अपष्ठुरनृजुः, Prof. Roth °अजुः, Prof. Weber रज्जुः 'fishing-line;' cf. अपष्ठ to P. viii. 3, 97.

५ °गौरषक्थाश्च B.; गौरषकथाश्च C.; गौरषक्थश्च F.; गौरिषक्षुश्च E.; A. om. text and comment.

६ ? प्रात्यादेस्थोणादि° B. C. F. and orig. D.; °रूढान्न्य इत्यनेन C.; °रूढोन्य इत्य° B. F.; °रूढात्परेत्य° orig. D. and corr. सव्यादेस्थोणादिः सव्यात्परेत्यनेन ञप्रत्ययः; °ञक्प्रत्ययः B.C.F.

७ दृशः B.; दृशंतात् C.; P. vi. 3, 9.

Digitized by Google

सप्तम्या इत्यनेन सप्तम्या अलुक् ॥ * ॥ प्रतिज्ञान्यस्यामिति प्रतिज्ञिका। द्रोणी[1] ॥ * ॥ गौर्याः सक्थीव सक्थ्यस्येति गौरिसक्थ्यः[2]। ज्याट्वे च ह्रस्वश्च[3] बङ्गलमित्यनेन ह्रस्वत्वे। कस्यचिदिदं नाम ॥

आकृतिगणोऽयम्। तेन जलाषाहम्[4]। भोरुष्ठानम्। अग्निष्टुत्। इत्यादयोऽपि भवन्ति ॥ १५९ ॥ इति सुषामादिः ॥

गिरेर्नदी नखो नद्धो नितम्बो वक्रतो नदी।
नितम्बस्तूर्यमाणस्तु माषोनार्गयणावपि[5] ॥ १६० ॥

गिरिनद्यादीनामित्यनेन गिरिनद्यादीनामुत्तरपदनकारस्य णत्वं[6] वा भवति ॥ * ॥ गिरेर्नदी। गिरिनदी। गिरिणदी ॥ * ॥ एवं गिरिणखः। गिरिनखः ॥ * ॥ गिरिणा गिरौ वा नद्धः। गिरिणद्धः। गिरिनद्धः ॥ * ॥ गिरिनितम्बः। गिरिणितम्बः ॥ * ॥ वक्रनदी। वक्रणदी ॥ * ॥ वक्रो नितम्बो यस्याः। वक्रनितम्बा। वक्रणितम्बा[7] ॥ * ॥ तूर्यस्य मानमिव मानमस्य। तूर्यमाणः। तूर्यमानः ॥ * ॥ माषेणोनः। माषोणः। माषोनः ॥ * ॥ ऋचाभयनम्। ऋगयनम्। ऋगयनस्य[8] बोद्धाऽध्येता वा। वेत्त्यधीत इत्यनेनाणि। अथवा। ऋगयनस्य व्याख्यानं तत्र भवो वा। ऋगयनेभ्योऽणित्यणि[9]। आर्गयणम्। आर्गयनम् ॥ * ॥ गिरिनद्यादयः प्रयोगतोऽनुसर्तव्याः ॥ १६० ॥ इति गिरिनद्यादिः ॥

---

१ द्रोणा D.

२ गौरसक्थः B. C. F. [कस्यचिन्मुनेः संज्ञेषा Yajñ.].

३ ? Cf. the same sûtra p. 61, l. 5; ज्यादिह्रस्वश्च C.; ज्यादेव ह्रु° D.; ज्याट्क्व च ह्रु° F.; ज्याट्वव ह्रु° A.; cf. P. vi. 3, 63-4.

४ ? Thus the other works; आलाषाहं D.; आलाषोहं° B.; अलोषाहं° F.; आलाहं C.—अलानि सहते इति अलाषाहम् Yajñeśv.

५ A. om. text and comment.

६ णीत्वं B. F. and orig. D.

७ Bö., Kâs. V. read वक्रनदी। वक्रनितम्बा; Yajñ. om. this *gaṇa*.

८ ऋगयणं ऋगयनस्य B.; ऋगयर्णं। ऋगयणस्य D.

९ Cf. P. iv. 3, 73.

Digitized by Google

क्षुभ्नातृम्नू नन्दननर्तननृनमननिवासनृत्तानि[1]।
नन्दी निवेशनगरे गहनाग्नी सर्वनामनटौ[2]॥ १६१॥

क्षुभ्नादीनां शब्दानां नकारस्य न क्षुभ्नादेरित्यनेन णत्वं[3] न भवति ॥ * ॥ क्षुभ्नाति। क्षुभ्नीतः। क्षुभ्नन्ति। क्षुभ्नन्। क्षुभ्नानः। क्षुभ्नता। यथा भट्टिकाव्ये।

रोषभीममुखेनैवं क्षुभ्नतोक्ते प्लवंगमः[4]।
प्रोचे सानुनयं वाक्यं रावणं स्वार्थसिद्धये॥

क्षुभ्नता कलुषीभवतेत्यर्थः॥ * ॥ द्रम्नोति। द्रम्नुतः। द्रम्नुवन्ति॥ द्रम्नु। द्रत्यत एव गणपाठाच्छुः॥ * ॥ हरेर्नन्दनम्। हरिनन्दनम्। द्रम्नोद्यानम्॥ * ॥ परितो नर्तनम्। परिनर्तनम्। नृत्तप्रयोगः[5]॥ * ॥ नृनर्तनम्। नृनमनम्। नृनमनो नाम कश्चिद्यक्ष नार्नमनिः पुचः। स्वरूपपदमेतत्॥ केचित्तु नृम्नमयति। नृनम[6] इत्युदाहरन्ति॥ * ॥ शराणां निवासः। शरनिवासो देशः॥ * ॥ परितो नृत्तम्। परिनृत्तम्[7]॥ * ॥ कुमारान्नन्दयतीत्येवंशीलः। कुमारनन्दी॥ * ॥ शराणां निवेशः। शरनिवेशः। तूणीरः[8]॥ * ॥ हरिनगरम्॥ * ॥ परितो गहनम्। परिगहनम्॥ * ॥ शबराणामग्निः। शबराग्निः॥ हरिः शक्रस्याग्निः। हर्यग्निः। विद्युत्॥ * ॥ सर्वेषां नाम। सर्वनाम॥ * ॥ सूचप्रधानो नटः। सूचनटः[9]॥ परिनटो नाम कश्चिद्विप्रः॥ १६१॥

ज्ञेयौ निवेशनानूपौ नदनो नरवाहनः।
स्वर्भानुर्नर्दनद्यौ च क्षुभ्नादौ स्याच्चृतेर्यङि[10]॥ १६२॥

---

१ नन्दननर्तक° D.; °नृत्तानि F.
२ °नाटौ C.; A. om. text and comm.
३ क्षुभ्नादित्वनेन° B. C. F.; णीत्वं B.
४ Bh. ix. 109; मुखेनैव A. B. C. D.
५ D. corr. twice नर्तकः; क्षत्प्रयोगः D.
६ नृनमन C. and corr. D.
७ परितो नृत्तं परिनृत्तं F.
८ तूबीरं B. F.; तूणं D.
९ Cf. p. 201, l. 1.
१० A. om. text and comment.

Digitized by Google

शराणां निवेशनम् । शरनिवेशनम् । शरधिः ॥ * ॥ अनूपाश्रिक्षान्तः । निरनूपः ॥ दर्भानूपं नाम स्थानम् ॥ * ॥ भेर्या नदनमिव नदनं शब्दनमस्य । भेरीनदनो नाम कश्चित् ॥ * ॥ नरो वाहनमस्य । नरवाहनः । वाहणं[1] वाह्याद्यित्यनेन नरस्यावाह्यत्वं[2] नास्ति ॥ * ॥ प्राक्स्थाद्यन्तेऽपूनामित्यनेन[3] मप्राप्तिः । स्वर्भानुः । सैंहिकेयः । स्थनम्यादेरित्यनेन णत्वप्राप्तिः[4] ॥ केचिद् अन्तःपूर्वपदात्संज्ञायामित्यनेन णत्वमिच्छन्ति[5] ॥ * ॥ चारवो नदा यस्मिन्ग्रामे नगरे वा स चारुनदः ॥ * ॥ सुराणां नदी । सुरनदी ॥ * ॥ नृतेर्नकारस्य यङि परे णत्वं[6] न भवति । नरीनृत्यते । नर्नर्त्ति । नरिनर्त्ति । नरीनर्त्ति । नर्नृतीति ॥ यङीति किम् । हरिरिव नृत्यतीति । हरिणर्ती नाम कश्चित् ॥

अम्बादिचुभ्वाद्योरेकत्वं प्रतिपन्नाः सामान्येन विशेषाभावात् ॥ आकृतिगणोऽयम् । तेन चतुर्हायनं कर्मेत्यादयो द्रष्टव्याः ॥ १६२ ॥

इति चुभ्वादिः ॥

इति

श्रीगोविन्दसूरिशिष्यपण्डितश्रीवर्धमानविरचितस्वीयगणरत्नमहोदधिग्रन्थवृत्तौ समासप्रक्रियानिर्णयो नाम

द्वितीयोऽध्यायः समाप्तः[7] ॥

---

१ वाहनं F.; P. viii. 4, 8 v. 2.

२ °णीत्वं B.; नरस्यवाह्य° C.

३ ? प्राक् प्वार्धते पूनामि° B.; प्राक् चार्धते यूनामि° C.; प्रावस्थादातेप्नामि° D.; प्राप्नार्धते यूनामि° F.; °नुप्राप्निः B. C. F.; मप्राप्निः (orig. मु°) D.

४ णीत्वप्राप्निः B.

५ णीत्व° B.; cf. P. viii. 4, 3.

६ णीत्वं B.

७ गोविंदाचार्यशिष्य° D. E.; समासतत्प्रक्रियागणनिर्णयो° B. C. F.

Digitized by Google

अथ तृतीयोऽध्यायः ॥

ब्रह्मा कलापितैतलिशिलालिलाङ्गलिशिखण्डिजाजलिनः[१]।
सूकरसङ्घा कुथुमी सुपर्वणा पीठसर्पी च[२] ॥ १६३ ॥

ब्रह्मादीनामित्यनेन ब्रह्मन्नित्येवमादीनामेवाणि परेऽण्याजादेर्लुग्भवति ॥ * ॥ ब्रह्मणोऽपत्यम् । ब्राह्मो नारदः ॥ ब्रह्मण इदम् । ब्राह्ममस्त्रम् । ब्राह्मो मन्त्रः । ब्राह्म्योषधिः ॥ ग्राकटायनादयस्तु जातावभिधेयायामनपत्य एवाण्यन्याजादेर्लुचमिच्छन्ति नापत्ये[३]। तेन ब्रह्मणोऽपत्यम् । ब्राह्मणः ॥ * ॥ कलापिना प्रोक्तमधीयानाः । कालापाः ॥ * ॥ तैतली । आचार्यः । तल्लतो यन्योऽपि तच्छब्देनोच्यते। तमधीयते तैतलाः[४] ॥ * ॥ एवं खाङ्गलाः ॥ * ॥ आजलाः ॥ * ॥ शिलालिन इमे । शैलालाः ॥ * ॥ एवं शैखण्डाः[५] ॥ * ॥ सौकरसङ्घाः[६] ॥ * ॥ कौथुमाः[७] ॥ * ॥ सौपर्वाः ॥ * ॥ पैठसर्पाः ॥

चशब्दस्यानुक्तसमुच्चयार्थत्वात् तेन साब्रह्मचाराः । दाण्डम् । चाक्रम् । इत्यादयो भवन्ति ॥ १६२ ॥ इति ब्रह्मादिः ॥

अनुशतिकपरस्त्रीसर्वलोकासिहत्याः
कुरुकतशतकुम्भागारवेणुस्यहत्याः ।
अनुरहदनुहोडावस्यहेतीहलोकाव्
अभिगमपरलोकौ सर्वभूमिप्रयोगौ[८] ॥ १६४ ॥

---

१ A. om. śloka and comment.

२ सुकरपद्मा E.; सूकरपद्मी D.; कुसुमी D. E.; सूकरसङ्घाकुथुमा C.; सूकरसङ्घाकुथुमी° F.

३ आवभिधेयाया अणप्रत्यय एवाणि अन्याजादेर्लुकमि° D.; P. vi. 4, 171.

४ Thus MSS.; तैतिखिन् । तैतिख P. vi. 4, 144 V. and Kâś. V.; cf. śl. 229 (तितिखस्य तैतिखस्य तैतिखायनः).

५ शैषंडाः B.; शैषंडा C.

६ सौकरसङ्घाः C.; सौकरसङ्घाः F.; शौकरपद्माः D.

७ कौसुमाः D.

८ A. om. śloka and comment.

Digitized by Google

परस्य चानुप्रतिकादीनामित्यनेनानुप्रतिकादीनामेव शब्दानां परपदस्य पूर्वपदस्याचामादेरचः स्थानेऽणादौ ञ्णिति पर आरैज् भवति ॥ * ॥ प्रतेन क्रीतः । प्रतिकः । अनुगतः प्रतिकेन । अनुप्रतिकः । तस्येदम् । आनुप्रातिकम् ॥ * ॥ परस्य स्त्री । परस्त्री । तस्या अपत्यम् । पारस्त्रैणेयः ॥ * ॥ सर्वलोके विदितः । सार्वलौकिकः[1] । यथा भट्टिकाव्ये । भवन्तं कार्तवीर्यो यो हीनसंधिमचीकरत् ।

जिगाय तस्य हन्तारं स रामः सार्वलौकिकम्[2] ॥ * ॥

असिहत्यायां[3] भवम् । आसिहात्यम् ॥ * ॥ कुरुकतस्यापत्यम् । कौरुकात्यः ॥ * ॥ प्रतकुम्भो नाम पर्वतः । तत्र भवं प्रातकौम्भं सुवर्णम् ॥ केचिच्चादृष्टव्याकरणा लक्ष्यमेव केवलमनुसरन्तः प्रातकुम्भमित्याहुः । अत एव भोजः प्रतकुम्भस्य विकारः प्रातकौम्भमित्याह[4] ॥ * ॥ अगारवेणूनामिदम् । आगारवैणवम् ॥ वामनस्त्वङ्गारवेणोरपत्यम् आङ्गारवैणवमित्याह[5] ॥ अधेनुशब्दमपि केचित्पठन्ति[6] ॥ * ॥ असहत्याशब्दोऽस्मिन्नस्तीति विमुक्तादित्वादण् । आसहात्यः ॥ भोजस्त्वसहत्यशब्दं[7] पठति । असिहत्य इत्यन्यः[8] ॥ * ॥ अनुरहतो[9]ऽपत्यम् ।

---

१ °विदितं °लौकिकं D.

२ Bhaṭṭik. v. 33.

३ Thus also Yajñ. Kâṣ., V. MS. β.; असिहत्य Bö., Kâṣ. V. ed., MS. α.; cf. note ८.

४ श्रीभोजः °प्रातकुंभमित्याह D.; प्रातकुंभस्य° प्रातकौंभमित्याह B. C. F.

५ Thus Kâṣ. V. ed., MS. β.; Bö. & (अङ्गारवेणुर्वैणवजातिविशेषः । आङ्गारवैणवं पात्रविशेषः) Yajñeśv.; अगार° Kâṣ. V. α.; °अगरवेणोर° आगरवैणव° D.; अगारधेनोर° आगारधेनव° (°धेनव C.) B. C. F.

६ ? Thus B. C. F.; अधेणु° D.—केचित्तु अगारधेनुशब्दमचाधीयाना अगारधेनोरपत्यमागारधेनवो वत्स इत्याहुः । Yajñ., probably right. He does not notice our author's reading.

७ श्रीभोज°D.; भोजस्त्वसहशब्दं F. Yajñ. has both; Bö., Kâṣ. V. ed. α. °हत्य, β. हत्या.

८ अभिहत्य° F.; om. D.; cf. n. ३.

९ Thus MSS. here and *bâhvâdi* śl. 204. The other works read अनुहरत्. Cf. आनुराहति *taulvalyâdi*, śl. 173.

Digitized by Google

आनुराहृतिः ॥ * ॥ अनुहोडः प्रकटविशेषः । तेन चरति । आनुहौडिकः ॥ * ॥ अस्महेतिः प्रहरणमस्य । आस्महैतिकः । गणपाठसामर्थ्यात्पदसमुदायादपि ठण् विभक्तेश्चालुक्[1] ॥ अस्महेत्येति केचित्[2] ॥ * ॥ इहलोके भवम् । ऐहलौकिकम् ॥ अयं लोकः[3] । इहलोकः । प्रथमान्तादपि इहप्रत्ययोऽस्मादेव गणपाठाद् व्यधिकरणसमासो वा[4] ॥ * ॥ अभिगममर्हति । आभिगामिकः[5] ॥ * ॥ परलोके भवम् । पारलौकिकम् ॥ * ॥ सर्वभूम्यां विदितः । सार्वभौमः ॥ * ॥ प्रयोगमर्हति प्रयोगे भवं वा । प्रायौगिकम्[6] । वामनस्तु संयोगं प्रायौगिकमित्याह[7] ॥ १६४ ॥

सुखशयनसर्वपुरुषावनुसंवत्सरयुतानुसंवरणम्[8] ।
सूचनडचतुर्विद्याकुरुपञ्चालाधिदेवाश्च ॥ १६५ ॥

सुखशयनं पृच्छन्ति । सौखशायनिकाः । यथा ।

भ्रमादीननुवृत्तं सौखशायनिकानृषीन्[9] ॥

सर्वपुरुषाणामिदम् । सार्वपौरुषम् ॥ * ॥ अनुसंवत्सरं दीयते । आनुसांवत्सरिकम् ॥ कालात्कार्यं च भववदित्यतिदेशात् कथाकालाट्ठञिति ठञ्[10] ॥ * ॥ अनुसंवरणेन दीयते । आनुसांवरणम्[11] । व्युष्टा-

---

१ °पि न । विभ° D.; °च लुक्° C.

२ ? Thus B. C. F.; D. om. from अस्महे°. Not mentioned by Yajñ. either.

३ अयलोक D.

४ इहप्रत्यये °समासोऽभीष्टः । F.

५ °अर्हति° वा: D.; आभिगामिकं C.

६ प्रायोगिकं D. F.

७ ? सांयोगप्रायोगिक° B.; संयोगात्प्रायोगिक° D.; सांयोगप्रायोगिक° F.—Kâś. V. has सर्वभूमेर्निमित्तं (सर्वभूमेः *a.*) संयोग उत्पातो वा सार्वभौमः । प्रयोग । तत्र भवः प्रायौगिकः (प्रायोगिकः ! ed.).

८ °संचरणं E. F.; °युताचसचरणं D.; °वरणी C.; A. om. śl. & comment.

९ Raghuv. 10, 14.

१० कालात्कार्यं° कथाकालाट्ठञिति ठञ् D.; कंथाकालाट्ठञिति ठन् B.

११ अनुसंचरणं दीयते आनुसांचरणं C. D. (also *var. r.* with Bö.); not mentioned in the gaṇa *vyushṭâdi* śl. 364.

Digitized by Google

दित्वादण् ॥ * ॥ सूचप्रधानो नडः । सूचनडः । तस्यापत्यं सौचनाडिः ॥ कश्चित् सूचनट[1] इत्याह ॥ * ॥ चतस्र एव विद्याः । चातुर्वैद्यम् ॥ * ॥ कुरवश्च पञ्चालाश्च तेषु भवः । कौरुपाञ्चालः । बहुत्व इत्यनेनाकञ् न भवति तत्र देशव्यक्तेर्विवक्षितत्वात् । अत्र तु देशसमुदायः ॥ * ॥ देवमधिकृत्य भवम् । आधिदैविकं दुःखम् ॥ १६५ ॥

बध्योगोदकशुद्धी[2] पुष्करसत्संक्रमाधिभूताः स्युः ।
प्रतिभूरजातशत्रुः परिमण्डलराजपुरुषौ च ॥ १६६ ॥

बध्योगस्य[3] ऋषेरपत्यं विदादित्वादण्णि । बाध्योगः ॥ * ॥ उदक-शुद्धस्यापत्यम् । औदकशौद्धिः ॥ * ॥ पुष्करसदोऽपत्यम् । पौष्कर-सादिः ॥ * ॥ संक्रममर्हन्ति । सांक्रामिकाः ।

तिलास्त्वम्यकसंपर्कात्प्राप्नुवन्त्यधिवासताम् ।
रसो न भक्ष्यस्तद्गन्धः सर्वे सांक्रामिका गुणाः[4] ॥

यथा वाऽनर्घ्यराघवे ।[5] कश्चित्सांक्रामिकोऽपि विशेषो नैसर्गिकमतिशेते ॥ * ॥ अधिभूते भवम् । आधिभौतिकं सुखम् ॥ * ॥ प्रतिभुवो भावः कर्म वा । प्रातिभाव्यम् ॥ * ॥ अजातशत्रोरियम् । आजातशात्रवी । यथा ।

उपेयिवांसि कर्तारः पुरमाजातशात्रवीम्[6] ॥ * ॥

परिमण्डलस्य भावः कर्म वा । पारिमाण्डल्यम् ॥ * ॥ राजपुरुषस्य भावः कर्म वा । राजपौरुष्यम् ॥ १६६ ॥

---

१ Thus D. F.; सूचनेट B. C.; cf. p. 196, l. 18.

२ सुद्धौ E.; A. om. śl. & comment.

३ उं शंभुं गच्छत्यभियाति उगः कंदर्पः । वध्यो नियाह्य उगो येन स वध्योगो नामर्षिः Yajñ.

४ Kâm. Nît. 5, 7; Bh. Spr. 2562 (°चम्पकसंश्लेषात्°); रसो गुभच° D.

५ D. omit from यथा. — Anargh., Calc. Ś. 1782, p. 36 (क्वचित्सा° ed.).

६ Śiś. 2, 114 (पुरीमाजात° ed.).

Digitized by Google

एषोऽपि स्यात्सर्ववेदः सहाय्यो
द्वारस्वःश्वोध्वल्कसस्वस्तयः स्वः ।
स्वयामश्वस्वादुमृद्द्वारपालाः
श्वादंष्ट्रा स्वाध्याययुक्तः स्वरश्च[1] ॥ १६७ ॥

एषोऽपीति न केवलं प्रतिभूपरिमण्डलराजपुरुषशब्दा ण्डन्ता एवाच गणे द्रष्टव्याः । सर्ववेदशब्दोऽपीति । सहश्च इति णटा खेन च[2] सह वर्तत इत्यर्थः ॥ सर्ववेदा एव । सार्ववेद्यम् ॥ ण इति किम् । प्रातिभवम् । पारिमण्डलम् । राजपुरुषायणिः । सार्ववेदिकम्[3] ॥ * ॥ आकृतिगणश्चायम् । तेन वैतुलौकं[4] मानैषादिरित्यादयो भवन्ति[5] ॥ * ॥ इत्यनुश्वतिकादिः ॥

द्वार इति द्वारादेरित्यनेन द्वारादीनां शब्दानां यकारवकाराभ्यामुत्तरस्याचामादेरचः[6] स्थान आरैज् न भवति[7]। तयोस्तु ध्वोष्टैज् भवति[8] ॥ * ॥ द्वारे नियुक्तः । दौवारिकः ॥ * ॥ स्वर्भवः । सौवः ॥ * ॥ श्वो भवम् । शौवस्तिकम् ॥ * ॥ व्यल्कसेऽत्यन्ताधमभच्ये[9] भवः । वैयल्कसो व्याधिः[10] । यदा । व्यल्कसो नाम देशो ग्रामादिर्वा[11] ॥ * ॥ स्वस्तीत्याह । सौवस्तिकः ॥ * ॥ स्वस्येदम् । सौवम् ॥ * ॥ स्वयामे भवः ।

---

१ A. om. text and comment.

२ सहा खेन A. D.; D. corr. खेन वा; C. om. सर्ववेदशब्दो to सर्ववेदा एव and च इति किं.

३ राजपुरुषायंटिः D.; सार्ववेदिकं C. D.; सार्ववैदिकः F.

४ Thus C. F.; वैतुलौकं B.; वैतुलौकमाजिषादि° D. [? वैतलौकम or वैतुलौकम].

५ Cf. śl. 312 comm. where ऊर्ध्वदम and ऊर्ध्वदेह are mentioned as being referred to this *gaṇa* by some.

६ यकारवकाराभ्या° B.; यकारवकारा° C.; °भ्यां मुखस्याचामादेरचः D.

७ आरैश्च भवति B.; स्थाने रैष्ट भ° C.; आरैश्च भवति D.; F. om. न.

८ ओष्टौच् भ° C.; स्थाने ऽष्टौनृभिवति B.

९ अत्यंता° B.; °भच्ये D.; °स्थे C.; अत्यंताऽधमभच्ये F.

१० व्याधः F.

११ वैयल्कासो° ग्रामादिश्च D.

Digitized by Google

सौवग्रामिकः ॥ * ॥ शुनो विकारः । शौवनं मांसम् । शौवः[1] संकोचः ॥ * ॥ स्वादुमृद हृदम्[2] । सौवादुमृदम् । कच्छादिदर्शनादण् ॥ स्वादौ चार्यौ मृच्च यास्मिन्देशेऽस्तीति । सौवादुमृदो देशः ॥ पाणिन्यादयस्तु सौवादुमृदवमित्याहुः ॥ * ॥ द्वारपालस्यापत्यम् । दौवारपालिः ॥ केचिद् द्वारपालशब्दं रेवत्यादिष्वधीयाना दौवारपालिक[3] इत्युदाहरन्ति ॥ * ॥ श्वादंष्ट्रायां भवः । शौवादंष्ट्रो मणिः । शुनो दन्तादाविति[4] दीर्घत्वम् ॥ * ॥ स्वाध्यायेन चरति । सौवाध्यायिकः ॥ * ॥ स्वरमधिकृत्य कृतो ग्रन्थः । सौवरः ॥ * ॥ द्वारपालादीनामुपादानं सुखार्थम् । यतो द्वारादेः केवलस्य तदादेश्च परिग्रहः[5] ॥ आकृतिगणोऽयम् । तेन स्फ्यो यज्ञायुधं तेन कृतः । स्फैयकृतो नामर्षिः । स्फ्यकृदित्यपि संगृहीतः[6] ॥ १६७ ॥ इति द्वारादिः ॥

स्वागतस्वध्वरव्यङ्ग्या व्यवहारो व्यडस्तथा[7] ।
व्यायामस्वपतिस्वङ्गस्वजनाश्चाच कीर्तिताः ॥ १६८ ॥

पदान्तयोः स्वागतादेष्टेच[8] इत्यनेन स्वागतादिशब्दानां टेरागमो न भवति[9] ॥ * ॥ स्वागतमित्याह । स्वागतिकः ॥ * ॥ शोभनो

---

१ शुन इदं शौवनम्° । शुनो विकारो मांसं सौवम् Kâś. V.; शुन इदं शौवनं पुच्छं शौवनः संकोचः । Yajñ.

२ स्वादुमृदु हृदं C.; not in *kachchhâdi* śl. 327-8.—The other works have स्वादुमृदु; Yajñeśv. also mentions Vardhamâna's reading.

३ दौवारपालक B.

४ दंतावाद्याविति B. C. F.; cf. Kâś. V. vi. 3, 137.

५ तदादेश्च C.; परिग्रहात् D.

६ स्फो° स्फाकृतो° स्फाकृद्° B. C.; स्फ्यकृतो गाम° F.; D. om. from आकृतिगणो.—Bö. has both readings; Yajñ., Kâś. V. only स्फ्यकृत.

७ स्वागतः स्वध्वरो व्यंग्यव्यवहारी [रो C.] B. C. F.; A. om. text and comm.

८ स्वागतोदेष्टेच C.; स्वागतादेर्द्वष्टेच् F.; स्वागतादेर्घष्टेर्वित्व° D.

९ आगमो D.; शब्दानां नैत्यागतादिशब्दानां नैत्यागमो° C.

Digitized by Google

ऽध्वरः खध्वरः। खध्वरेण चरति। खाध्वरिकः॥ * ॥ व्यङ्गान्यङ्गानि[1] यस्यासौ व्यङ्गः। व्यङ्गस्यापत्यं व्याङ्गिः॥ * ॥ व्यवहारेण चरति। व्यावहारिकः॥ * ॥ व्यङो नामर्षिः। तस्यापत्यं व्याङिः॥ * ॥ व्यायामः प्रयोजनमस्य। व्यायामिकः॥ * ॥ खपतौ साधुः। खापतेयः॥ * ॥ खञ्जस्यापत्यं खाञ्जिः॥ * ॥ खञ्जनात्प्रयोजनमस्य[2]। खाञ्जनिकः॥ * ॥ येषां टेलोपो न दृश्यते तेऽत्र द्रष्टव्याः[3]॥ १६८॥ इति खागतादिः॥

पैलौदञ्ची राहवी रावणिश्च
दैवस्थानी राणिराहक्षितौ च[4]।
औदभृज्जिः[5] सात्यकिश्चौदमेघिः
सात्यंकामिः पैङ्गलोदायनिश्च[6]॥ १६९॥

पैलाद्यविप्रतीत्वस्यादिरित्यनेन[7] पैलादेर्विहितस्यापत्यप्रत्ययस्य लुग्भवति[8]॥ * ॥ पीलाया अपत्यं पैलः। पीलामण्डूकादेत्यण्[9]। पैलस्यापत्यमिति द्व्योऽण इति फिञ् तस्य लुक्[10]। पैलः पिता। पैलः पुत्रः॥ * ॥ उदश्वो[11]ऽपत्यम्। बाह्वादित्वादिञ्। औदञ्चिः पिता। औदञ्चिः पुत्रः[12]॥ * ॥ राहोरपत्यम्। राहविः पिता। राहविः पुत्रः॥ * ॥ रवणस्यापत्यम्। रावणिः पिता। रावणिः पुत्रः॥ * ॥

---

१ विगतान्यंगानि D.

२ खजनाः प्रयोजन° F.

३ येषां टेलोपो° F.; D. om. from खपतौ साधुः.

४ पैलौदची° B. C.; वाहवी D.

५ Note the metrical irregularity in the second syllable; ? औदभज्जिः.

६ पैंगलौदायनिश्च B. C.; A. om. text and comment.

७ पैलाद्यचि° F.; °तीत्वस्यादेरि° D.

८ °पत्यस्यालुग्भवति D.

९ पीलामांडूका° B. C. D.; cf. P. iv. 1, 118-9.

१० पिञ्° B. C.; लुक् D.; cf. P. iv. 1, 156.

११ उदचो D.; उदवो C.; *bdhvddi* śl. 204.

१२ C. twice औदचिः; औदचि D.

Digitized by Google

देवस्थानस्यापत्यम्। दैवस्थानिः पिता। दैवस्थानिः पुत्रः॥ * ॥ रण-स्यापत्यम्। राणिः पिता। राणिः पुत्रः॥ * ॥ रहेण चितो[1] हिं-सितो रहचितः। तस्यापत्यम्। राहचितिः पिता। राहचितिः पुत्रः॥ * ॥ उदके भज्यतीति मूलविभुजादित्वात्के[2]। उदभज्यः। तस्या-पत्यम् औदभज्यिः पिता। औदभज्यिः पुत्रः॥ * ॥ सत्य एव सत्यकः। तस्यापत्यं सात्यकिः पिता। सात्यकिः पुत्रः॥ * ॥ उदमेघस्यापत्यम्। औदमेघिः पिता। औदमेघिः पुत्रः॥ * ॥ सत्ये कामोऽस्य। सत्यं-कामः। अत एव निपातनान्मुक्। सत्यमिति निपातो वा शपथप-र्यायः[3]। तस्यापत्यं सात्यंकामिः पिता। सात्यंकामिः पुत्रः॥ * ॥ पिङ्ग-लोदायनस्यापत्यं[4] पैङ्गलोदायनिः पिता। पैङ्गलोदायनिः पुत्रः[5]॥ शाकटायनस्तु पैङ्गलोदयनिरित्याह[6]॥ १६९॥

शालङ्कौदकशुद्धी भौलिङ्गौदव्रजी तथौदन्यिः[7]।
औन्नाहमानियुक्तौदमज्जिरपि चौज्जिहानिः स्यात्[8]॥१७०॥

शलङ्कोरपत्यम्[9]। शालङ्किः पिता। शालङ्किः पुत्रः॥ * ॥ उद-कशुद्धस्यापत्यम्। औदकशुद्धिः पिता। औदकशुद्धिः पुत्रः॥ औद-शुद्धिरिति भोजः[10]॥ * ॥ भूलिङ्गस्यापत्यम्[11]। भौलिङ्गिः पिता।

---

१ रहचितो° B. C.; रहे चितो° F.

२ Not in that *gaṇa*, śl. 460.

३ सत्यपर्यायः D. and om. to सात्यंकामिः पुत्रः.

४ पिंगलोदायिनस्था° B.; पिंगलो-दायिः तस्याऽपत्यं F.; पिंगलोदायनः तस्यापत्यं° D.; om. C.

५ पैंगलोदायिनिः twice B.

६ ?पैंगलोदायनि° C.; D. corr. पैंग-लोदयोगिरि°; Bö. reads पैङ्गलोदा-यनि.

७ तावोदन्यिः C.; तसौदन्यिः D.; अथौदन्यिः F.

८ युक्तौ औद° B.; युतेदमज्जि° corr. D.; अपि वोज्जिहानिः° E.; A. om. text and comment.

९ शलंकोरपत्यं C.; शलकोर° D.; शालंकोर° F.

१० Thus also Bö., Yajñ., Kâś. V. MSS. (औदवुद्धि ed.); औदसुद्धिरिति भो-जः D. [cf. औदकशौद्धि śl. 166].

११ भुलिंगस्य° MSS. and Yajñ., but see śl. 50 comm.

Digitized by Google

भौखिक्लिः पुचः ॥ * ॥ उद्ब्रजस्यापत्यम् । औद्ब्रजिः पिता । औद्ब्रजिः पुचः ॥ * ॥ उदन्यस्यापत्यम् । औदन्यिः पिता । औदन्यिः पुचः ॥ तिकादिषु पठ्यमानस्याप्यस्यात[1] एव पाठात् फिञ्[2] विज्ञायते तेन रूपद्वयम् । औदन्यिः । औदन्यायनिः ॥ * ॥ उद्गाहमानस्यापत्यम् । औद्गाहमानिः पिता । औद्गाहमानिः पुचः ॥ * ॥ उदमध्यस्यापत्यम् । औदमध्यिः पिता । औदमध्यिः पुचः ॥ * ॥ उध्यिहानस्यापत्यम्[3] । औध्यिहानिः पिता । औध्यिहानिः पुचः ॥ कश्चिद् औध्यहानिरिति[4] मन्यते ॥ * ॥ एभ्य ढ्रञन्तेभ्यः फकः[5] लुक् ॥ १७० ॥ इति पैलादिः ॥

तौल्वलिवैरकिधारणिपौष्पि[6]
बैल्वकिबान्धकिरावणिवैङ्कि[7] ।
आसुरिनैमिषिनैवकियुक्तं[8]
दैवतिवार्कलिवैहतिभिश्च[9] ॥ १७१ ॥

तौल्वलादेः पर्युदासादपत्यस्यापत्यादित्यनेन प्राप्ता लुग्न भवति ॥ * ॥ तुल्वलो नामर्षिः । तस्यापत्यं तौल्वलिः । तदपत्यं तौल्वलायनः ॥ तैल्वलिरित्यन्यः[10] ॥ * ॥ वीरकस्यापत्यम् । वैरकिः पिता । वैरकायणः पुचः[11] ॥ वैणकिरिति शाकटायनः ॥ * ॥ धरणस्यापत्यम् ।

---

१ See §l. 230; विकारादिषु पठ्यमानस्यापत्यं C. and omits thence to उध्यिहानस्यापत्यं.

२ ढ्रञिपि B.; ढ्रञपि F.; ढ्रजपि D.

३ See note १.

४ ? और्वहानिरिति B. C.

५ पाप B.; °भ आ पापे C.; एव D.; °भ एव लुक् । F.; cf. P. ii. 4, 60; iv. 1, 101.

६ °वैरकि° C.; °धारकिपौष्पि F.

७ बोधकिरावणिवैङ्कि C.; °वैकि F.

८ नैचकियुक्तं B. C. F.

९ वाल्कलि° B.; वैहविभिश्च D.; A. om. text and comment.

१० तिल्वलिरित्य° F.; om. D.—? तौल्वलिरित्यन्यः ।

११ चिरकस्य° वैरकिः °चिरकायणः C.—The other works have वैरकि.

Digitized by Google

धारणिः पिता । धारणायनः[1] पुत्रः ॥ * ॥ पुष्पो नाम कश्चित् तस्यापत्यम् । पौष्पिः पिता । पौष्पायणः[2] पुत्रः ॥ * ॥ बिल्वकस्यापत्यम् । बैल्वकिः पिता । बैल्वकायनः पुत्रः ॥ * ॥ बन्धकस्यापत्यम् । बान्धकिः पिता । बान्धकायनः पुत्रः ॥ * ॥ रवणस्यापत्यम् । रावणिः पिता । रावणायनः पुत्रः । शाकटायनस्तु रावणिरित्याह ॥ * ॥ विङ्कस्यापत्यम् । वैङ्किः पिता । वैङ्कायनः पुत्रः[3] ॥ * ॥ न सुरोऽसुरः । तस्यापत्यम् । आसुरिः पिता । आसुरायणः पुत्रः ॥ * ॥ निमिषस्यापत्यम् । नैमिषिः पिता । नैमिषायणः पुत्रः ॥ नैमिशिरिति शाकटायनः ॥ * ॥ निवकस्यापत्यम् । नैवकिः पिता । नैवकायनः[4] पुत्रः ॥ * ॥ दैवतस्यापत्यम् । दैवतिः पिता । दैवतायनः पुत्रः ॥ दैवोतिरिति[5] शाकटायनः ॥ * ॥ वृकलाया अपत्यम् । वार्कलिः पिता । वार्कलायनः पुत्रः[6] ॥

दोधकं छन्दः । भौ तु भगौ गिति दोधकमेतत् ॥ १७१ ॥

पौष्करसादिवैकर्ण्याहिंसिकारेणुपालयः[7] ।
आसिबन्धकिवैशीतिदैवयज्ञासिनासयः[8] ॥ १७२ ॥

पुष्करसदोऽपत्यम् । पौष्करसादिः पिता । पौष्करसादायनः पुत्रः ॥ * ॥ विभूषितौ कर्णौ यस्य । विकर्णः । तस्यापत्यम् । वैकर्णिः पिता । वैकर्णायनः पुत्रः ॥ * ॥ न विद्यते हिंसाऽस्य । अहिंसः । तस्या-

---

१ धारणायनिः B. C.

२ पौष्पायनः MSS.

३ °विकस्यापत्यं वैकिः° वैकायनः° F.; Kâś. V. ii. 4, 61 वैकि ed., वैंकि MS. *a*, Yajñ.; वैङ्कि (*var. l.* वैकि) Bö.

४ निवकस्य° नैवकिः° नैव° B.C.F.; नैवकि (*var. l.* नैवति) Bö., नैवकि Yajñ.; wanting in Kâś. V.

५ Thus MSS.? दैवतिः (पुत्रः) इति शाकटायनः ।

६ None of the MSS. explain वैहति. Yajñ. has विहतस्य वेहतिर्वैहतायनः ।

७ पुष्करसादि° B. C. F.

८ वैसीति° B. C.; वैकर्णा° दैवयज्ञासिनासयः D.; A. omits text and comment.

Digitized by Google

पत्यम्। आङ्गिंसिः पिता। आङ्गिंसायनः पुत्रः॥ * ॥ करेणुं पालयतीति करेणुपालः। तस्यापत्यम्। कारेणुपालिः पिता। कारेणुपालायनः पुत्रः॥ * ॥ असिना युक्तो बन्धः। असिबन्धः। असिबन्ध एवासिबन्धकः। तस्यापत्यम्। आसिबन्धकिः पिता। आसिबन्धकायनः पुत्रः[1]॥ अस्यतीति। असः। तस्यापत्यम्। आसिः पिता। आसायनः पुत्रः॥ बध्यते स्म। बद्धुः। बद्धु एव बद्धुकः। तस्यापत्यम्। बाद्धुकिः पिता। बाद्धुकायनः पुत्र[2] इति शाकटायनः॥ * ॥ विश्रीतस्यापत्यम्। वैश्रीतिः पिता। वैश्रीतायनः पुत्रः॥ * ॥ देवानां यज्ञो देवयज्ञः। तस्यापत्यम्। दैवयज्ञिः पिता। दैवयज्ञायनः पुत्रः॥ * ॥ असिरिव नासाऽस्येति। असिनासः। तस्यापत्यम्। आसिनासिः पिता। आसिनासायनः पुत्रः॥ १७२॥

दालीपिरानुतिश्च प्रादोहन्यानुराहती चापि[3]।
चाफट्टकिनैमिश्रिप्राडाहतिदैवमतयोऽपि[4]॥ १७३॥

दलीपस्यापत्यम्। दालीपिः पिता। दालीपायनः पुत्रः। निपातनादात्वम्[5]॥ अपरे दलीप इति प्रकृत्यन्तरमाहुः। चक्रादयस्तु दैलीपिरित्याहुः[6]॥ * ॥ आनुतिः पिता। आनुतायनः[7] पुत्रः॥ * ॥ प्रदोहनस्यापत्यम्। प्रादोहनिः पिता। प्रादोहनायनः पुत्रः॥ * ॥

---

१ असिबंधपचासिबंधकस्य C.; असिबंध एवासिबधः आसिबांधकिः आसिबांधायनः D.; B. om. from कारेणुपालिः to असः तस्यापत्यं.

२ बद्ध एवबद्धकः बाधकिः बाधकायनः D.

३ आतुति आतुराहती C.; नुरोहती चापि E.

४ चफट्टकि देवमतयोपि C.; नैमि F.; नैमिश्री D.; A. om. text and comment.

५ निपातनाद्दीर्घं D. and omits अपरे प्रकृत्यन्तरमाहुः।

६ Thus also Bö., Yajñ., Kâś. V.; अपरे दलीपा इति F., om. from चक्रादयः.

७ आतुतिः आतुतायनः C.

Digitized by Google

अनुरहतोऽपत्यम् । आनुराहतिः[1] पिता । आनुराहतायनः पुत्रः ॥ * ॥ चफट्टकशब्दोऽनुकरणम् । तदुच्चारणात्पुरुषोऽपि चफट्टकः । तस्यापत्यम् । चाफट्टकिः पिता । चाफट्टकायनः पुत्रः[2] ॥ कुर्वादावस्य चत्रियस्य ग्रहणम् । दृष्ट तु ब्राह्मणवाचिनस्तेनेञ् सिद्धः[3] ॥ * ॥ निश्चयेन मिश्रो निमिश्रः । तस्यापत्यम् । नैमिश्रिः पिता । नैमिश्रायणः पुत्रः ॥ * ॥ पृच्छत्यादिभ्यश्च । प्राडाहतः[4] । तस्यापत्यम् । प्राडाहतिः पिता । प्राडाहतायनः पुत्रः ॥ प्राटाहतिरित्यपि वामनः[5] ॥ * ॥ देवमतस्यापत्यम् । दैवमतिः पिता । दैवमतायनः पुत्रः ॥ १७३ ॥ इति तौल्वल्यादिः ॥

प्रज्ञश्चोचपिशाचचोरमरुतो रक्षश्चरिचोशिजः
प्रत्यक्षासुरशत्रुसंतपनसत्साधारणानुष्टुभः ।
चण्डालाशनिगोरजेतृजगतीसत्वद्धितादेवताश्[6]
चक्षुर्ष्याकृतबन्धुयोधमधवो विद्यामनोजुह्वतः ॥ १७४ ॥

प्रज्ञादेरणित्यनेन प्रज्ञादेः शब्दगणादण् वा भवति स्वार्थे[7] ॥ * ॥ प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री ॥ प्रज्ञाऽऽद्योत्लेत्यादिना णप्रत्यये[8] सिद्धम् ।

---

१ Kâś. V. ii. 4, 61 आनुहारति (!) ed., °राहति MSS.; Bö., Yajñ. आनुराहति (Bö. *var. l.* आनुहारति), and besides आनुरोहति.

२ Thus also Bö., Yajñ. (? चाफल्कि Kâś. V. ed.); चफट्टक° चफट्टक° चाफट्टकिः° चाफट्टकायनः° C.

३ B. C. om. from कुर्वादावस्य.

४ ? Thus D.; प्राडाहतिः B. C. F.

५ ? प्राडाहति° B.; प्राडाहति° C.; om. D.—Bö., Yajñ. have only प्राडाहतिः; Kâś. V. ed. प्रावाहणि (प्राणाहति MS. *a.* and *var. l.* ed.; om. MS. *β.*; Prof. Kielhorn's MS., perhaps right, प्राडाहनि).

६ शश्वद् for सत्वद् F.; A. om. text and comment.

७ प्रज्ञादिशब्दगणात्° D.

८ प्रज्ञायोत्ले° B. C.; °ज्योत्लोत्यादिनाण्प्रत्यये D.; °त्प्रत्यये F.; cf. P. v. 2, 101 प्रज्ञाश्रद्धार्चाभ्यो णः ।

Digitized by Google

प्राज्ञः । प्राज्ञी तु न सिध्यति । णप्रत्यये हि प्राज्ञा स्यात् । अर्थभेदश्च । तथा च । वृद्धा पल्लिकी प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती[1] ॥ * ॥ औचमेव औचम् । तं कूजत्कौञ्चसंघुष्टचाटुघओचमानसः[2] ॥ वामनाद्यास्तु औचं शरीरं चेदित्यर्थनियममाहुः[3] ॥ * ॥ पिशाच एव पैशाचः ॥ * ॥ एवं चौरः ॥ * ॥ मारुतो देवो वायुश्च[4] ॥ * ॥ राक्षसः ॥ * ॥ चरित्रमेव चारित्रम् ॥ * ॥ उग्रिक् कान्तः । स एव । औग्रिजः[5] । यथा । क्षीर्णसांतपनैर्वैद्यवेदतैर्जौञ्छतैर्हृतम्[6] ।

कार्ष्णाजिनौग्रिजैर्विप्रैः प्रात्यक्षमिव दैवतम्[7] ॥

प्रत्यक्षा एव प्रात्यक्षाः । पदार्थाः[8] ॥ * ॥ असुर एव । आसुरः ॥ * ॥ शत्रुरेव शात्रवः ॥ * ॥ संतपनमेव सांतपनम् ॥ * ॥ सन्नेव सान्तः । अण्प्रत्ययसंनियोगेन निपातनान्मुगागमः[9] ॥ * ॥ साधारणी साधारणा वा भूमिः ॥ * ॥ अनुष्टुबेव । आनुष्टुभम् ॥ केचिद् आनुष्टुभादीनां[10] छन्दोनाम्नां पुंस्त्रिकृतामाहुः ॥ * ॥ चण्डम् उग्रकर्म अश्नुते[11] पर्याप्नोति । चण्डालः । स एव चाण्डालः । तथा च ।

चण्डालश्वपचावन्त्येवासिचाण्डालपुक्कसाः[12] ॥

---

१ Am. K. 2, 6, 1, 12.

२ Thus D. F.; कूजात्कौंचं संहृष्य-चाटुघ° B. C.; चाटुघं ओच° B.; चाटुघं ओच° C.

३ °हृत्यर्थः नियम° B. C.; Kâś. V. v. 4, 38.

४ मारुता देवा वायुश्च B. C.

५ उग्रिकः कांतः° B. C.; उग्रिक् औग्रिजः D.

६ ? °वैद्यवेदातेर्जौञ्छभैर्वृतं B.; °वैद्यं वेदांतेर्जौञ्छतिर्वृतं C.; वैद्यवेदातिर्जौञ्छतैर्वृतं F.; °संतापवैद्यवेदैतैर्जौञ्छतैर्वृतं D.

७ कार्ष्णाज्जिनौ° D.; °जिनौग्रिवै° B. C. D.; °जिनौग्रिकैर्विप्रैः° F.; प्रत्यक्ष° D.

८ प्रत्यक्षा एव प्रत्येषाः° C.; D. om. एव प्रात्यक्षाः.

९ अणुप्रत्यय° मुगागमः B. C.

१० अनुष्टुभादीनां MSS.

११ चंडमुग्रं कर्म आश्नुते F.

१२ पुक्कसाः B. D.; पुक्कसाः C.; पुष्कसाः F.; the verse is Am. K. 2, 10, 20.

Digitized by Google

अग्रनिरेव । आग्रनः । वज्रम् ॥ * ॥ गोर एव गौरः । सितः पीतो ऽरुणश्च वर्णः ॥ * ॥ जेत्रेव[1] । जैत्रं धनुः । जैत्री शरश्रेणिः[1] ॥ * ॥ जगत्येव जागतम् ॥ * ॥ सत्वानेव सात्वतः[2] । चक्रस्तु सत्वन्निति नान्तं ज्ञातलोपं[3] पठन् सत्वानेव सात्वन इत्याह ॥ * ॥ द्वयोर्भावो द्वित्वा । द्वित्वेव द्वैतम् । यथा ।

निदानं निर्दैतं प्रियजनसदृक्षं व्यवसितिः[4] ॥

देवतेव दैवतम् ॥ * ॥ चक्षुरेव चाक्षुषम् ॥ * ॥ व्याकृतमेव वैयाकृतम् ॥ * ॥ बन्धुरेव बान्धवः । स्त्रियामण्लक्षासामर्थ्यान्न वृत्तिः[5] । गुरुबुप्रकृतिस्तु वर्तत एव । यथा । बन्धुरियं ब्राह्मणी[6] । एवं सर्वत्र ॥ * ॥ योध एव यौधः ॥ * ॥ मधुरेव माधवः ॥ * ॥ विद्येव वैद्यम्[7] । नपुंसकत्वमेव ॥ कश्चिद् विद्यासंबन्धात्पुरुषोऽपि विद्या । स एव वैद्य इत्याह ॥ * ॥ मन एव मानसम् ॥ * ॥ जुङ्कदेव जौङ्कतः ॥ १७४ ॥

निगमवणिजौ गन्धर्वश्चायहायणषोडतौ
प्रकृतविदतौ कुङ् रक्षोघ्नो विघातचिकीर्षितौ[8] ।
ततवसुकरागीध्रं विश्वानरो वरिवस्कृतो[9]
ऽनुषुकविकृते विद्वानुष्णिक् चरश्च कुतूहलम्[10] ॥ १७५ ॥

नितरां गम्यन्ते पदार्था अनेनेति निगमः । निगम एव नैगमः । नयः ॥ * ॥ वणिगेव वाणिजः । वाणिजी स्त्री ।

---

१ जेतेव० शरश्रेणी F.
२ शश्वदेव शाश्वतः F.
३ सत्विति तांतं० F.; ज्ञात्वा तलोपं C.
४ °अनसुङ्कुव्यवसितिः D.; °सदृक्षव्य० F.; °सदृक्षव्यवसितिः B. C.
५ °अर्थतस्य सामर्थ्यान्न० D.; न प्रवृत्तिः F.
६ वर्तमान एव यथा० D.; ब्राह्मणी C. D.
७ विद्यं B.
८ प्रकृतविदितौ E. and a. m. D.; प्रकृतविद्कुंच रक्षो० C.
९ वरिवष्कृतो B. C. D. F.
१० नुषुकवि० C.; वरश्च० F.; A. om. text and comment.

Digitized by Google

यक्षेते व्याधवार्केणसंकुले वित्तवत्तमाः ।
राजावपि महारण्ये वञ्चं वञ्चन्ति वाणिजाः[1] ॥

गन्तव्यं गच्छन्तीत्यर्थः ॥ * ॥ गन्धर्व एव गान्धर्वः ॥ * ॥ अयद्दायण एव । आयद्दायणः । मार्गशीर्षः ॥ * ॥ षोडन्नेव षौडतः ॥ * ॥ प्रज्ञतमेव प्राज्ञतम् ॥ * ॥ विद्दन्नेव वैद्दतः । विद्वान् ॥ * ॥ क्रुङ्नेव[2] क्रौञ्चः ॥ * ॥ रक्षांसि हन्तीति रक्षोघ्नः । रक्षोघ्न एव राक्षोघ्नः ॥ * ॥ विद्दननं[3] विघातः । विघात एव वैघातः ॥ * ॥ चिकीर्षितमेव चैकीर्षितम् । चिकीर्षन्नेव चैकीर्षत इति भोजः[4] ॥

दृष्टषौडतमैधावसाधुसाधारणह्रदये[5] ।
लङ्क्ष्येशयौधा ये चास्मै हितास्तैकीर्षितक्रियाः[6] ॥

तनोति कुलम् । ततः । तत एव तातः । जनकः ॥ * ॥ वसुरेव वासवः । सुरपतिः ॥ * ॥ कर एव कारः । राजदेयो भागः ॥ * ॥ अग्निमिन्धे । अग्नीत् । तस्य अरण्यम् आग्नीध्रम् । ततोऽपि प्रत्यये । आग्नीध्री शाला । आग्नीध्रा वा शाला[7] ॥ * ॥ विश्वानर एव वैश्वानरः ॥ * ॥ वरिवस्कृत एव वारिवस्कृतः[8] ॥ * ॥ अनुषुवतीत्यनुषूः । तं कायतीत्यनुषुकः । के ऽम्बेति ह्रस्वले[9] । अनुषुक एव । आनुषुकः ॥ * ॥ विद्वतमेव वैद्वतम् । विद्वतिरेव वैद्वतमिति नन्दी ॥

---

१ यक्षेते° महारण्ये वंचंति वा° C.; चंवं वर्चति° B.; °रण्ये ह्रवठंचंति° F.

२ वेद्दतः विद्वान् । क्रुंचेव C.

३ विद्दनं B. and orig. D.

४ चैकीर्ष इति° B. C. F.; चैकीषत इति श्रीभोजः D.

५ °मेधाव° D. F.; साध्यारण्य° D.

६ यौधायेवाक्षी° F.; यौधायेवाक्षे हितास्तैकीर्षिती क्रिया D.; चास्मि° C.

७ आग्नीध्र° आग्नीधी° आग्नीध्रा° B. F.; आग्नीध्रा° आग्नीध्रा° C.

८ वरिवस्कृत° वारिवस्कृतः MSS.; Vâj. S. 16, 19.

९ ? के अम्बा इति° D.; के रक्षे इति° B. C.; के व इति ह्रस्वः F. [? P. vii. 4, 13]; cf. vârtt. P. v. 4, 36, where eds. and ed. Kâś. V. read आनुषुक (MS. β. आनुषुक, α. आनुसूपक).

Digitized by Google

पच्छो वैयाक्षतेः सूत्रैर्जागतानुष्टुभौष्णिहैः[1]।
राक्षसासुरपैशाचवैक्षतानां निवर्तकम्[2] ॥
विद्वानेव वैदुषः ॥ * ॥ उष्णिगेव। औष्णिहम् ॥ * ॥ चर एव चारः[3] ॥ * ॥
कुत्सितश्चासौ कौत्सितश्च ॥ १७५ ॥

नन्दामात्यडहालसंप्रतिवजाः कर्षापणचिष्टुभौ
गायत्रीरवणोपचेयककुदैकाग्र्याटरूषास्तथा[4]।
संनाय्याययणौ विधेयकुतुकागारद्विदत्पङ्क्त्यः[5]
सत्वन्तुप्रतिभावियातसहसा वार्त्ता विदन्तोऽपि च ॥ १७६ ॥

नन्दति वृद्धिं यातीति नन्दा। नन्दैव नान्दी[6] ॥ * ॥ अमात्य एव।
आमात्यः ॥ * ॥ डहाल एव डाहालः ॥ * ॥ संप्रत्येव सांप्रतम् ॥ * ॥
वजतीति वजः। स एव वाजः ॥ * ॥ कर्षापण एव कार्षापणः ॥ * ॥
चिष्टुबेव चैष्टुभम् ॥ * ॥ गायत्र्येव गायत्रम्। छन्दसां पूर्वम्[7] ॥ * ॥
रवण एव रावणः ॥ * ॥ उपचेय एव। औपचेयः[8] ॥ * ॥ ककुदमेव
काकुदम्। शब्दशक्तिस्वाभाव्यात्स्वार्थिकाण्प्रत्ययान्तस्यापि काकुद-
शब्दस्यार्थभेदो द्रष्टव्यः ॥ * ॥ एकमग्र्यं पुरोगतं ध्येयमस्य[9]। एकाग्र्यः।
स एव। ऐकाग्र्यः। अनन्यवृत्तिः ॥ * ॥ अटन् रूषतीति[10]। अटरूषः।
स एव। आटरूषः सिंहास्यः। यथा।

---

१ प्रच्छो वैया° D.; पच्छी वैयाक्षतेः सूत्रैः जा° C.; यच वैयाक्षतेः° भोष्णिहैः F.

२ निवर्तकः D.—Yajñ. makes this *kārikā* end thus: °वैक्षतानि भवन्ति गो ॥

३ चर एव चारः F.

४ उपचेय MSS.; °अथरूथास्तथा E.

५ °द्विदः पंक्तयः F.; A. om. text and comment.

६ नंदः। नंद एव° B. C. F.; नंदा एव° D.; नांदः F.

७ पूर्वं D.

८ उपचेय एव औपचेयः C. D.

९ धेयमस्य B. C.

१० अटतो रूषतीति F.

Digitized by Google

वासकः सिंहपर्णी च वृषो वासाथ सिंहका[1]।
आटरूषः सिंहमुखो भिषङ्मातादरूषकः[2] ॥

संनाय्यमेव सांनाय्यम् ॥ * ॥ अयण एव[3]। आयणः ॥ चक्षुस्तु। अये ऽयनस्य। अयणम्[4]। राजदन्तादित्वात्प्राङ्निपाते शकन्ध्वादित्वाद्-कारलोपे च। अयणमेव आयणमित्याह ॥ आयायणीत्यन्यः[5] ॥ * ॥ विधेय एव वैधेयो मूर्खः[6] ॥ विधाया भोजनस्यापत्यमिव वैधेय इत्यन्ये[7] ॥ * ॥ कुतुकमेव कौतुकम् ॥ * ॥ अगारमेव। आगारम् ॥ * ॥ दौ दन्तावस्य। द्विदन्। वयसि दन्तस्य दत्[8]। दन्तादेशे। द्विदन्नेव द्वैदन्तो[9] बालः ॥ * ॥ पक्षिरेव पाक्षम्[10] ॥ * ॥ सत्वन्तुरेव सात्वन्तवः[11] ॥ * ॥ प्रतिभैव प्रातिभम्।

प्रातिभं चिरकेण गतानां वक्रवाक्यरचनारमणीयः[12]।
गूढसूचितरहस्यसहास्यः[13] सुभ्रुवां प्रवहते परिहासः ॥

वियात एव वैयातः। धृष्टः ॥ * ॥ सहसैव साहसम्। अविचारकृतं कर्म ॥ अन्यस्तु। साहसं तु दमो दण्डः[14]। सहसि बले भवं साहसमित्याह ॥ * ॥ वार्त्तैव वार्त्तम्। यथा।

---

१ वासिकः MSS.; सिंहपर्णा च वृषो वसो च° C.; वृषा वासा च° B.; वासोच° D.; वृषावसोऽथ सिंहिका F.

२ आडरूपः° C.; सिंहमुखी° D.; भिषङ्मातादरूषः। B. C.

३ अयणमेव D.; आयण एव C.

४ आयणं C.; अयायणं F.—Eds. Pâṇ., Kâś. V. v. 4, 36 vârtt. read आयायण.

५ आयणमेवेति श्रीभोजः। D.

६ विधेयमेव वै D. [om. धेयो मूर्खः].

७ विधेयं भोजनं तस्यापत्यं मिव° C.; D. om. विधाया; इवे वैधेयमित्य° D.

८ Pâṇ. v. 4, 141.

९ द्वैदंतो F.

१० पाक्षः F.; पक्षिरेव पाक्षी D.

११ सत्वतुरेव सात्वतवः D.

१२ Śiśup. 10, 12; चक्रवाकरचना° B. C.

१३ °सहासः MSS.; see same passage on śl. 179.

१४ B. C. om. from अन्यस्तु [Am. K. ii. 8, 1, 21]; F. om. from साहसं.

Digitized by Google

हरिराकुमारमखिलाभिधानवित्
खजनस्य वार्त्तमयमभ्ययुङ्क सः[1] ॥ * ॥

विगता दन्ता अस्य । विदन्तः । विदन्त एव वैदन्तः । बालादिः ॥ १७६ ॥

वयश्चतुष्प्राश्यदशार्हयुक्तः
परिप्लवः पुष्पकसंयुतश्च ।
कृष्णः कुरङ्गेऽनिमिषे[2] विसारी
स्यादौषधं भेषज एव कामम्[3] ॥ १७७ ॥

वय एव वायसः । काकः । वयःशब्दः सामान्येन पक्षिवाच्यपि विशेषे वर्तते शब्दशक्तिस्वाभाव्यात् ॥ एवं वसुशब्दोऽपि द्रष्टव्यः ॥ * ॥ प्राश्नन्ति प्राप्नुवते वा तदिति प्राश्यम् । चतुर्भिः प्राश्यं चतुष्प्राश्यम्[4] । तदेव चातुष्प्राश्यम् ॥ * ॥ दश्च नामान्यर्हति । दशार्हः । स एव दाशार्हः । केशवः ॥ * ॥ परिप्लवते । परिप्लवः । स एव पारिप्लवः । चञ्चलः ॥ * ॥ पुष्पप्रकृतिः[5] । पुष्पकम् । पौष्पकम् । कुसुमाञ्जनम्[6] ॥ * ॥ कृष्ण एव कार्ष्णः । कुरङ्गः । अन्यो गवादिः कृष्णः ॥ * ॥ वैसारिणः । मत्सः । अन्यो विसारी[7] । देवदत्तादिः ॥ * ॥ ओषधिरेव । औषधम् । चिफलादि । अन्यचौषधयः चेचरूढाः शङ्खपुष्पीप्रभृतयः ॥ * ॥ आकृतिगणस्यायम् । तेनान्येऽपि प्रयोगा द्रष्टव्याः[8] ॥ १७७ ॥ इति प्रज्ञादिः ॥

---

१ Śiśup. 13, 68.

२ कुरंगेनिमिषे B. C. D. E.

३ °औषधेर्भेषज° D.; औषधेर्भेषज° E.; A. om. text and comment.

४ C. om. चतुर्भिः प्राश्यं.

५ पुष्पप्रतिकृतिः F.; C. om. चञ्चलः.

६ स एव पौष्पकं° C.; तदेव पौष्पकं कुसुमं F.

७ वैशारिणो° विशारी D.

८ D. om. from आकृतिगण°.

Digitized by Google

अनन्तसोमेतिहसर्ववेदाः
सुखैकभावौ मणिकान्यभावौ ।
समीपसेनावसथद्विभावा
मालोपमाभेषजसर्वविद्याः[1] ॥ १७८ ॥

ष्ण्योऽनन्तादेरित्यनेनानन्तादेः[2] शब्दगणात्स्वार्थे ष्यप्रत्ययो भवति ॥ * ॥ न अन्तोऽनन्तः । अनन्त एव । आनन्त्यम् ॥ न विद्यतेऽन्तो यस्य । अनन्तः कालः । अनन्ता पृथ्वी । अनन्तं व्योम । आनन्त्यः काल इत्यादि ॥ * ॥ सोम एव सौम्यः । यथा ।

तेनाथ नाथवदुदाहरणातपेन
सौम्यापि नाम परुषत्वमपि प्रपन्ना[3] ।
जज्वाल तीक्ष्णविशदा सहसोद्विरन्ती
वागर्चिषस्तपनकान्तगिरेव सीता[4] ॥

सौम्यम् । सोम इवाह्लादकत्वात् सोम्य[5] इत्यपि शाखादेराकृतिगणत्वात् । यथा ।

अपेतयुद्धाभिनिवेशसौम्यो
हरिर्हरिभ्यामथ प्रतस्थे[6] ॥ * ॥

इति हेत्येव । ऐतिह्यम् । इति हेति निपातसमुदाय उपदेशपारंपर्ये वर्तते । इति ह स्मोपाध्यायः कथयति । इति ह वटे यक्षः प्रतिवसति ॥ * ॥ सर्ववेदा एव सार्ववेद्यम् ॥ * ॥ सुखमेव सौख्यम् ॥ * ॥ एको भावो

---

१ सुखैकसैकभावौ° B.; सुखैकभावौ° D.; A. om. text and comment.

२ स्वागंतादेरित्यनेनागंतादिः C.

३ तेनाथ नाथवदु° नाम पदमूर्ध्वमभि प्रपन्ना D.; दुरुदाहरणांतप° C.

४ जिह्वायतीक्ष्ण° गिरतो° D.; ग्रीता D. F.; जह्वायतीक्ष्णविशदाः सहासोद्गिरंता वाग° C. — According to Prof. Aufrecht this stanza occurs twice in the Sarasvatikaṇṭhâbharaṇa.

५ सौम्य D. F.; *śâkhâdi*, śl. 190.

६ Śiś. 3, 1; अभि for अथ D.

Digitized by Google

यस्य । एकभावः । एकस्य वा भावः । एकभावः । स एव । ऐकभाव्यम् ॥ * ॥ मणिप्रकारो मणिकः । मणिक एव माणिक्यम् । रत्नविशेषः ॥ * ॥ अन्यो भावो यस्यासावन्यभावः । अन्यस्य वा भावोऽन्यभावः । अन्यभाव एव । आन्यभाव्यम् । यथा । आन्यभाव्यं तु कालशब्द्व्यवायात्[1] ॥ * ॥ समीपमेव सामीप्यम् ॥ * ॥ सहेनेन वर्तते । सेना । सेनैव सैन्यम् ॥ * ॥ एत्य वसन्त्यस्मिन्निति । आवसथो गृहम्[2] । आवसथ एव । आवसथ्यम् ॥ * ॥ द्वयोर्भावो द्विभावः । द्विभाव एव द्वैभाव्यम् ॥ * ॥ माक्षैव माक्ष्यम् । स्रक् ॥ * ॥ उपमैव । औपम्यम् ॥ * ॥ भिषज इदम् । भेषजम्[3] । यद्वा भिषज्यतीति भेषजः[4] । करणस्यापि कर्तृत्वे पचाद्यचि यलोपे च निपातनादेत्[5] । भेषजमेव भेषज्यम् ॥ * ॥ सर्वविद्या एव सार्ववैद्यम्[6] । यथा ।

सार्ववैद्यविदध्याधृत चातुर्-
वैद्यवैद्य इव तं विरहार्तम्[7] ॥ १७८ ॥

सर्वलोकचतुर्विद्याचतुराश्रमषड्गुणाः ।
भावशब्दस्वरा विद्यालोककालास्तितः परे[8] ॥ १७९ ॥

सर्वलोका एव सार्वलौक्यम्[9] ॥ * ॥ चतस्र एव विद्याः । चातुर्वैद्यम् ।

---

१ Vârttika, Kielhorn's Mbh. p. 18.

२ एत्यवसत्यस्मिन्नित्य° C.; समभ्यतवसंत्य° D.; F. om. एत्य; आवसथो गृहं C. F.; °आवसथ एव F.

३ भैषज्यं F.

४ भिषजः B. C. F.

५ कर्तृत्वमेवाचि यलोपे वा निपातनादेत्र् D.; निपातनादेते C.; [पचाद्यच् P. iii. 1, 134].

६ ?सर्ववेदा एव° B.; सार्वविद्यं F.—सर्वे वेदाः सर्ववेदाः° । तानधीते सर्ववेदः° । स एव सार्ववेदः ॥ सर्वविद्या अधीते सर्वविदः । स एव सार्वविदः ॥ Yajñesv.; सर्वविद्या is not mentioned among the *anuṣatikâdi* śl. 164-7, but cf. चतुर्विद्या śl. 165 and next śloka.

७ सर्ववैद्यविदध्यो B. C.; सर्ववैद्यविदुषो° F.; धृतचातुर्वैद्य इव C. D.

८ A. om. text and comment.

९ सर्वे लोका° B.; सार्वलोक्यं C.

Digitized by Google

अथवा । चत्वार एव वेदाः । चातुर्वैद्यम् । उभयपाप्यनुश्रतिकादिदर्शनादुभयपदादावैच्[1] ॥ * ॥ चत्वार एवाश्रमा ब्रह्मचारिगृहस्थवानप्रस्थयतिलक्षणाः । चातुराश्रम्यम् ॥ * ॥ षड् गुणा एव सन्धिविग्रहयानासनद्वैधीभावसंश्रयलक्षणाः । षाड्गुण्यम् । यथा ।

अषडक्षीणषाड्गुण्यमन्त्री मकरकेतनः[2] ॥ * ॥

चयो भावाः । चयाणां वा भावाः । चिभावाः । चिभावा एव चैभाव्यम् ॥ * ॥ चय एव शब्दाः । चैशब्द्यम्[3] ॥ तथा हि । पञ्चसु कपालेषु संस्कृत इत्येकः । पञ्चकपाल इत्यपरः । पञ्चकपालां संस्कृतस्तृतीयः[4]। पाञ्चकपालमित्यवधानान्नास्ति[5] चतुर्थः शब्द इति ॥ * ॥ चय एव स्वरा उदात्तानुदात्तस्वरितलक्षणाः । चैस्वर्यम् ॥ * ॥ तिस्र एव विद्या आन्वीक्षिकीत्रयीवार्त्तालक्षणाः । चैविद्यम् ॥ द्विविध इत्यपन्यः[6] ॥ कश्चित् तिस्र एव विद्याः । चय एव वेदा इति वा । चैविद्यमित्याह[7] ॥ * ॥ चय एव लोकाः । चैलोक्यम् ॥ * ॥ चय एव कालाः वर्तमानभूतभविष्यल्लक्षणाः । चैकाल्यम् ॥ चित इति चिशब्दादित्यर्थः ॥ १७८ ॥

हासप्रधानकवयः समानसंनिधितदर्थसमयुक्ताः ।
अथ चतुरो वर्णयुगो शीलं शकटाङ्गजः प्राह[8] ॥ १८० ॥

हास एव हास्यम् । यथा ।

गूढसूचितरहस्यसहास्याः सुभ्रुवां प्रवहते परिहासः[9] ॥

---

१ Cf. *anupatikādi*, śl. 165.—चतुरो वेदानधीते चतुर्वेदः स एव चातुर्वैद्यः०। चतुर्विदश्चेति पाठान्तरम्। तत्रापि चतस्रो विद्या अधीते चतुर्विद्यः० । चतुर्विद्य एव चातुर्वैद्यः ॥ Yajñ.

२ Anarghyarâgh. 3, 6.

३ चैशाब्द्यं D.

४ B. C. om. from पंचकपालां.

५ पंचकपालमित्य० B. C.; °अवधानान्न नास्ति C.

६ द्वैविद्यमित्यन्यः F.

७ चैवैद्यमि० B. and corr. C.

८ प्रधानं कवयः० B. C.; वरार्धयुगौ० E.; A. om. text and comment.

९ See same passage, śl. 176.

Digitized by Google

प्रधानमेव प्राधान्यम् ॥ * ॥ कविरेव काव्यः । दैत्यगुरुः । कुर्वादिभ्यो ण्ये सति काव्य इति च[1] ॥ * ॥ समानमेव सामान्यम् ॥ * ॥ संनिधिरेव सांनिध्यम् ॥ * ॥ सोऽर्थोऽस्येति तदर्थः । तदर्थ एव तादर्थ्यम् । तच्छब्देन प्रकृत्यर्थो निर्दिश्यते ॥ * ॥ समभेव साम्यम् ॥ * ॥ चत्वार एव वर्णाः । चातुर्वर्ण्यम् । विप्रक्षत्रियविट्शूद्राः ॥ * ॥ चातुर्युग्यम् ॥ * ॥ शाकटायनस्तु षष्प्रत्ययमानयञ्शीलमेव शैलीयमाचार्यस्येत्याह[2] ॥ * ॥ जिनेन्द्रबुद्धिरनन्तरशब्दमप्यधीते[3] । तथा च तेन । अनृष्यानन्तर्ये विदादिभ्योऽञित्यत्र[4] न ह्ययं भावे व्यञ् विहितः किं तर्हि स्वार्थ एव चातुर्वर्ण्यवदिति दर्शितम्[5] ॥ * ॥ आकृतिगणश्चायम् । तेनान्येऽपि वेदितव्याः ॥ १८० ॥ इत्यनन्तादिः[6] ॥

आदिमध्यमुखान्तायप्रमाणपार्श्वयत्नदः ।
सर्वविश्वोभयैकान्यवक्षःपूर्वेदमः स्वरः[7] ॥ १८१ ॥

आद्यादेरित्यनेनाद्यादिभ्यः संभवदिभक्त्यन्तेभ्यो यथासंभवं तस्प्रत्ययो भवति ॥ * ॥ आदौ । आदितः ॥ * ॥ मध्ये मध्याद्वा । मध्यतः ॥ * ॥ एवं मुखे । मुखतः ॥ * ॥ अन्ततः ॥ * ॥ अयतः ॥ * ॥ प्रमाणेन प्रमाणाद्वा । प्रमाणतः ॥ * ॥ पार्श्वेन । पार्श्वतोऽर्कं निषेवेत[8] ॥ * ॥ येन यस्मिन्वा । यतः ॥ * ॥ एवं ततः ॥ सर्वतः ॥ विश्वतः ॥ उभयतः ॥

---

1 Cf. *kurvādi*, śl. 209.

2 The other works do not give शैलीय.

3 भवतरशू° D.; अनंतरं शू° C.—Bö. and Yajñ. also give अनन्तर in this gaṇa.

4 Pāṇ. iv. 1, 104.

5 इत्यत्र न ह्ययं भावे° D.; °दर्शनं C. F.; इत्यनंतरं यभावेऽत्र विहितः C.; C. F. om. किं तर्हि.

6 This gaṇa corresponds to the gaṇa चतुर्वर्णादि P. v. 1, 124, v. 1.

7 स्वराः E.; A. om. text and comm.

8 पार्श्वे पार्श्वतो वा° F.; निषेवते C. D. F.

Digitized by Google

एकतः ॥ अन्यतः ॥ वचस्तः ॥ पूर्वतः ॥ * ॥ दृतः । यथा । प्रयुक्तमप्यस्त-मितो दृथा स्यात्[1] ॥ * ॥ खरेण । खरतः ॥ * ॥

आकृतिगणस्चायम् । तेन वर्णतः । शब्दतः । अर्थतः । अभिधानत इत्यादयो द्रष्टव्याः ॥ का पुनरत्र संभवन्ती विभक्तिः । तथा हि । याप्ये पाशपित्यत्र प्रयुक्तम्[2]। शरीरतः छत्रः । शरीरेण छत्र इत्ययं तत्रार्थः। तेन तृतीयान्तादनेन तसिः । तथा दुष्टः शब्दः खरतो वर्णतो[3] वेत्यस्य विवरणे भर्तृहरिः[4]। आद्यादित्वात्तसिः खरवर्णाभ्यां दुष्ट इति तत्रापि तृतीयान्तादेव । एवंभूतविषयमेवैतल्लक्षणमिष्टमुपसंख्यानानां[5] नियत-विषयत्वात् । न च सर्वविषयोऽयमिति स्मृतिरस्ति नापि सर्वविषयत्वे प्राक्कृतप्रपञ्चस्यानेकलक्षणस्यापादानादिग्रहणस्य च[6] फलमस्ति सुब-न्तात्तसिरित्युच्यमाने सर्वस्य संग्रहात्[7]। तस्मादाद्यादिभ्य इत्येतस्य सा-मान्यलक्षणत्वासंभवाद् यावदुदाहृतमिह शास्त्रे प्रमाणतयोपगतैः शिष्टैस्तावानेव विषयो नापरः । एवं च य एते तर्कग्रन्थेषु हेतुपञ्चम्यर्थे किंसर्वनामबहुभ्योऽन्यत्र[8] तसन्ताः प्रयोगाः । तेषु यत्रापादानपञ्चमी संभवति तत्र साधुत्वम् । येषु तु न संभवति ते कालदृष्टा[9] एवापशब्दाः। न च तत्राहृतं बाह्यशास्त्रेण तर्कग्रन्थेषु शब्दानां लक्षणविकलानामेव दर्श-नात् । यस्त्वयं वेदविदामलंकारभूतो वेदाङ्गत्वात्प्रमाणितशब्दशास्त्रः सर्वज्ञंमन्य[10] उपमीयते तेन कथमेतत्प्रयुक्तम् । न हि स्मरणतो यत्राक्

---

१ Raghuv. 2, 34.

२ आते पाशप्° B. C.; आत्ये पाशप् इत्यत्र भाष्ये प्रयुक्तं D.—Cf. Mbh. on P.v. 3, 47; अत्र वैयाकरणाः शरीरेण [Kâśmir MS. acc. to Prof. Kielhorn, शरीतः, i.e. शरीरतः] छत्रः.

३ दुष्टः शब्दतो वर्णतो वेत्य° C.; दुष्टशब्दा स्वरतो° (corr. दुष्टाः श°) D.

४ गृहरिः D.

५ °लक्षणमित्युप° C. F.

६ °अनेकलक्षणस्यापि च C.; °लक्षण-स्यापादानादिग्रहणस्य च D.

७ सर्वसंग्रहात् C.

८ अन्यत्र च F.

९ साधुत्वान्येषु तु° कालदृष्टा C.

१० सर्वज्ञमन्य C.; सर्वमन्य (corr. मान्य) D.

Digitized by Google

तत्प्रत्यक्षमितीरितं वचनं[1] राजकीयं वा वैदिकं वापि विद्यत इति तच हि दिग्योगलक्षणा दिक्शब्द इत्यनेनोपपदविभक्तिः पञ्चमी केन तस्यास्तसिः स्यात्। अन्ये तु हेतुपञ्चम्यन्तादपि तसमिच्छन्ति। यथा। प्रमाणाद्धेतोः। प्रमाणतः। तथा च सार्वविभक्तिकस्तसिति तार्किकाः अतश्चो व्यवहरन्ति[2] ॥ १८१ ॥ इत्याद्यादिः ॥

स्थूलश्चञ्चत्पचमूलाणुमाषाश्
चञ्चच्चिचं गन्धहस्तेषुचूर्णाः[3]।
पानं वर्णो मूलमुद्रार्धपादाः
पिष्टः शूलं पल्लवः सूचपचे[4] ॥ १८२ ॥

स्थूलादेरित्यनेन स्थूलादिभ्यः शब्देभ्यः प्रकारवत्यर्थे को भवति। जातीयरोऽपवादः ॥ * ॥ स्थूलत्वविशेषयुक्तः पटः। स्थूलकः। तत्र स्थूलसदृशः स्थूलकः। स्थूलसामान्यस्य वायं भेदः स्थूलकः ॥ * ॥ चञ्चतीति चञ्चन्। चञ्चत्प्रकारः। चञ्चत्कः। चञ्चता गत्वरेण सदृशः[5]। चञ्चत्कः ॥ बृहता सदृशः[6]। बृहत्कः। मणिर्मण्डूकः खद्योतो वा। खद्योतस्तावदुन्मेषनिमेषाभ्यां चञ्चन्निवेत्युपमीयते। मण्डूकोऽपि श्वासप्रबन्धेन गत्वर इति[7] मणिः स्यन्दमानप्रभत्वात्तथोल्लेख्यते[8]। तथाल्पोऽपि प्रविकाशिप्रभत्वान्महानिव य उपलक्ष्यते तत्र मणौ बृहत्कशब्दो लोके प्रयुज्यते। तदाह।

---

१ यत्तत्प्राक्प्रत्यक्ष° F.; °तं च वचनं C.; इतीदृशं। वचनं D.

२ अतसो व्याहरंति D.

३ स्थूलं चंचत्प° चंचच्चिचं° D. E.; चंचच्चिचं F.; °वर्णाः। E.

४ C. om. पानं वर्णो; मूलमुद्रार्द्ध-पादाः° E.; मूला D. E.; पल्लवसूचपचं C.; A. om. text and comment.

५ चंचता गत्वरेण सदृशः C.; D. corrupt.

६ See next page, note 3.

७ मण्डूकोपिश्वासप्रबंधेन° C.; सत्वर इति D.

८ स्यंदमानप्रभवत्वात्° B. C.; °तथोल्लेखते B. C. D.

Digitized by Google

चञ्चत्प्रकारश्चञ्चत्को बृहत्क इति चापरे।
मणिमण्डूकखद्योताभ्यादृश्येन प्रचक्षते॥
तत्रोन्मेषनिमेषाभ्यां[1] खद्योत उपमीयते।
श्वासप्रबन्धैर्मण्डूकः स्यन्दमानप्रभो मणिः॥
प्रविकाग्निप्रभो[2]ऽल्पोऽपि महान्य उपलभ्यते।
बृहत्क इति तत्रैव मणौ शब्दः प्रयुज्यते[3]॥ * ॥

पञ्चमूले प्रकारो[4]ऽस्य। पञ्चमूलकः॥ * ॥ अणुः प्रकारो[5]ऽस्य। अणुकः पटः। द्व्यणुकादिः पदार्थो गवाक्षाद्यन्तरप्रविष्टरविकिरणप्रकाशितो[6] रेणुर्वेत्यन्यः॥ * ॥ सुवर्णस्य षोडशांशो माषः। स प्रकारोऽस्य। माषकम्। हिरण्यम्॥ भोजस्तु। अणोर्भाषेषु। माषात्परिमाण इति सूचद्वये। अणुका माषाः[7]। माषकः सुवर्णपरिमाणमित्याह॥ * ॥ चञ्चतीति चञ्चः। चञ्चः प्रकारोऽस्य चञ्चकः[8]॥ * ॥ चिचप्रकारः[9]। चिचकः। द्वीपी॥ * ॥ गन्धप्रधानः[10] पाषाणो गन्धः। गन्धः प्रकारोऽस्य। गन्धकः[11]॥ * ॥ हस्तप्रकारः। हस्तकः। पताकचिपताकादि-

---

१ प्रचक्षते तत्रोन्मेषनिमेष° B.

२ प्रविकाग्निप्रभो C.; प्रतिभासिप्रभो D.

३ बृहता सदृशः। बृहत्कः° is perhaps an interpolation; cf. śl. 184.—चंचतीति चंचत् गत्वरः। चंचत्प्रकारोऽस्य चंचत्को मंडूकः खद्योतो मणिर्वा। मंडूकस्तावत् श्वासप्रतिबंधेन स्रवमाणो गत्वर इत्येतदुपमीयते। खद्योतोऽपि उन्मेषनिमेषाभ्यां चंचन्निव भवति। मणिस्तु स्यंदमानप्रभत्वात्तथोत्प्रेक्ष्यते॥ बृहता सदृशो बृहत्कः। अल्पोऽपि प्रविकाग्निप्रभत्वाद्यो महानिवोपलक्ष्यते तत्र मणौ बृहत्कशब्दो लोके प्रयुज्यते। तथा चोक्तं गणरत्नमहोदधौ। follow the three *kārikās* चंचत्प्रकारश्चंचत्को° Yajñ.

४ पञ्चमूलप्रकारो B.

५ अणुप्रकारो B. C.

६ °प्रविष्टं वि° C.; प्रविस्तरवि° D.

७ श्रीभोजस्तु अणोर्भावेषु माषात्° D.; भोजस्तु श्रावणमाषेषु माषात्परि° C.; अणोर्भाषे माषा° B.

८ चंचप्रकारो स्य° B. C.; इति चंचत् प्रकारोऽस्य चंचत्कः F.

९ चिचः प्रकारोऽस्य F.

१० गंधप्रकारः B. C.

११ गंधप्रकारो स्य° C.; गंधप्रकारो गंधकः D.

Digitized by Google

नृत्ताभिनयविषयप्रसिद्धः[1] ॥ * ॥ इषुप्रकारः । इषुकः । बाणविशेषः । इषुप्रकारोऽस्याः । इषुका । गोलिका ॥ * ॥ चूर्णप्रकारः । चूर्णकः । तालीशादिस्नाम्बूलाङ्गं वा[2] ॥ * ॥ पानप्रकारः । पानकम् । द्राक्षा-शर्करादिनिर्मापितम्[3] ॥ * ॥ वर्णप्रकारः । वर्णिका । गैरिकादिः[4] । परीक्षार्थं सुवर्णादिमाषा वा ॥ * ॥ मूलप्रकारः । मूलकः । शाकविशेषः ॥ स्त्रीत्वविवक्षायां मूलिका । शङ्खपुष्पादिः ॥ * ॥ मुद्राप्रकारः । मुद्रिका । अङ्गुल्याभरणम् ॥ * ॥ अर्धप्रकारः । अर्धिका ॥ * ॥ पादप्रकारः । पादिका ॥ * ॥ पिष्टप्रकारः । पिष्टिका । माषादिद्विदलधान्यचूर्णः ॥ * ॥ शूलप्रकारः । शूलिका ॥ * ॥ पल्लवप्रकारः । पल्लविका । चणकादिपक्वं संस्कारयोग्यं भक्ष्यम् ॥ * ॥ सूचप्रकारः । सूचिका ॥ * ॥ पचप्रकारः । पचकम् । तमालपत्रमेव । लिखितलघुभूर्जखण्डवाचि[5] तु ह्रस्वाल्पविवक्षायां कप्रत्यये सिद्धम् ॥ यथासंभवं सर्वत्र प्रकारे विवक्षिते शब्दशक्तिस्वाभाव्यात्स्त्रीत्वमेव ॥ १८२ ॥

हरितध्रुववाट्येक्षुमठमण्डपसंकलाः[6] ।
वाट्यकालावदातास्तु[7] सुरायामुदितास्त्रयः ॥ १८३ ॥

हरितप्रकारः । हरितकम् । अश्वादीनां यवादिघासः ॥ * ॥ ध्रुव-प्रकारः । ध्रुवकः । तिथ्यादिगणनेऽविच्छिन्नोऽङ्कसंघातः[8] ॥ * ॥ वा-

---

१ पताका चिप° C.; पताकचिष्ण-कादिवृत्ता° D.; विषयः प्रसिद्धः D.

२ तालीसादि° B. C.; तांबूलांगहा B.; तांबूलांगं वा D.; F. om. from इषुप्रकारोऽस्याः.

३ °शर्करादिभिर्निर्मितं F.

४ गिरिकादिः B.

५ लिखितं लघु भूरिचखंडवाचि F. —पचप्रकारः पचकस् तमालपत्रं लिखितभूर्जपचखंडं वा ॥ Yajñ.

६ °वाट्येषु° D.; वाघेषु° C. E.

७ वाघाकाल° C. E.; वाघा° D.; cf. n. ७, p. २२५; A. om. text and comm.

८ इत्यादिगणने°ऽकसंघातः C. F.

Digitized by Google

व्यप्रकारः । वाव्यकः[1] । अवदातात् सुरायां[2] वाव्यकाभ्यां[3] सामान्येन कप्रत्यय इति यत्मतं तदपि[4] खीक्रतम् ॥ * ॥ इक्षुप्रकारः । इक्षुकः[5] ॥ * ॥ मठप्रकारः । मठिका । नानादेशागतानां द्रव्यरक्षास्थानम् ॥ * ॥ मण्डपप्रकारः । मण्डपिका । शुल्कादायगृहीतस्थानम्[6] ॥ * ॥ संकरप्रकारः । संकरिका ॥ * ॥ वाटशब्देन विशिष्टं भाजनमुच्यते । तत्र साधुः । वाट्या । तत्प्रकारवती । वाट्या सुरा भाजनपतिता वर्णोत्कर्षवती । वाटिका[7] ॥ एवं कालिकावदातिकार्थौ[8] ज्ञेयः ॥ १८३ ॥

तिलकालधान्यकालास्तिलमणिपुण्ड्रं बृहन्महच्चन्द्राः[9]।
एरण्डमधु कुमार्याः पुच्छश्वभ्रौ[9] च संज्ञायाम् ॥ १८४ ॥

तिलकालयोः प्रकारः । तिलकालकः ॥ * ॥ धान्यप्रकारः । धान्यकम् ॥ * ॥ कालप्रकारः । कालकः ॥ * ॥ तिलप्रकारः । तिलकः ॥ * ॥

---

१ वाघ० वाघकः C. D.

२ ? अवदातसु० D.; अवदातत् सु० B.; अवदाताग् सु० C.; अवदातः सु० F.

३ ? वाव्याकाभ्यां B.; वाघाका० C. D.—Bö., Yajñ., Kâś. V. ed. have पाव्यकाभ्यावदात(ाः) सुरायां; Kâś. V. MS. *a.* वाघाका०, om. *β.*; Vardh. seems to admit the two readings वाव्यकाभ्यावदाताः and वाव्याका० cf. n. ७.

४ मप्यतं० B. C.; यद्यतंदपि D.

५ इक्षुक एरंडः Yajñ.

६ शुल्कादायगृहितृस्थानं F.; शुल्कादयगृ० D.

७ पादार्धमुदकं पाव्यं तत्प्रकारा पाचिका सुरा । यथा प्रियातिथेः सत्काराय पाव्यं प्रदीयते तथा कदाचित्केनचित्सुरापि । ततः सा पाव्यसदृशी पाचिकाशब्देन व्यपदिश्यते ॥ गणरत्नमहोदधौ तु वाव्यकाभ्यावदातासु सुरायामुचितास्त्रय इति पठित्वा वाटशब्देन विशिष्टं भाजनमुच्यते । तत्र साधुर्वाव्यो द्रवद्रव्यविशेषः । तत्प्रकारा वाव्यिका सुरा भाजनपातिनी वर्णोत्कर्षवतीत्युक्तम् । Yajñeśv.; cf. note ७, preceding page.

८ काल: श्यामल: प्रकारोऽस्या इति कालिका । अवदातो धवल: प्रकारोऽस्या इत्यवदातिका सुरैव । Yajñ.

९ °पुंड्रबृह० F.

Digitized by Google

मणिप्रकारः मणिकः। मणिः प्रकारोऽस्येति[1] मणिकः। मणिरिव यो रत्नभूतः प्रधानं मनोज्ञस्य स मणिक इत्यन्ये ॥ * ॥ पुण्ड्रकः। इक्षुविशेषः[2] ॥ * ॥ बृहत्कः। ग्राम्यसमाजे श्रेष्ठः ॥ * ॥ महत्कः[3] ॥ * ॥ चञ्चूकः ॥ * ॥ एरण्डकः। इक्षुविशेषः ॥ * ॥ मधुकः[4] ॥ * ॥ कुमारीपुत्रकः ॥ कुमारीश्वशुरकः ॥ यथा[5]।

प्रतिवसति कुमारीपुत्रका वा कुमारी-
श्वशुरकसदृशो वा ग्राम्यदेशे सद्भिः[6]।
मणिकमधुकभासं पुण्ड्रकैरण्डकेषु-
स्वकितकबुभक्षां[7] तद्भुवोऽस्मै प्रशंसुः ॥

कुमारीपुत्रः प्रकारोऽस्य। कुमारीपुत्रकः। यथा कुमारीपुत्रः कश्चित्सभायां प्रविशँल्लज्जते तथान्योऽपि य एवंविधः स कुमारीपुत्रकः ॥ कुमारीश्वशुरः प्रकारोऽस्य। कुमारीश्वशुरकः। यस्य पुत्रः कुमार्या सह दृष्टः स कुमारीश्वशुरः। यथा पुत्रदोषेण स लज्जते तथान्योऽपि लज्जमानः कुमारीश्वशुरक इत्यन्यो व्याचष्टे[8] ॥ * ॥

---

१ मणिप्रकारो स्येति B. C.

२ पुंड्रक इक्षु° F.; on बृहत्क s. p. 222, note 3.

३ इत्यपि महत्कः B. C.

४ यत्तु एरंडमधुकुमार्याः पुत्रः श्वशुरश्च संज्ञायामिति पठित्वा वर्तमानेनोक्तम्। एरंडक इक्षुविशेषः। मधुकं नालिकेरासवम्। संज्ञायामिति गणसूत्रं तस्यायमर्थः। स्वप्रकृत्यर्थस्य etc. as above to कुंभिका स्तंभोपधानी इत्यादि° Yajñ.

५ D. om. यथा, cf. next note.

६ ग्राम्यदेशे सवृद्धिः B. C. F.; ग्राम्यदेशे° D.—This stanza, apparently taken from some grammatical poem, is also found in the text MS. E.

७ °भाषां पुंडकेरंडकेषु सचकितक° E.; °भासः पुंड्रकै° F.; मधुकः मल्लिकः भासः पुंड्रकैरंडकेषु: स च किलः बकुभक्षाः D.

८ कुमारीश्वशुरकः। यस्य पुत्रः कुमार्या संगतः स यथा शिष्टसभां प्रवेष्टुं लज्जते तथा यो लज्जमानः स एवं व्यपदिश्यते। Yajñ.—Kâś. V. ed. has कुमार। श्वशुरश्च, MS. *a.* कुमारीश्वशुरश्च.

Digitized by Google

संज्ञायामिति गणसूचम्। तस्यार्थः। स्वप्रकृत्यर्थस्य प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः संज्ञारूपतयाऽर्थान्तरे वर्तते तस्मादेन कप्रत्ययः। फलम् आमलकादि। फलकं तु काष्ठादिमयम्॥ शूद्रशब्दो जातौ प्रसिद्धः। शूद्रको नाम वीरः॥ संतानः समानजातीयप्रवाहः[1]। संतानकः सुरतरुः॥ कुजं वक्रं काष्ठादिवस्तु। कुजकस्तरुविशेषः॥ कुरवः कुत्सितो ध्वनिः। कुरवकस्तरुविशेषः[2]॥ कदम्बस्तरुः। कदम्बकं संघातः॥ भ्रमरः षट्पदः। भ्रमरकः क्रीडोपकरणम्॥ करभः क्रमेलकः। करभको धनुष्कोटिर्गृहैकदेशो वा कटकुड्यलक्षणः[3]॥ नेचम् अचि। नेचकं मन्थानाकर्षकम्[4]॥ कणो माषादिधान्यव्यक्तिरूपः। कणको लोहोपकरणम्॥ दण्डो यष्टिः। दण्डकश्छन्दोविशेषः क्षुद्रमार्गो वा[5]॥ जम्बुस्तरुविशेषः[6]। जम्बुकः शृगालः॥ स्त्रीत्वमपि केषांचित्। कुम्भो घटो मानविशेषो वा। कुम्भिका स्त्र्याधानी॥ नौरन्या। नौकाऽचितारका॥ ये तु कप्रत्ययमाश्रित्य स्वार्थत्यागेन जात्यन्तरे किंचिदाकारसाम्याद् यवाद्याश्लेषां प्रतिच्छन्देऽनर्षादेरिति[7] कप्रत्ययो न पुनरनेन यवको व्रीहिः[8]। न यवप्रकार एव जात्यन्तरत्वात्। एवमन्यत्। गोमूचम्[8]। तदर्णमाच्छादनं[9] गोमूचिका॥ अन्या

---

१ संतानं समानजीय° D.

२ कुरवक° B. C.; कुरवक° F.; °कः ग्रहविशेषः D.

३ कटकुड्य° D.; क्षतकुड्य° C.; कटस्तु कुड्य° B.; । कटः कुड्यलक्षणः कटको वलयं । F.; om. Yajñ., cf. last page, n. 4.

४ नक्षान्नाकर्षका D.

५ दंडकः। पद्यविशेषः। तनुभागो वा D.

६ जंबूस्तरु° F.; जंबु तरु° D.

७ प्रतिच्छंदे न अर्षादेरिति B. C.; cf. next śloka.

८ Bö., Yajñ., Kâś. V. include यव (व्रीहिषु), गोमूच (आच्छादने), सुरा (अहौ), also क्षुद्र (तिलेषु), वीर्य (ग्राजिषु) in this *gaṇa* [सुराप्रकारः सुरावर्णोऽहिः सुराकः॥ गोमूचिका गोमूचवर्णा शाटी। etc. Yajñ.].

९ गोमूचवद्वर्ण° D.

Digitized by Google

सुरा । अन्यस्तदर्णः सुराको हि ॥ * ॥ प्रकारः सादृश्यमिति वज्रसंमतम् । सामान्यस्य भेदको विशेषः प्रकार इत्यन्येषामभिनिवेशः । यदाह ।

सादृश्यमेव सर्वत्र प्रकारः कैश्चिदिष्यते ।
भेदेऽपि तु प्रकाराख्या कैश्चिदभ्युपगम्यते ॥

आकृतिगणोऽयम्[1] ॥ १८४ ॥ इति खूलादिः ॥

अर्चासु पूजनार्थासु चित्रकर्मनटध्वजे ।
चञ्चाखरकुटीदासीवध्रिका नरि काश्यपः[2] ॥ १८५ ॥

प्रतिच्छन्देऽनर्चादेरित्यचार्चादेर्वर्जनात् को न भवति ॥ * ॥ अर्चासु । ग्रिवाकारः । ग्रिवः । अर्हन्[3] । स्कन्दः । आदित्यः ॥ * ॥ चित्रकर्मणि । दुर्योधनः । भीमः ॥ * ॥ नटे । रामः ॥ * ॥ ध्वजे । गरुडः ॥ * ॥ मनुष्येऽभिधेये । चेचे सखरक्षणार्थं[4] तृणमयः पुरुषश्चञ्चा । चञ्चेव चञ्चा मनुष्यः ॥ खरकुटी नापितमुण्डनशाला । खरकुटीव खरकुटी ॥ दासीव दासी ॥ वध्रिका चर्ममयी वरत्रा । वध्रिकेव वध्रिका ॥ मुख्यवल्लिङ्गसंख्ये इति[5] वचनात् पुंल्लिङ्गेऽप्यर्थे स्त्रीलिङ्गतैव ॥ * ॥ काश्यप इव काश्यपः ॥ १८५ ॥

देवराजाजशङ्कुभ्यः करिसिन्धुशतात् पथः ।
सिद्धोष्ट्राभ्यां गतियीवे वामाद्रज्जुः स्थलात्पथः[6] ॥ १८६ ॥

---

१ D. om. from प्रकारः सादृश्यमिति.

२ °वर्त्रिका F.; चारिकाश्यपः D.; काश्यपः B.; A. om. text and comment. —On this *gaṇa* cf. Pāṇ. v. 3, 96 ff. Yajñ. defends the *gaṇa* देवपथादि by the side of Pāṇ. v. 3, 99, and adds: तदुत्तमभिधुक्तिः । अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च । इवे प्रतिकृतौ लोपः कनो देवपथादिष्विति ॥

३ ग्रिव अर्हत् D.; अर्हं B. C.

४ चेचश्च° D.

५ मुख्यावल्लिंग° C.; °संख्येति D. and corr. युक्तवत् लिंग°.

६ गतियीवा E.; वामा रज्जुः C.; वामरज्जः D. E.; A. om. text & comm.

Digitized by Google

देवानां पन्थाः । देवपथः । स यादृग्रः सद्गुणोपेतसरूनिकरच्छायाकलितः समतलः सजलो[1] निरुपद्रवश्च तादृग्रोऽन्योऽपि देवपथः ॥ * ॥ एवं राजपथः[2] ॥ * ॥ अजपथः ॥ * ॥ शृङ्गपथः[3] ॥ * ॥ करिपथः ॥ * ॥ सिन्धुः समुद्रो नदी वा । तत्पन्था इव । सिन्धुपथः[4] ॥ * ॥ शतं पन्थानो यच्च । शतपथः । तत्तुल्यः शतपथः ॥ * ॥ सिद्धानां गतिः । सिद्धगतिः । तत्तुल्यः सिद्धगतिः ॥ * ॥ उष्ट्रस्य ग्रीवा । उष्ट्रग्रीवा । तत्तुल्य उष्ट्रग्रीवा ॥ * ॥ वामा कुटिला[5] रज्जुः । वामरज्जुः । तत्तुल्यो वामरज्जुः[6] ॥ * ॥ स्खलरूपः पन्थाः स्खलपथः । तत्तुल्यः स्खलपथः ॥ * ॥ इह पठितानामप्यन्यैः शाब्दिकैर्हस्तपुष्पमत्स्यशब्दानां[7] न युक्तः पाठः । तथा हि । हस्ताकारकाष्ठलोहाद्युपकरणं हस्तकः[8] ॥ पुष्पको विमानं भाजनं वा पुष्पकम् ॥ मत्स्याकारस्वर्मचोवरादिच्छेदो मत्स्यकः ॥ भोजोऽपि न हस्तदण्डपुष्पादिभ्य इत्यनेन कप्रत्ययस्थितिमाह[9] ॥ * ॥ आकृतिगणस्यायम् । तेनेन्द्रप्रस्थतयो द्रष्टव्याः ॥ १८६ ॥ इत्यर्चादिः । अन्येषां तु मते देवपथादिः ॥

---

१ °छायाकलितः° सज्जलो D.

२ राजपथसदृशस्य सद्व्यवहारादेः संज्ञा राजपथः । Yajñ.

३ शृंगुसहितः संकटः पन्थाः शृंगुपथस्तत्सदृशस्य दुराचारादेः संज्ञा शृंगुपथः । Yajñ. Besides the compounds here given Yajñ. includes रथपथ, हंसपथ, and वारिपथ.

४ समुद्रो नदो वा सिंधुपथः B. C.; D. om. from शृङ्गुपथः.

५ B. C. D. om. कुटिला.

६ तत्सदृशस्य खलादेः संज्ञा वामरज्जुः Yajñ.

७ हस्त इव हस्तः । एवमिन्द्रः । पुष्पं पुष्पतुल्या प्रतिमा । दंड इव दंडः । मत्स्य इव मत्स्यः । कुंडसिञ्चादिगर्तेषु कुंडनिर्माणक्रियायां मत्स्याकारा रेखाः पतंति ता मत्स्यपदेन व्यवह्रियंते ॥ Yajñ.

८ °उपकरणहस्तकः D.

९ Bhaṭṭa Yajñeśv. quotes and criticises the passage from इह पठितानां.

Digitized by Google

यावाभिन्नतराविवत्समणयो लान्द्रप्रवाली वट-
ज्ञाताज्ञातपटा घटो बहुतरः स्तम्बोऽथ पूलः पुटः[१]।
पीतप्रष्ठकुटाश्च नित्यवयसी सत्वद्दशार्हाविमौ
भिक्षुस्तब्धपिटास्थिपुण्यबधिरा दोलाभृतौ जानु च[२]॥१८७॥

यावादेरित्यनेन यावादेः शब्दगणात्स्वार्थे कप्रत्ययो भवति वा॥*॥ यवानां विकारो यावः। याव एव यावकः।

गोमूत्रयावकाहारोदक्षिकोज्जानुकद्विजे[३]।
क्ष्मापतिः क्षौणिमाणिक्ये स वसिष्ठाश्रमेऽगमत्॥

अलक्तक इत्यन्यः[४]॥*॥ अतिशयेनाभिन्नम् अभिन्नतरम्। अभिन्नतरमेव। अभिन्नतरकम्। यथा।

अभिन्नतरके नाकाह्वानकेभ्यः पराङ्मुखे[५]।
ज्ञातके सर्वलोकानामज्ञातकविकर्मणि॥*॥

अविरेव। अविकः। यथा।

लूनकाविकलोमोत्थाञ्छ्रेयस्काञ्कन्दुकान् करे[६]।
कुचाद्दद्दि वहन्तीभिः[७] स कुमारीभिराकुले॥*॥

वत्स एव वत्सकः॥*॥ मणिरेव मणिकः॥*॥ लाक्षमेव लाक्षकम्।

---

१ °मणयो° पटा पटो D.; लाद्र° घटाघटौ° C.

२ पीतः° B., om. C.; प्रष्ठ for प्रष्ठ MSS.; भिक्षुस्तब्ध° D.; पटास्थि° B. C. F.; A. om. text and comment.

३ °द्विजः F.; °द्विजो D.

४ अलक्त इत्यन्यः D.; इत्यगः C.—याव एव यावकः। लोकपक्षा यवा यावकशब्देन व्यवह्रियंते। अलक्तकरसो यावक इत्यन्ये। Yajñ.

५ अभिन्नतरकमेके ना° D.

६ लूनकाविकलामोचात् श्रे° D.; °कंदुकाञ्करे B. C. D.

७ कुचाद्दद्दिवहतीभि C.; कुचात् द्दिव तीभिः D.; Yajñ. as above.

Digitized by Google

विरसं जलम् ॥ * ॥ प्रवाल एव प्रवालकम् । विद्रुमः पल्लवश्च ॥ * ॥ वट एव वटकम् । भक्ष्यविशेषः ॥ * ॥ ज्ञात एव । ज्ञातकः ॥ * ॥ अज्ञात एव । अज्ञातकः ॥ * ॥ पट एव पटकः[1] ॥ * ॥ घट एव घटकः ॥ * ॥ बहुतर एव बहुतरकः । अभिज्ञतरबहुतरग्रन्थौ तरबन्तावुपलक्षणम् । तेन सुकरतरोपपन्नतरादयो[2] द्रष्टव्याः ॥ * ॥ स्तम्ब एव स्तम्बकः । ग्राह्यादिकलापः[3] ॥ * ॥ पूल एव पूलकः । तृणसंघातः ॥ * ॥ पुट एव पुटकः । पत्रनिर्मितः[4] ॥ * ॥ पीत एव पीतकः । पटादिः ।

वृते वियातकैणानुयहणाणुकबुद्धिभिः[5] ।
तनुकापीतकब्रह्मसूत्रै राजर्षिसूनुभिः ॥ * ॥

प्रष्ठ एव प्रष्ठकः[6] ॥ * ॥ कुट एव कुटकः । घटः ॥ * ॥ नित्यमेव नित्यकम् ॥ * ॥ वय एव वयस्कः । प्रज्ञाद्यणि वायसश्च ॥ * ॥ सत्वानेव सत्वकः ॥ दग्धार्ह एव दग्धार्हकः ॥ सात्वतो[7] दाग्धार्हश्च ॥ * ॥ भिक्षुरेव भिक्षुकः ॥ * ॥ स्तम्ब एव स्तम्बकः ।

शीतके वोष्णके वर्तौ समाधिः स्तम्बके रहः[8] ।
महो बृहतिकाच्छिन्नैरुच्छ्रयोपान्ते महर्षिभिः[9] ॥ * ॥

पिटो वंशदलादिमयं[10] भाण्डम् । स एव पिटकः ॥ * ॥ अस्थ्येव । अक्षिकम् । पञ्चमधातुः ॥ * ॥ पुष्पमेव पुष्पकम् ॥ * ॥ बधिर एव बधिरकः

---

१ C. om. from पट.

२ सुकर° D.; सुकरतरोद्यो B.

३ Yajñ. adds पूषोदरादित्वादनुस्वारलोपे सलकोऽपि स एव ।

४ °निमितः B. F.; पतिर्मितः C.

५ तथा हि कवयः प्रयुंजते । वृते° Yajñeśv.—वियातकैषीतुक्य° B.; °कैषातुक्य° C.; वते° कैषीसुकुय° D.; वैयातकैशीतुक्यहस्ताऽनुक° F.

६ प्रष्ट एव प्रष्टकः । MSS.; wanting in the other works.

७ सात्वतो C.; ग्रात्वतो D.

८ सीतके° B.; सीतको वाऽत्रे वर्तौ समा° C.

९ वृहतिकाच्छन्नैः (°छन्ने D.) छन्नो° D. F.

१० वंशदलादिमयं F.

Digitized by Google

॥ * ॥ दोलैव दोलकः ॥ * ॥ भृत एव भृतकः । कर्मकरः ॥ * ॥ जान्वेव जानुकम् ॥ १८७ ॥

दानस्नातौ कुत्सितवेदसमाप्योरणुर्मतो निपुणे।
लूनवियातौ च पशौ शीतोष्णमृतावनीरसे पुचः[1] ॥ १८८ ॥

अनीरस इति क्षत्रिम इत्यर्थः ॥ * ॥ कुत्सितं दानम् । दानकम् । दानमन्यत् ॥ * ॥ स्नात एव स्नातकः । वेदं व्रतानि वा समाप्य यो वर्तते[2] स एवमुच्यते । यत्स्मृतिः ।

गुरवे तु वरं दत्त्वा स्नायाद्वा[3] तदनुज्ञया ।
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥

केचित् पुण्यस्नात वेदसमाप्नाविति पठन्ति । तत्तु न हृदयहारि ॥ * ॥ अणुको निपुणः । अन्यच्च । अणुर्व्रीहिः ॥ * ॥ लूनकः पशुः ॥ वियातकः पशुः । विहायनात्पशावित्यन्यः ॥ अन्यच्च लूनो यवः । वियातो वटुः[4] ॥ * ॥ शीतकः । उष्णक ऋतुः ॥ अन्यच्च शीतो वायुः । उष्णः सूर्यः ॥ * ॥ क्षत्रिमः पुत्रः । पुत्रकः । पुत्र एवान्यः ॥ १८८ ॥

आच्छादने च बृहती शून्यं रिक्ते तनुश्च सूने स्यात्।
क्रीडनकं च कुमार्याः संज्ञाशब्दस्तथेयश्च[5] ॥ १८९ ॥

बृहतिका । आच्छादनविशेषः । नित्यं कः । अन्यच्च बृहती । ओषधिश्छन्दश्च ॥ * ॥ शून्यकम् । रिक्तम् । अन्यच्च शून्ये हितम् ।

---

१ लूनतियाती° E.; ऋतावानीरसे° C.; अनीरसपुचः D. E.

२ समावर्तते Yajñeśv.

३ Yâjñav. i. 51 (स्नायीत तद्° ed.); धर्मं दत्वात्स्नायाद्वा B. C.; अरदे वुधं दत्वा स्नायाद्वा D.; Yajñeśv. quotes the śloka as above.

४ लूनकः पशुः। विहायनात्य° वयः D.

५ आछादनेऽपि च D. E.; °शब्दश्च श्रेयश्च C.; A. om. text and comment.

Digitized by Google

शून्यम् ॥ * ॥ तनु सूचम् । तनुकम् । अन्यच तनुर्वस्त्रः ॥ * ॥ कन्दुकः । भ्रमरकः । गिरिकः । शृङ्गकम् । देवदत्तकः[1] ॥ * ॥

गुणनमेव गुणनिका । यथा ।

हेतुः परिचयस्थैर्यं वक्तुर्गुणनिकैव सा[2] ॥

तथेयस्येति । ईयस्प्रत्ययान्तः शब्दः कप्रत्ययभाक् । श्रेयानेव श्रेयस्कः । ज्यायानेव ज्यायस्कः । भूयानेव भूयस्कः । श्रेय एव श्रेयस्कम् । भूयस्कम् । ज्यायस्कमित्यादि ॥ * ॥

आकृतिगणोऽयम् । तेन पिष्टातकाद्यो[3] द्रष्टव्याः ॥ १८९ ॥

इति यावादिः ॥

शाखा स्कन्दमुखाद्याणि शरणं चरणोरसी ।
जघनं शृङ्गमेघाभ्रदुशिरःस्कन्धमेव च[4] ॥ १९० ॥

शाखाभ्रकरादिभ्यां याणावित्यनेन शाखादेः भ्रकरादेश्चेवार्थे याणौ[5] भवतः ॥ * ॥ पुरुषस्कन्धस्य वृक्षस्कन्धस्य वा तिर्यक्प्रसृतमङ्गं शाखेत्युच्यते । यथा शाखा पार्श्वायता तथा कुलस्य यः पार्श्वायतोऽङ्गभूतः स शाखेव शाख्यः ॥ अन्ये तु । शाखायास्तुल्यः शाख्यः । यथा शाखा वृक्षस्य शोभाकरी तथा कुलस्य शोभाकरः पुरुषः शाख्य इति तुल्यत्वमाहुः ॥ * ॥ स्कन्दः स्वामी । तत्तुल्यः स्कन्द्यः[6] ॥ * ॥ मुखमिव मुख्यः । यथा मुखं हस्तपादादिभ्योऽवयवेभ्यः[7] प्रथममवलोक्यते तथा

---

१ क्रीडोपकरणवाचकानि० यथा शालभंज्येव शालभंजिका । एवं० गिरिकम्० Yajñ.

२ Śiśup. 2, 75.

३ तेन पिष्टातकाद्यो पञ्च द्रष्टव्या इति वर्द्धमानसूरिराह । पिष्टातः सुगंधिचूर्ण स एव पिष्टातकः । Yajñesv.

४ A. om. text and comment.

५ पाणावित्यनेन शाखादेः० D.; ०च इवार्थयाणौ C.

६ स्कंद इव यः शत्रुशोषकः स स्कंद्यः Yajñ.

७ मुखं हस्त० D.; ऽवयेभ्यः C.

Digitized by Google

ऽन्योऽप्येवमुच्यते ॥ कश्चिन्मुख्यं नालिकेरमित्याह ॥ * ॥ अयमिव । अग्र्यः । प्रधानभूतः ॥ * ॥ ग्रीर्यते भयमस्मादिति ग्ररणम्[1] । आर्तत्राणम् । तत्तुल्यः ग्ररण्यः । परित्राता ॥ * ॥ चरणाविव चरण्यः । यथा चरणौ ग्रहीरस्य प्रकर्षकौ तद्वत् कुलस्य प्रकर्षक एवमुच्यते ॥ * ॥ उर इव । उरस्यः । यः कार्येषूपगतेषु सत्त्व उरः प्रयच्छति[2] स एवमुच्यते ॥ * ॥ जघनमिव निकृष्टो यः स जघन्यः ॥ * ॥ शृङ्गमिव यः सर्वस्याप्युपरिवर्ती स शृङ्ग्यः ॥ * ॥ मेघ इव यः संतापापनेता[3] स मेघ्यः ॥ * ॥ अभ्रमिव य आच्छादकः सोऽभ्र्यः ॥ * ॥ द्रुरिव द्रव्यम् अयं राजपुत्रः । यथा द्रुमः फलपुष्पपल्लवादिभिरर्थिनः कृतार्थयति स हि भवनमर्हतीति भव्यो भवत्यात्मवानिति द्रव्यमुच्यते[4] । क्रिया हि द्रव्यं विनयति[5] नाद्रव्यमिति । पुरुषार्थसाधकत्वाद्धिरण्यादिकमपि द्रव्यम् ।

निर्द्रव्यो ह्रियमेति श्रीपरिगतः प्रभ्रश्यते[6] तेजसः ।
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते[7] ॥

शकटाङ्गजस्तु द्रुणस्तुल्यं द्रव्यं द्रुशब्दं नपुंसकमाह ॥ * ॥ शिर इव शीर्ष्यः । प्रधानभूतः । शिरसः शीर्षन्नणादावित्यनेन[8] शीर्षन्नादेशः ॥ * ॥ स्कन्ध इव यो बलस्याश्रयः स स्कन्ध्यः ॥ १८० ॥ इति शाखादिः ॥

---

१ °इति शरणं गृहं तन्नयापहारकः शरण्यः Yajñ.

२ सत्वर उरः° F.; ससर्ब उरःप्रभृति C.—उर इवोरस्यः कार्यनिर्वाहकः। Yajñ.

३ संतापापनोदनेन सुखयति F.; यः संय। तापापेनता D.

४ कृतार्थयति तथा स इत्यर्थः। भवमर्हतीति भव्यः।° F.—यथा द्रुमः फलपुष्पपल्लवादिभिः स्वाश्रिताञ्कृतार्थयति एवमर्थिनः स्वसंपदा कृतार्थयन्नात्मवान् पुरुषो द्रव्यमित्युच्यते। Yajñ., who rejects द्रु because of P. v. 3, 104.

५ नयति D.; Kshîrasv. quotes the line क्रिया° on A. K. 3, 4, 24, 156; cf. P. v. 3, 104.

६ प्रभ्रश्यते° B. C. F.

७ Mṛchchh. p. 8; Böhtl. Spr. 2781.

८ शीर्षन्नाणादा° F.; शीर्षन्नादाधित्यनेन D.

Digitized by Google

शर्करा लोमगोपुच्छगोलोमानि कपालिका[१]।
नराची शतपर्वं च पुण्डरीककपाटिके[२] ॥ १९१ ॥

शर्करेव। शार्करं दधि मधुरत्वात्। शार्करी मृत्तिका कठिनत्वात्॥ शर्कराशब्द इक्षुविकारे सिकतास्वपि वर्तते ॥ * ॥ लोमेव कोमलस्पर्शत्वात्। लौमनं वस्त्रम् ॥ * ॥ गोपुच्छमिव। गौपुच्छो दण्डः ॥ * ॥ गोलोमेव गौलोमनम्। ब्रह्मादीनामित्यनेन नियमितत्वादन्याजादिलोपाभावः[३]॥ भोजेन गौलोममित्युदाहृतम्[४]। तच्चु न संगच्छते। नलोपस्य नियमेन[५] व्यावर्तितत्वात् ॥ * ॥ कुत्सितम् अज्ञातं वा कपालम्। कपालिका। कपालिकेव। कापालिकं कंसादिपात्रम् ॥ * ॥ नरामञ्चति। नराची। तच्चुल्लं नाराचम् ॥ * ॥ शतपर्वमिव शातपर्वम् ॥ * ॥ ॥ * ॥ पुण्डरीकमिव पौण्डरीकम् ॥ * ॥ दृढः कपाटः कपाटिका। कपाटिकेव कापाटिकम् ॥ वामनः कपिष्टिकेत्याह[६]। कंवाष्टिकेति[७] शकटाङ्गजः ॥ * ॥

आकृतिगणोऽयम्। तेन सिकतानकुलादयो[८] ज्ञातव्याः ॥ १९१ ॥
इति शर्करादिः ॥

---

१ शर्करशार्करी लोमगोलोमानि° C.; गोलामानि° B.; गौलोमानि कपलिका D.

२ °शातपर्व° C.; शपर्व° कापाटिके D.; A. om. text and comment.

३ °शंलाजातिलोपाभावः D.; cf. on śl. 163; P. vi. 4, 167; 171.

४ श्रीभोजेन° D.; गोलोममित्यु° F. —गोलोमेव गोलोमनम् अपि अत्रिति प्रकृतिभावाद्विलोपो न। Yajñ.

५ तच्चु संगच्छते नेत्यापधनियमेन D.

६ कपिष्टकेत्याह B. C.; कपिष्टके° D. a. m.—MSS. Kâś. V. v. 3, 107 have कपिष्टिका (ed. पिष्टिका, but s. *var. l.*); कपिष्टिका (*var. l.* कपिष्टिका) Bö.; कपिष्टिका Yajñ.

७ ? वाष्टिकेति F.; कंवाष्टिकेति D. a. m.

८ Bö., Yajñ., Kâś. V. have both सिकता and नकुल (नकुला ed. Kâś. V., not MS. *a.*).

Digitized by Google

अङ्गुली रुरुहरी कपिबभ्रू
कर्कोमण्डरतरोमुनयश्च ।
शष्कुली कुलिशलोहितगोणी-
वल्गुमण्डलखला भरुजश्च[1] ॥ १९२ ॥

अङ्ग्वादेष्ठणित्यनेनाङ्ग्वादिगणादिवार्थे[2] ठण् भवति । वामनस्य तु तदादेष्ठगिति[3] सूत्रम् ॥ * ॥ अङ्गुलिरिव दीर्घायते । आङ्गुलिकः[4] । आङ्गुलिकी मणिशलाका ॥ * ॥ रुरुरिव रौरुकः[5] ॥ * ॥ हरिरिव हारिकः ॥ * ॥ कपिरिव कापिकः ॥ * ॥ बभ्रुरिव बाभ्रुकः[6] ॥ * ॥ कर्क इव । कार्किको गौर्गवयो वा । कार्किकं यशः[7] । यथा ममैव सिद्धराजवर्णने ।

प्रत्युप्तमुक्ताफलपद्मराग-
प्रस्पर्धिभिस्तोषितविश्वलोकैः ।
यशोऽनुरागैस्तव सिद्धनाथ
चक्रे जगत्कार्किकलोहितीकम् ॥

पक्षे कर्कलोहितशब्दयोष्ठीकणपि । कर्कलोहिताट्टीकण् वेति[8] शकटाङ्गजमतं खीक्रतम् ॥ * ॥ मण्डर इव माण्डरिकः ॥ * ॥ तर इव तार-

---

१ कुलीश्च° D. E.; वल्गु° D.; A. om. text and comment.

२ अंगुल्यादिषु णित्यनेन° C.; अंगुल्यादेष्ठणित्य° D.

३ ? तदादेष्ठणिति B. F.; तदादिष्ठेणिति C.; तदादेष्वणिति D.—Cf. Pâṇ. v. 3, 108; but here Vâmana's own grammar (see the comm. on sû. 2 above) is evidently referred to.

४ दीर्घायतं आंगुलिकं । F.

५ रौरविकः F.—Yajñeśvara reads रुरु (रौरुकः); Bō. रुह; om. Kâś. V. ed. (but भरु MS. β.; तनु MS. a.).

६ बाभ्रविकः F.

७ B. C. F. om. कार्किको गौर्गवयो वा; D. om. from कार्किकं यशः to the end of the quoted stanza.—The other works omit कर्क.

८ F. twice टीकण्; C. ठाकण्°; Pâṇ. v. 3, 110 ट्ठक्.

Digitized by Google

सिकः[1] ॥ * ॥ मुनिरिव मौनिकः ॥ * ॥ शष्कुलीव शाष्कुलिकः ॥ * ॥ कुलिशमिव कौलिशिकः ॥ * ॥ लोहितमिव । लौहितिकः स्फटिकः[2] । स्वयमलोहित[3] उपाश्रयवशात्तथाभासते ॥ * ॥ गोणीव गौणिकः[4] ॥ * ॥ वल्गुरिव वाल्गुकः[5] ॥ * ॥ मण्डलमिव माण्डलिकः ॥ * ॥ खल इव खालिकः ॥ * ॥ भरज इव भारजिकः । विद्वान् ॥ * ॥

आकृतिगणोऽयम् । तेन । उदश्वित्भरमण्डादयो[6] द्रष्टव्याः ॥ १९२ ॥ इत्यञ्ञ्यादिः ॥

विनयविशेषसमूहाः समयात्ययसंप्रदानसंगतयः ।
व्यवहारसमुत्कर्षाकस्मादनुगादिसंयामाः[7] ॥ १९३ ॥

विनयादेरित्यनेन विनयादेः शब्दगणाट्ठण् भवति स्वार्थे[8] ॥ * ॥ विनय एव वैनयिकः ॥ * ॥ विशेष एव वैशेषिकः ॥ * ॥ समूह एव सामूहिकः ॥ * ॥ समय एव सामयिकः ॥ * ॥ एवम् आत्ययिकः ॥ * ॥ सांप्रदानिकः ॥ * ॥ सांगतिकः ॥ संगतमेव[9] सांगतिकम् । सांगतिक आलापः । सांगतिकी व्यवस्थेति वामनः ॥ * ॥ व्यावहारिकः ॥ * ॥ सामुत्कर्षिकः ॥ * ॥ आकस्मिकः ॥ * ॥ आनुगादिकः ॥ * ॥ सांयामिकः[10] ॥ १९३ ॥

---

१ उरस् for तरस् Yajñ. (औरसिक), Bö., Kâś. V. ed. (MSS. तरस्, तरस्).

२ लोहित इव लौहितिकः° D.; स्फाटिकः C.

३ स्वयमेव लोहित B.

४ गोणी Bö., Kâś. V.; रोणी (रौणिकः) Yajñ.

५ वाल्लविकः F.; वल्गुरिव वाल्गुकः D.

६ ? °भरमंडादयो C.; तरमं [दा suppl.] दयो D.—Of these words the other works include only उदश्वित् (औदश्वित्क); for भरज cf. MS. Kâś. V. last page, note 5.

७ A. om. text and comment.

८ °गणात् अण् स्वार्थे विनयवाग् C., cf. n. 8; P. v. 4, 34 ठक्.

९ Thus D.; सांगतमेव B.F.(om.C.).

१० C. om. from विनय एव वैनयिकः; D. om. from सांगतिक आलापः.

Digitized by Google

सपदातिसमाचाराः समायमुक्ताकथंचिदुपचाराः।
निर्मितह्रस्वादेशो बुधैरुपायध्वनिः कथितः[1] ॥ १९४ ॥

पदातिरेव पादातिकः ॥ * ॥ समाचार एव सामाचारिकः ॥ * ॥ समाय एव सामायिकः[2] ॥ * ॥ मुच्यते मुक्तिभिः। मुक्ता। मुक्तैव मौक्तिकम् ॥ * ॥ कथंचिदेव काथंचित्कम् ॥ * ॥ उपचार एव। औपचारिकः ॥ * ॥ उपाय एव। औपायिकम्[3] ॥ * ॥

स वैनयिकवान्सामयिकस्त्रात्ययिकं त्यजन्।
तमौपयिकवान्सेनां[4] निवेश्य बहिराविशत् ॥ १ ॥
स सामूहिकमुत्सृज्य मुनिसांगतिकाय यान्।
पिप्रिये पादयोः पृथ्व्याः पतिः प्रेम्णेव पीडितः[5] ॥ २ ॥
अनौपचारिकैः सामाचारिकव्यावहारिकैः।
यान्ति वैशेषिकैः सामुत्कर्षिकं सत्सु साधवः[6] ॥ ३ ॥
काथंचित्केन कतिचित्सोऽनुमेने तु संचरान्।
नृवीरो वीरसेनादीन्मनोमुत्सांप्रदानिकान् ॥ ४ ॥
अथाकस्मिकमाहानुगादिको[7] वाचिकस्य तम्।

---

१ A. C. D. om. this śloka; A. om. the whole of the comment, C. to मुनिसांगतिकाय यान्; D. to ऽनुमेने तु संचरान्.

२ For समाय Yajñ., Kâś. V., Bö. have समयाचार (but Bö. gives समाय as *var. lect.*); cf. also the *kârikâ* quoted by Yajñ., note 6 below.

३ औपायिकं B.

४ तमौपयिकवत्सेनां F.

५ प्रेम्णैव° F.

६ Yajñ. gives the following two *kârikâs*: अत्र केचिदुदाह्रियंते। सामयाचारिकैरोपयिकैर्द्राक्सांप्रदानिकैः। नश्यंति पाप्मनां सामूहिका आत्ययिका अपि ॥ अनौपचारिकैः सामाचारिकैर्व्यावहारिकैः। यान्ति वैशेषिकैः सामुत्कर्षिकं सत्सु साधवः ॥ एवमन्येऽप्युदाहार्याः ॥

७ अथाकस्मिकमहानुमादिको° C.; D. om. from दिको वा° to द्रष्टव्याः.

Digitized by Google

आकृतिगणोऽयम् । तेन चिवर्णप्रभृतयो[1] द्रष्टव्याः ॥ १९४ ॥ इति विनयादिः ॥

काकतालं च खल्वाटबिल्वे चान्धकवर्तकम्[2]।
अर्धाच्च जरती श्येनात्कपोतो घुणतोऽक्षरम्[3] ॥ १९५ ॥

काकताल इत्येवंप्रकारेभ्यः शब्देभ्यः काकतालीयादय इत्यनेनेवार्थे छप्रत्ययो[4] निपात्यते ॥ * ॥ काकस्य तालं च काकतालमिति द्वन्द्वे सचणया पततः[5] काकस्य निपतता तालेन चिचीयमाणः संयोग उच्यते। तत्तुल्यः काकतालीयः[6] ॥ * ॥ खल्वाटबिल्वयोरिव खल्वाटबिल्वीयः । यथा खल्वाटः पर्यटन्नतर्कितं[7] श्रीफलतरोरधस्ताद्आगतो[8] दैववशाच्च बिल्वमुपरि पतितं तदुदन्योऽणुभयवस्तुसंयोग एवमुच्यते ॥ * ॥ अन्धकस्य वर्तका च । अन्धकवर्तकम् । अन्धकस्य वर्तकाया उपर्यतर्कितः पादन्यास उच्यते । तत्तुल्यम् अन्धकवर्तकीयम्[9] ॥ * ॥ अर्धज-

---

१ The other works do not give चिवर्ण; they also omit the words अनुगादिन् । पदाति । मुक्ता । संयाम given above.

२ °वर्त्तिकं । F.

३ श्येनाकपोतो° C. D. E.; A. om. text and comment.

४ ? ठप्रत्ययो D.; ढप्रत्ययो F.; cf. P. v. 3, 106.

५ पाततः C.; पसतः काकस्य मिपतोलोन चिची° D.

६ काकतालीयम् । अजाकृपाणीयम् । अन्धकवर्त्तकीयम् ॥ अतर्कितोपनतं चिचीकरणमुच्यते । तत्कथम् । काकस्यागमनं यादृच्छिकं तालस्य पतनं च । तेन तालेन पतता काकस्य वधः कृतः । एवमेव देवदत्तस्य तत्रागमनं दस्यूनां चोपनिपातः । तैश्च तस्य वधः कृतः । तत्र यो देवदत्तस्य दस्यूनां च समागमः स काकतालसमागमसदृश इत्येक उपमार्थः । यश्च देवदत्तस्य वधः स काकतालवधसदृश इति द्वितीय उपमार्थः । तत्र प्रथमः समासार्थः । द्वितीये प्रत्ययः ।° Kâś. V. v. 3, 106.

७ पटः अतर्कितं C.; D. corrupt.

८ अधस्ताद्यापातो D.

९ वर्त्तिका च । अंधकवर्त्तिकं° वर्त्तिकाया° अंधकवर्त्तिकीयं F.; उपर्यतः पादन्यास° D.

Digitized by Google

रतीशब्दोऽर्धजरतीकामने[1] वर्तते । तदिव यत्तद् अर्धजरतीयं कार्यम्[2] । यथा स्त्री न तरुणी स्थयस्तनत्वात् क्षयकेशत्वान्न जरती वक्तुं शक्यते तदत्सिद्धासिद्धं प्रयोजनम् ॥ * ॥ श्येनकपोतयोरिव श्येनकपोतीयो दुर्योगः । यथा कपोतोऽतर्कितमागतेन[3] श्येनेन गृहीतस्तथाकस्मिको यो दुर्योगः स एवमुच्यते ॥ * ॥ घृणोत्किरणात्कर्यचिन्निष्पन्नमचरम्[4] । घृणाचरम् । तदिव यदकुशलेन दैवान्निष्पद्यते तद् घृणाचरीयम्[5] ॥ १९५ ॥

पुरुषः शरतो ज्ञेयो गोमयात्पायसं मतम् ।
कृपाणः स्याद्जातश्च शर्करोन्मज्जनं तथा[6] ॥ १९६ ॥

शरस्य छिन्नः प्राकाराच्च पुरुष उत्थितः स तेन हतः[7] । तत्तुल्यं शरपुरुषीयम् ॥ * ॥ गोमयपायसयोरिव गोमयपायसीयम्[8] ॥ * ॥ यथाऽजया भूमिं खनन्त्यात्मवधाय कृपाणो दर्शितस्तत्तुल्यं वृत्तं केनचिदात्मविनाशाय कृतम् । अजाकृपाणीयम् ॥ * ॥ शर्करा च छिन्ना[9] पुरुषस्य चोन्मज्जनं तत्तुल्यं शर्करोन्मज्जनीयम् ॥ * ॥

आकृतिगणस्वायम् । तेन तिन्दुकज्योतिषीयमित्यादयो[10] द्रष्टव्याः ॥ १९६ ॥ इति काकतालादिः[11] ॥

---

१ ऽर्धजरतीयकामने C.

२ यत्तदर्धजरतीयं । यद्वा । अर्धजरतीवार्धजरतीयं कार्यं D. F.

३ कपोततर्कित° C.; कपोते तर्कितमागतेन D.

४ घुणारणात् क° D.

५ यदकुशले दै° C.; निष्पाद्यते° F.; यदकुले दैवान्निष्पद्यते तद् घुणाचरीयं D.

६ शर्करो मज्जनं° D. E.; A. om. text and comment.

७ तेनेह C. and om. to दर्शितस्.

८ शरपुरुषीयं । यथा भूमिं खन° D.

९ D. om. च; शर्करावच्छिन्ना B. C.

१० तिन्डुक° B. F.; तिन्डुक° C.; तिंदुकाज्योतिषिकीयमित्यादयो D.

११ Yajñeśv., Bö. om. this gaṇa; for Kâś. V. see last page, note 6, where MS. β. adds शक्कारार्ज्जनीयं (*i.e.* शर्करोन्मज्जनीयं?) to the three words given by ed. and MS. α.

Digitized by Google

पर्श्वसुरभरतरक्षोबल्हीकवयःपिशाचवसुमरुतः ।
सत्वदुशीनरकर्षापणास्त्रिगर्ताश्वनिदशार्हाः[1] ॥ १९७ ॥

पर्शुभ्योऽण् अस्त्रजीविसंघादित्यनेन पर्श्वादेर्गणादस्त्रियां स्वार्थेऽण् भवति ॥ * ॥ पर्शोरपत्यं पार्श्वः अस्त्रजीविसंघः । पार्श्वी । पर्शवः ॥ * ॥ आसुरः । आसुरी । असुराः ॥ * ॥ भारतः । भारती । भरताः ॥ भोजस्तु भार्तः । भार्ती । भर्ता[2] इत्याह । यथा ।

पार्श्वाग्नबाल्हीकपिशाचासुरराक्षसान् ।
स्त्रियाः सभार्तवैगर्ताश्वकार्षापणवायसान् ॥

राक्षसः । राक्षसी । रक्षसः[3] । रक्षांसीत्यन्यः ॥ * ॥ बाल्हीकः । बाल्हीकी । बल्हीकाः[4] ॥ बल्हिक इत्यन्यः ॥ * ॥ वायसः । वायसी । वयसः[5] ॥ * ॥ पैशाचः । पैशाची । पिशाचाः ॥ * ॥ एवं मारुतः ॥ * ॥ सात्वतः ॥ * ॥ औशीनरः[6] ॥ * ॥ कार्षापणः[7] ॥ * ॥ त्रैगर्तः ॥ * ॥ आश्वनः ॥ * ॥ दाशार्हः[8] ॥

अस्त्रियामिति किम् । पर्शूः स्त्री[9] । ऊङ्युतोऽरज्ज्वादेरेत्यूङ्[10] । रज्वाः ॥ अस्त्रजीविसंघादिति किम् । असुरः[11] ॥ १९७ ॥ इति पर्श्वादिः ॥

---

१ A. om text and comment.

२ आसुराः ॥° भारताः । औशीन° भार्ता D.

३ ? रक्षसाः B. C. F.; राक्षसाः D.

४ बल्हीकाः C.; बाल्हीकाः D.— The other works have बाल्हीक.

५ वायसाः B.; वायसाः D.

६ आत्वतः औसीनरः D.; औशीनरः C.

७ The other works have कार्षापण.

८ Yajñ. has दाशार्हाः; Bö., Kâś. V. दशार्हाः.

९ पर्श्वः स्त्रीः B. C. F.; पर्शू स्त्री D.

१० ऊङ्पूतो° B.; ऊङ्पूनो रज्ज्वादेरेति ऊङ् F.; ऊङ्पूतो° चेति ङुट D.; ऊट्पूतो° चेति ऊङ् C.; see P. iv. 1, 66; 177 vârtt.

११ आसुरः B. C.

6274
8

Digitized by Google

This book is a preservation photocopy.
It was produced on Hammermill Laser Print natural white,
a 60 # book weight acid-free archival paper
which meets the requirements of
ANSI/NISO Z39.48-1992 (permanence of paper)

Preservation photocopying and binding
by
Acme Bookbinding
Charlestown, Massachusetts
1996

Digitized by Google